UNIVERSITY OF KERALA

Trivandrum Sanskrit Series

NO. 192.

SĪTĀRĀGHAVA

OF

RĀMA PĀṆIVĀDA

Edited and published by
SURANAD KUNJAN PILLAI, M. A.,
Honorary Director,
UNIVERSITY MANUSCRIPTS LIBRARY,
TRIVANDRUM.

PRINTED AT THE S. V. G. PRESS, TRIVANDRUM.

1958/1133

[...served] [*Price Rupees Two.*

S
891.202 2
R 141 S

केरलविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः-१९२.

श्रीरामपाणिवादप्रणीतं

सीताराघवम् ।

प्रकाशकः

शूरनाड् कुञ्जन् पिळ्ळ, एम्. ए.,

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९५८/११३३.

मूल्यं रूप्यकद्वयम् ।

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 7086
Date 4.11.65
21|1
S
891.202 2
R141S
Library IIAS, Shimla
S 891.202 2 R 141 S
00007086

INTRODUCTION

We have great pleasure in bringing out SĪTĀRĀGHAVA, a drama in seven Acts by Rāma Pāṇivāda associated with the court of Mahārāja Mārtāṇḍa Varma (1729-1758) of Travancore. Pāṇivāda is known to have produced several works in Sanskrit, Prākṛt and Malayāḷam.* There is a good deal of controversy about the identity of Pāṇivāda. Some scholars including Mahākavi Uḷḷūr S. Parameśvara Aiyar, hold that Rāma Pāṇivāda was no other than Kuñchan Nampiār, the great Malayāḷam poet well-known for his 'Tuḷḷal' works.† But other scholars have tried to prove that from evidence available the identification cannot be considered to be beyond doubt. A discussion on this question may be found in the introduction to the Rāghavīya published from this Library as T.S.S. No. 146. Here it may be sufficient to note that there is a good deal of evidence in support of the identification although the question cannot be considered to be settled for ever. In the colophons of some works popularly believed to be composed by Nampiār, Rāma Pāṇivāda is mentioned as the author.‡ There are also several parallelisms in the Sanskrit

* A list of Rāma Pāṇivāda's works is given as appendix.

† Vide Kerala Sāhitya Caritra by Mahākavi Uḷḷūr S. Parameśvara Aiyar, Vol. III. P. 332.

‡ Vide colophon in the Malayāḷam manuscript No. L. 649. (Mss. Library collection) of Pañcatantra-

पञ्चतन्त्रं नीतिशास्त्रं भाषया सन्निवेशितम् ।
रामेण पाणिवादेन बालानां बोधहेतवे ॥

Pañcatantra is popularly known to be the work of Kuñchan Nampiār.

works of Pāṇivāda and the Malayāḷam works of Nampiār. Those who oppose the view however point out that Nampiār's Sanskrit scholarship as revealed in his Tuḷḷal works is not sufficiently deep to justify the identification. As the evidence available is not conclusive, we can only leave the question for further research.

Fixing our attention on the known Sanskrit and Prākṛt works of Rāma Pāṇivāda, we find him to be a poet, dramatist and commentator of remarkable talents. Viṣṇuvilāsa and Rāghavīya are Sanskrit Māhākāvyas by Pāṇivāda. Kamsavaho and Uṣāniruddha are his Prākṛt Kāvyas. His Bhāgavata Campu as well as his Stotras are also commendable literary productions. His commentaries and his works on *Chandas* and *Tāḷa* reveal the profundity of his learning in several branches of knowledge.

Four works of Rāma Pāṇivāda belonging to the Rūpaka type have been discovered, Līlāvati, Candrika, Madanaketucarita, and Sītārāghava. These works are beautiful productions entitling their author to a place of honour among the dramatists in Sanskrit. Līlāvati Candrika and Madanaketucarita are shorter works, the first two being one act plays (*Vīthīs*) and Madanaketucarita a *Prahasana*. Sītārāghava is the only known work of Rāma Pāṇivāda belonging to the *Nāṭaka* type and admittedly one of his most important works.

A few facts about this Nāṭaka and a brief analysis of its contents are given below:—

From the *Prasthāvana* (prelude) we understand that the author of this piece is Rāma Pāṇivāda, and that he wrote this for enactment before the assembly of learned Brāhmins who had come to Trivandrum in

response to the invitation of Mahārāja Mārtāṇḍa Varma, presumably on the occasion of the *Murajapam* festival in the temple of Śri Padmanābha in 1756. The poet bestows high praise on his patron, Mahārāja Mārtāṇḍa Varma in the following verse:—

अधिस्यानन्दूरं जयति जगतीपालनपरं
परं ज्योतिश्शीतद्युतिधवळशेषाहिशयनम् ।
यदन्तस्सम्तन्वन्नखिलनृपतीनां न तु परं
सुराणामप्युच्चैरधिवसति मार्तण्डनृपतिः ॥ (I. 5.)

The play opens with the scene of Daśaratha and Kausalya anxiously awaiting the news about Rāma and Lakṣmaṇa who had gone with Visvāmitra to afford protection for his *Yajña*. Then a messenger by name Chārāyaṇa, arrives there and narrates the exploits of Rāma from the slaying of Tāṭaka till Rāma and Lakṣmaṇa were taken to Mithila by the sage.

The second Act presents a well-conceived scene where two Asurās Māyāvasu and Karambaka, determined to take vengeance on Rāma for the slaughter of Tāṭaka and Subāhu and for putting to flight Mārīca, appear in the court of Janaka disguised as Daśaratha and Sumantra. Their aim was to dissuade Rāma from stringing Śiva's bow and thus taking the hand of Sīta in marriage. In this and in similar other scenes Pāṇivāda shows his remarkable ability to handle delicate situations. The second Act closes with the sudden exit of the disguised demons on the arrival of Daśaratha and his party from Ayodhya to attend the wedding of Rāma and Sīta. Māyāvasu was however determined to continue his designs of hostility against Rāma, and swore that he would incite Paraśurāma against Rāma for breaking the bow of Śiva

(Paraśurāma's preceptor), and persuade Rāvaṇa to abduct Sita.

घातयित्वा मुनीन्द्रेण मुनिशिष्यौ नरार्भकौ ।
जानकीं हारयिष्यावो रावणेनाविलम्बितम् ॥ (II. 45.)

The third Act is a farewell scene where Sita, Ūrmilā, Śrutakīrti and Māṇḍavī (who were married to Rāma and his three brothers Lakṣmaṇa, Bharata, and Śatrughna) take leave of Janaka. This scene reminds one of the fourth Act of Śākuntala of Kālidāsa.

In the fourth Act the dramatist introduces a new character Ayomukhi (a friend of Śūrpaṇakha) who in the guise of Manthara incites Kaikeyi to expel Rāma to the forest and secure the kingdom to Bharata. Śūrpaṇakha was possionately in love with Rāma and it was her ardent wish to get Rāma near her sylvan abode. Rāvaṇa is also introduced in this Act as deeply yearning for the union with Sīta. To heighten the effect of the scene Prahasta is made to present a picture of Sīta to Rāvaṇa, which further arouses Rāvaṇa's passions and makes him act almost like a mad man.

The fifth Act is mainly taken up with Rāma's alliance with Sugrīva and Māyāvasu's attempt to thwart it in the guise of Chāraṇa. This is an agreeable repetition of the earlier scene where we saw Chāraṇa in the guise of Daśaratha. This scene has a two-fold purpose, (1) of continuing the Mâyâvasu story, and (2) of narrating the exploits of Hanuman in Lanka and the incidents connected with that episode. The report of Mâyâvasu was of course calculated to drive Rama to despondence by falsely narrating the killing of Sīta by Râvaṇa finding

her to be untractable. Māyāvasu's intention as he himself states was—

तदेव दुस्सहं किञ्चिदाख्यास्याम्यनृतं वचः ।
यदेव श्रुतमात्रेण त्रीनिमान् मूर्च्छयिष्यति ॥ (V. 34.)

But the attempt of Māyāvasu was thwarted in time by Dadhimukha, the keeper of Sugrīva's garden, who came complaining about the pillage of the garden by Hanumān and the monkey forces who had returned from Lanka.

The sixth Act opens with a *Praveśaka* in the form of a dialogue between a Vanadēvatā (who came to Lanka in search of Sīta at the instance of Lōpāmudra) and Lankālakṣmi. The glory of the reconstructed Lanka after its destruction by Hanumān forms the theme of the dialogue. The mission of the Vanadēvata was to know the plight of Sītādēvi. This naturally leads to the next scene where Sīta is introduced as seated in the Aśoka garden guarded by Trijaṭa and Sarama. The latter part of this Act presents also the tumultuous scene of the battle in Lanka.

The play closes with the last and the seventh Act dealing with the return of Rāma and Sīta to Ayōdhya.

Pāṇivāda has succeeded in an eminent degree in securing dramatic effectiveness in the presentation of the plot. No doubt he borrowed the story from Rāmāyaṇa. But the presentation is largely original. He had derived inspiration for his innovations from other Sanskrit dramas based on Rāmāyaṇa, like Uttararāmacarita, Jānakīpariṇaya, Āścaryacūḍāmaṇi and Anargharāghava. But he has been able to show his individuality

and has never degenerated into imitation. No great claim can be made in the matter of characterisation although the delineation of Māyāvasu certainly deserves praise. Pāṇivāda's special skill lies in creating and handling situations commendable for their theatrical effect. The dramatist has succeeded in connecting the early incidents of Rāma's life in killing Tāṭaka and Subāhu with the whole of the later events in the Rāmāyaṇa as being brought about by the hostility of the demons.

Like several other Sanskrit Nāṭakās, Sītārāghava also deserves greater praise as a poetic work. Pāṇivāda shows himself at his best in this work as a master of ornate expression We may quote a few stanzas by way of illustration:-

कन्या काचन लोचनामृततनुस्सीतेति चेतोभुव-
श्शश्वद्विश्वमनोविमोहनमहाविद्येव विद्योतते ।
चापश्चापि सुरासुरैरपि दुरारोपं पुरद्रोहिणो
वैदेहस्य पुरेऽद्भुतद्वयमिदं जागर्ति लोकोत्तरम् ॥ (I. 14)

आरादारामवाटादमरतरुलताधामहेमारविन्द-
प्रश्च्योतन्मुग्धमाध्वीपरिमलभरणायासमन्दप्रचारः ।
कासारस्फारवारिप्रसृमरलहरीबिन्दुसन्दोहसान्द्रः
संसर्पन् दर्पकस्य स्वयमयमयते बन्धुतां गन्धवाहः ॥ (IV. 19.)

उत्तप्तस्वर्णभित्तिस्फुटघटितमहेन्द्राश्मनो वेश्मपङ्क्ते-
रुद्योतैः पीतनीलैः स्थिरचपलघनभ्रान्तिमभ्रे दिशन्ती ।
संक्रीडत्किङ्किणीकध्वजपटपटलीवातधूतोडुसङ्घा
लङ्का मे काममक्ष्णोरियममरपुरप्रेक्षणे विक्षिणोति ॥ (VI. 1.)

There are five Manuscripts of this work in this Library:—

Ms. No. 1102, marked क. was obtained from Śri Viṣṇu Nampūtiri, Eṭṭikkaḍa Illam, Āyānkuḍi, Faḍutturutti in North Travancore.

Ms. No 10923, marked ख, from Nīlakaṇṭhan Sukumāran Mūttatu, Chozikkara Illam, Faḍutturutti.

Ms. No. 1153, marked ग, belongs to Nārāyaṇan Muttuṇṇi Menon, Ampalapp̣uza.

Ms. No. 12344, marked घ, brought from Akavūr Mana, Cochin.

Ms. No. L. 478, marked ङ, brought from Pūmuḷḷi Mana, South Malabar.

All the manuscripts are written in Malayāḷam script and are well preserved. Of these the first one alone contains the Chāyā for the Prākṛt passages in the drama.

Śri K. S. Mahādeva Śāstri the former Curator, Śri V. G. Nampūtiri and Śri V. Nārāyaṇan Nampūtiri, M. A; B. Sc; B. T; Paṇḍits in this Library have assisted me in the preparation of this edition.

University Manuscripts Library, Trivandrum.
22-5-1958

Śūranād Kuñjan Piḷḷai,
Honorary Director.

APPENDIX

A list of Rāma Pāṇivāda's Sanskrit works:-

1. Viṣṇuvilāsa:- A Sanskrit Kāvya with the commentary Viṣṇupriya, edited by Dr. P. K. Narayana Pillai, M. A; Ph. D., No. 165. of the Trivandrum Sanskrit Series.
2. Rāghavīya:- A Sanskrit Mahākāvya, edited by Dr. L. A. Ravi Varma in 1942, as T.S.S. No. 146.
3. Kamsavaho:— A Prākṛt Kāvya, edited with English notes and translation by Dr. A. N. Upadhye, Bombay, 1940.
4. Uṣāniruddha:— A Prākṛt Kāvya, edited with an introduction and Skt. Cchāyā by Dr. C. Kunhan Rāja and S. Subrahmonya Śāstri, Adayar, 1943.
5. Līlāvatī:-- Published in the Sanskrit Quarterly Journal of the University Manuscripts Library, Trivandrum. Vol. III. Nos. 2 - 4.
6. Candrika:— Published by Prof. Rāma Piṣāroṭi in the Bulletin of the Rāma Varma Research Institute, Trichur, 1934. No. 3.
7. Madanakētucarita:— A Prahasana published with an introduction by Dr. P. K. Narayana Pillai, M. A; Ph. D., Trivandrum, 1948. T.S.S. No. 161
8. Sītārāghava:— Edited by Śūranāḍ Kuñjan Pillai Trivandrum, as T.S.S. No. 182, 1958. A Part of this work has been published in the Sāhityaratnāvali Series, Trichur.
9. Sūryaśataka and Ambarāṇadīśa Stotra:— Both published by K. Nārāyaṇa Piṣāroṭi in the Sāhitya Parishad Traimāsikam, Ernakulam, Vol. 7.

10. Mukundaśataka:— Edited by V. A. Rāmasvāmi Śāstri, T.S.S. No. 157, 1946.

11. Mukundāṣṭaka:— Published in the Sanskrit Quarterly Journal of this Library, Vol. I to Vol. II. No. 2.

12. Śiva Śataka:— Published in the Skt. Journal of this Library, Vol. II. No. 3. Trivandrum, 1946.

13. Bhāgavata Campu:— A palm leaf manuscript, No. C. 2374 of the University Manuscripts Library, Trivandrum.

14. Bālapāṭhya:— A commentary on Rāghavīya, Ms. No. T. 823. of the University Manuscripts Library, Trivandrum.

15. Vilāsinī:— A commentary on Sukumāra Kavi's KṛṣṇaVilāsa Kāvya.

16. Vivaraṇa:— A commentary on Dhātu Kāvya of Melputtūr Nārāyaṇa Baṭṭatiri.

17. Prākṛtasūtravṛtti:— Published in the Bulletin of the Adayar Library.

18. Vṛttavārtikam:— Edited by K. Sāmbaśiva Śāstri as T.S.S. No. 131.

19. Rāsakrīḍākāvya:— A work on Cchandas.

20. Tāḷaprastāra:— A work on Tāḷa.

Two more Sanskrit works, Pañcapādi and Śṛṅgāravimśati are also attributed to him.

रामपाणिवादप्रणीतं

सीताराघवम्

अशेषाधारमप्येकं शेषाधारमनेकवत् ।
व्यक्तमप्यलमव्यक्तं परं ज्योतिरुपास्महे ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः — यामिवानुहरन् प्रीत्या चूडाचन्द्रोऽपि नृत्यति ।
सा वः सायं भ्रुकुंसस्य त्रायतां ताण्डवक्रिया ॥ २ ॥

अलमतिप्रसङ्गेन । (नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

नटी — (प्रविश्य) (क) अय्य इअम्हि ।

सूत्रधारः — आर्ये!

श्रीनारायणभट्टपादकरुणापीयूषगण्डूषणा-
दिष्टां पुष्टिमुपैति यस्य कविताकल्पद्रुबीजाङ्कुरः ।
रामो नाम स पाणिवादकुलजस्तस्य प्रभूतं फलम्
सीताराघवनामनाटकमयं सभ्यार्थमभ्यागमत् ॥ ३ ॥

तदभिनवं नाटकमभिनयेन सफलीकर्तुमभिलषामः ।

(क) आर्य, इयमस्मि ।

---

१. 'नेप' ख. ग. ङ.

२. 'इअ हि' च.

३. 'नवनाट' च.

४. 'वे सफ' ङ.

नटी — (क) अय्य जइ एव्वं तक्खु सीआराहवं णाम णाडअं णाडअरससारवेइणीअं अहिरूवब्बह्मणवरिट्ठभूइट्ठाअं गोट्ठीअं अहिणेदव्वं। कीच — धम्मरक्खणविअक्खणेण सव्वजणाणुरंजणगुणसंपण्णेण रण्णा समहिणंदणिज्जंति मे अहिप्पाओ। ता तादिसो कदमो पदेसो अय्येण विआरिओ!

सूत्रधारः — आर्ये! इदमत्र विचार्यते। (विचिन्त्य सहर्षम्) आर्ये! किमत्र विचारणीयम्। पश्य

स्यानन्दूराभिधाने महितमहिमनि क्षीरवाराब्धिधाने
तल्पे सर्पेशरूपे रुचिमति पतगाधीशयानः शयानः।
आधाता वाञ्छितानामवनिवलभिदां वञ्चिभूपालनाम्ना-
माम्नायज्ञापकेन स्फुटमिह विलसत्यात्मना पद्मनाभः ॥ ४ ॥

तत्र तावत् त्वदुपन्यस्ताधिकगुणगणसम्पन्नेन वैकुण्ठतोऽप्यतिशयरमणीयदिव्यद्रव्यसम्पत्संपूरितस्यानन्दूरमन्दिरेण सर्वात्मना पद्मनाभसमर्पितसमस्तनिजविभवेन सर्वसामन्तकुलमकुटमणिमरीचिवीचिनीराजितचरणकमलेन इदानीन्तनेन राज्ञा वञ्चिमार्तण्डेन सकलदिगन्तेभ्यः समाहूय समधिष्ठापितानां समधीतवेदशास्त्राणां सरसकाव्यरसमज्जावमज्जन

(क) आर्ये! यदि एवं तत्खलु सीताराघवं नाम नाटकं नाटकरससारवेदिन्यामभिरूपब्राह्मणवरिष्ठभूयिष्ठायां गोष्ठ्यामभिनेतव्यम्। किञ्च— धर्मरक्षणविचक्षणेन सर्वजनानुरञ्जनगुणसम्पन्नेन राज्ञा समभिनन्दनीयमिति मे अभिप्रायः। तत् तादृशः कतमः प्रदेशः आर्येण विचारितः!

---

१. 'जुइ' क.
२. 'किं च' ख. ग. घ.
३. 'अणा' ख. ङ.
४. 'णिद्दंति' ग.
५. 'सावमज्जा' ख.

सज्जसज्जनभूयिष्ठानां ब्राह्मणवरिष्ठानांमतिगरिष्ठां गोष्ठीमपहाय क नामेद-मभिनेतव्यम् । तथा हि —

अभिस्यानन्दं रञ्जयति जगतीपालनपरं
परं ज्योतिश्शीतद्युतिधवलशेषाहिशयनम् ।
यदन्तस्सन्तन्वन्नखिलनृपतीनां न तु परं
सुराणामप्युच्चैरधिवसति मार्ताण्डनृपतिः ॥ ५ ॥

नटी — (क) अय्य ! जइ एव्वं सो खु णरिंदो रामअंदो विअ भअवदो पदुमणाहस्स कोवि कलावदारोत्ति तक्केमि

(नेपथ्ये)

वीसाण मित्तदाए संदावहरेण सळिलबाहेण ।
ओच्छाइअम्मि चंदे विच्छाओ होइ भुवणंतो ॥ ६ ॥

सूत्रधारः — (आकर्ण्य) अये प्रस्तुते वस्तुनि प्रक्रान्तमेव कुशीलवैः । यतो विश्वाभ्युदयहेतोरध्वरस्य परित्राणाय भगवता विश्वामित्रेण स्वमाश्रमसुपनीते रामचन्द्रे तद्विरहपर्युत्सुकस्य महाराजदशरथस्य प्रावेशिकी ध्रुवा गीतिरियमाकर्ण्यते ॥

(क) आर्य, यद्येवं स खलु नरेन्द्रो रामचन्द्र इव भगवतः पद्मनाभस्य कोऽपि कलावतार इति तर्कयामि ।

विश्वेषां मित्रतया सन्तापहरेण सलिलवाहेन ।
अवच्छादिते चन्द्रे विच्छायो भवति भुवनान्तः ॥ ६ ॥

---

१. 'नां गरिष्ठां' च.
२. 'रिष्ठानां गोष्ठीं' घ.
३. 'नेप' ङ.
४. 'ळाच्छा' ग.
५. 'इआमि' ग.
६. 'स्वाश्रमसुप' ङ.

नटी — (क) (नेपथ्याभिमुखमवलोक्य) अम्मो एस महाराअदसरहो महादेवीए कोसल्लाए सह किंवि मंतअंतो अन्तेउरब्भंतरं अहिचिट्ठइ।

सूत्रधारः — आर्ये! तदावामपि अनन्तरकरणीयाय सज्जीभवावः
(इति निष्क्रान्तौ।)

(इति प्रस्तावना।)

(ततः प्रविशत्यासनस्थो दशरथः कौसल्या च।)

दशरथः — देवि! दक्षिणकोसलेन्द्रनन्दिनि!

मास्तां भर्ता वसिष्ठः स च कुशिकसुतो नित्यमत्याहितेभ्यो
रक्षेयुर्वत्समेते रघुकुलगुरवः सानुजं रामभद्रम्।
इत्थं संस्थाप्यमानं तरलयति ममाप्यन्तरङ्गं तरङ्गो
मोहाब्धेश्शोकनामा कमिव विवशयन्नेष संसारभाग: ॥ ६ ॥

कौसल्या— (ख) महाराअ! एव्वं एदं अत्राआणुदंसी सिणेहो णाम।

दशरथः — उपपन्नमिदम्। ननु ताटकासुबाहुमारीचमायावसुप्रभृतिभिः कृतान्तकिङ्करभयङ्करैः लङ्कापतिकिङ्करैरतिभयानकः श्रूयते स उद्देशः, यत्र किल भगवता विश्वामित्रेण सत्रमुपक्रान्तम्।

(क) अम्मो एष महाराजदशरथो महादेव्या कौसल्यया सह किमपि मन्त्रयन्नन्तःपुराभ्यन्तरमधितिष्ठति।

(ख) महारज! एवं एतत्। अपायानुदर्शी स्नेहो नाम।

---

१. 'नेप' क. च.
२. 'वः। (निष्क्रान्तौ) (प्रस्तावना)' च.
३. 'रामचन्द्रम्।' ख. ग. ङ.

कौसल्या — (सभयं) (क) हा मम पुत्तआणं रामलक्खणाणं तत्थ[1] की भविस्सिदित्ति[2] ण आणामि ।

दशरथः — देवि! मा भैषीः । स तत्र[3] भवान् कौशिको ह्यायुष्मतोरनुपालयिता । यस्मिन्[4] हि

वृत्राराातिप्रणिहितमहाशोकशङ्कोस्त्रिशङ्कोः
सन्त्राणाय त्रिजगदपरं ब्रह्मकुक्षौ सिसृक्षौ ।
त्रासोद्भूतक्रमपदगुणप्रक्षराण्यक्षराणि
प्रायुङ्क्त प्रागतिनुतिगिरां संविधाता विधाता ॥८॥

कौसल्या — (ख) महाराज! तह णाम[5] महप्पहावो वि भअवंतो कोसिअमहेसी किंणिमित्तं अत्तणो जण्णविग्घकारिणो अण्णेण णिवारेदुं उवक्कंतो ।

दशरथः — (सस्मितम्) देवि! अयं हि महतां स्वभावः । पश्य

शेषेण भारयति चक्रधरो धरित्रीम्
मेघेन वर्षयति सोऽपि पतिर्नदीनाम् ।
नैशन्तमश्शमयति ज्वलनेन भास्वान्
नानन्तरं स्वविभवं प्रथयन्ति सन्तः ॥९॥

(क) हा मम पुत्रयो रामलक्ष्मणयोस्तत्र किं भविष्यतीति न जानामि ।

(ख) महाराज! तथा नाम महाप्रभावोऽपि भगवान् कौशिकमहर्षिः किन्निमित्तमात्मनो यज्ञविघ्नकारिणो अन्येन निवारयितुमुपक्रमते ।

---

१. 'तत्थ किं' क. ख. घ.

२. 'विस्सदित्ति' घ. च.

३. ' भगवान्' ख. च.

४. 'न् - वृत्रा' घ.

५. 'तथह णाम' ग.

कौसल्या — (क) होदु एव्वं एत्तिएण उण कालेण तस्स जण्णेण संपुण्णेण होदव्वम्। एव्वं च समत्थिदणिअत्थो वि सो अज्ज वि दाव ण पडिणिवत्त इत्ति की[1] एदं भवे।

दशरथः — देवि! बहुविघ्नानि श्रेयांसि। तदियत्तया विनिश्चेतुं[2] न शक्यते। किन्त्वेतावता कालेन न कश्चिद्वार्ताहरोऽपि प्रेषित इति पर्याकुलोऽस्मि।

(प्रविश्य)

प्रतीहारी — (ख) जेदु महाराओ। जेदु देवी।

दशरथः — कलापिके! किमागमनप्रयोजनम्?

प्रतीहारी — (ग) महाराअ, सिद्धस्समादो आअदो।

कौसल्या — (साशंसं) (घ) की[3] वच्छेहिं सह भअवंतो कोसिओ!

प्रतीहारी — (ङ) णहि णहि। कोसिअमहेसिणो अंतेवासी चारा-अणो णाम तावसो वत्ताहरो।

(क) भवत्वेवम्। एतावता पुनः कालेन तस्य यज्ञेन सम्पूर्णेन भवितव्यम्। एवञ्च समर्थितनिजार्थोऽपि सोऽद्यापि तावन्न प्रतिनिवर्तत इति किमेतद् भवेत्।

(ख) जयतु महाराजो। जयतु देवी।

(ग) महाराज, सिद्धाश्रमादागतः।

(घ) किं वत्साभ्यां सह भगवान् कौशिकः?

(ङ) नहि नहि कौशिकमहर्षेरन्तेवासी चारायणो नाम तापसो वार्ताहरः।

---

१. 'किं एवं' घ.

२. 'या निश्चेतुं' ग.

३. 'किं वच्छेहिं'. घ.

दशरथः — शीघ्रं प्रवेश्यताम् ।

प्रतीहारी — (क) जं महाराओ आणवेदि (इति निष्क्रम्य चारायणेन सह प्रविश्य) इदो इदो महाभाओ ।

चारायणः — (पुरोऽवलोक्य)

यस्यार्धासनमास्थितस्य दनुजश्रेणीशिरैर्विक्षतं
वक्षो वामभुजातलेन शनकैरामृद्नता वज्रिणा ।
लघ्वी निष्कृतिरभ्यमानि सकलस्वाराज्यमप्यर्पितं
दिष्ट्या मे स महारथो दशरथो दृष्ट्योस्स्मृतिं गाहते ॥ १० ॥

अपिच —

कण्ठे कौस्तुभवत् करे कमलवद्[1] वक्षस्थले हारव-
न्मूर्ध्नि स्वर्णकिरीटवत् कटितटे काञ्चीलताजालवत् ।
यस्मिन्नंशचतुष्टयं निजमजेनाधायि साधारण-
स्थानन्यासविदा ददाति नृपतिस्सोयं मुदं मे दृशोः ॥ ११ ॥

प्रतीहारी — (ख) एस चिट्ठइ महाराओ ता उपसप्पदु णं महाभाओ ।

चारायणः — बाढम् (उपसृत्य) विजयतामुदारकुमारचतुष्कचतुस्तम्भीसम्भाविमचतुरम्तवसुन्धरावलयनिलयो वलवैरिबन्धुः ।

दशरथः — (आसनादुत्थाय) भगवन्नभिवादये । इदमासनमलङ्क्रियताम् ।

चारायणः — तथेत्युपविशति ।

(क) यन्महाराज आज्ञापयति । इत इतो महाभागः ।

(ख) एष तिष्ठति महाराजस्तस्मादुपसर्पत्वेनं महाभागः ।

---

1. 'करे कनकवद्' ग.

कौसल्या — (क) भअवं! पणमामि ।

चारायणः — भद्रे! भद्रभागिनी भूयाः । ननु युवामप्युपविशतम्[1]

(उभावुपविशतः)

चारायणः — श्रूयतामवसितसप्ततन्तोराचार्यस्य सन्देशः ।

दशरथः — अवहितोऽस्मि ।

चारायणः — एवमाह स्म तत्र भवानुपाध्यायः ।

मध्येपद्धति ताटकां हतवता भूयः सुबाहुं घ्नता
  मारीचं भयविद्रुतं विदधता रक्षांसि विक्षुन्दता ।
निस्तन्द्रं निरुपप्लवीकृतमहासत्रेण पुत्रेण ते
  सिद्धार्था वयमक्रियामहि महीभर्तस्समाप्तक्रियाः ॥१२॥

दशरथः — भगवन्! —
आदित्याः प्रागवनिपतयो यानि तेपुस्तपांसि[2]
  व्यालम्बन्ते नियतमधुना तानि मे रामभद्रम् ।
यस्मादस्मिन्नरिकुलबलोन्माथिनी गाधिसूनो-
  रासङ्क्रान्ता बुधजनमनोहारिणी कारुणीयम् ॥१३॥

सर्वस्तवः ।

चारायणः — अत्रान्तरे तावदध्वरदीक्षामातिष्ठता[3] प्रियसुहृदा विदेहान्वयध्वजेन सीरध्वजेनामन्त्रिता[4] वयं विदेहान् गन्तुमुपक्रमामहे ।

(क) भगवन्! प्रणमामि ।

---

१. 'भावप्युप' ख. ङ.

२. 'तेपुस्त' ङ. च.

३. 'ता विदेहान्वयप्रियसुहृदा' ख. ङ.

४. 'न मन्त्रि'. च.

किञ्च वत्साविमौ रामलक्ष्मणावपि तानेव निनीषामहे । कुतः-

कन्या काचन लोचनामृततनुस्सीतेति चेतोभुव-
शशश्वद्विश्वमनोविमोहनमहाविद्येव विद्योतते ।
चापश्चापि सुरासुरैरपि दुरारोपं पुरद्रोहिणो
वैदेहस्य पुरेऽद्भुतद्वयमिदं जागर्ति लोकोत्तरम् ॥ १४ ॥

किञ्च —

यः सज्यं विदधाति धूर्जटिधनुस्तस्मै प्रदास्याम्यमू-
मित्थं संगिरते स्म वीरकलनाकाङ्क्षी स सीरध्वजः ।
कन्यारत्नमयोनिजञ्च निमयस्संबन्धयोग्याश्च वो
रामश्चोद्वहनक्रियोचितदशस्त्रीणि प्रहिण्वन्ति नः ॥ १५ ॥

यद्ययमर्थो भवतेऽपि रोचते तर्हि तया[1] प्रयतिष्यामहे । अन्यथा चारायणप्रत्यागमनमेवकुमारयोरनुप्रेषणकाल इति ।

दशरथः — (सप्रमोदम्) कोऽत्र सन्देहः,

रविकुलभुवां राजन्यानां विदेहमहीश्वरैस्सह
समुचितस्संबन्धोऽयं यदि प्रतिपत्स्यते ।
यदि च भगवान् विश्वामित्रः स्वयं प्रतिभूरपि
प्रियतरमिदं श्रेयः कस्मै जनाय न रोचते ॥ १६ ॥

अथवा देवी किं मन्यते ।

कौसल्या — (क) महाराज, अचिन्तिदोवणदस्स अब्भुदअस्स अब्भुवगममत्ते ववसाए कस्स विसंवादो । कीदुं[2] । सुरासुरेहि वि दुरा-

---

(क) महाराज, अचिन्तितोपनतस्याभ्युदयस्याभ्युपगममात्रे व्यवसाये कस्य विसंवादः । किन्तु सुरासुरैरपि दुरा-

---

१. 'प्रयतिष्यते' घ. ङ. च. प्रयतिष्ये. ग.
२. 'किंदु' घ.

रोवं संकरसरासणं जाणईपरिणअणे पणंति सुणंती मीदह्मि ।

चारायणः -- (स्वगतम्) आश्चर्यम् ।

कालेन क्षितिपालमौलिवलभीपर्यङ्कमारोक्ष्यतो
मुग्धाक्षीकुचकुम्भसीमनि शनैस्संप्राप्स्यतो विश्रमम् ।
आनिष्पत्तिकमात्मनैव सुचिरं गर्भे धृतस्याप्यसौ
वेत्त्यद्यापि महार्घतां कथमहो शुक्तिर्न मुक्तामणेः ॥ १७ ॥

दशरथः — देवि, मैवं शङ्किष्ठाः । पश्य -

अनुद्धतकरोष्मणा दिनकृतेव बालेन यो
दिनोदय इवाशरानपकृतोऽन्धकारानिव ।
असंशयमघातयत्किल स एव गाधेस्सुतो
महामुनिरतः परं किमिव नामुना साधयेत् ॥ १८ ॥

अथ पृच्छामि भगवन् ! तदानीं किल भयपलायितेन मायाविना मारीचेन कदाचिदायुष्मतोरत्याहितं किञ्चिदापादयिष्यत इति किमाशङ्कनीयम् ।

चारायणः — राजन् ! नेदमाशङ्कनीयम् । कुतः -

रामेण मारुतास्त्रेण लम्भितः कान्दिशीकताम् ।
गतो गत्यन्तराभावात्ताटकेयस्तपस्विताम् ॥ १९ ॥

रोषं शङ्करशरासनं जानकीपरिणयने पणमिति शृण्वती भीतास्मि ।

---

१. 'रारोवं' ख. ङ.
२. 'सुणिअ भीद' ख. सुणीय. ङ.
३. 'कुलकुम्भ' ग.
४. 'स एष गाधेः' ख. घ. ङ. च.
५. 'दमश' घ.

किन्त्वन्यत्किञ्चिदाशङ्कनीयम[1]प्यस्ति ।

दशरथः — (सोद्वेगम्) तत् किन्नाम ।

चारायणः — अस्ति मारीचशिष्यो मायावसुर्नाम ।

दशरथः — श्रूयते । स दुरात्मा[2] मायायामद्वितीयः । किं सोऽपि न व्यापादितः ।

चारायणः — नहि नहि । स तावत्तस्मिन्व्यतिकरे कुमारलक्ष्मणस्य बाणैराविद्धस्सत्वरं तिरोभूतः[3] । न जानीमः क्व[4] प्रयातवानिति ।

दशरथः — इदन्तु महदनर्थबीजं नाम । कुतः -

मारीचस्य व्यसनमसहन्तस्य मातुर्विपत्ति-
र्बन्धूनाञ्च क्षपणमपि च स्वस्य भङ्गं[5] समीके ।
इत्येतानि प्रकृतिकपटप्राक्रियासुक्रियावा-
न्मायी मायावसुरसुहृदामेकशेषो न सोढा ॥ २० ॥

कौसल्या — (क) भअवईओ[6] इक्खाउकुलदेवताओ मह[7] पुत्तआणं परिरक्खितिआओ होंतु ।

(क) भगवत्य इक्ष्वाकुकुलदेवता मम पुत्रयोः परिरक्षित्र्यो भवन्तु ।

१. 'मस्ति' घ.
२. 'त्मा मायावी मायायाम' ग. ङ.
३. 'रोहितः' घ.
४. 'क्व यातवानिति' ख. ग. घ. ङ. च.
५. 'गं स' घ,
६. 'वदीओ' ग. 'वओ इक्खा' च.
७. 'मम पुत्त' ख. ग. घ. ङ. च.

चारायणः — राजन्! अलमावेगेन। कुतः—

विश्राणेषु वसुन्धरां भुजयुगे येषु कपोत्तानिता-
नाधत्ते स भुजङ्गराड्जुतया नश्यद्वलीकान् फणान्।
हव्यैरेव न केवलं बलमिदं नव्यैश्च दोर्विक्रमै-
राराध्यन्त इमे भियामविषयास्ते यूयमिक्ष्वाकवः॥२१॥

अपि च —

सत्रान्ते सप्रमोदप्रसरमुपसरल्लोमहर्षी महर्षी
रामं प्रेमाश्रुवर्षैरसिचदसुलभैर्यं गुरुर्गाधिजन्मा।
तस्मिन् केदारभूमौ शशिविशदयशःपुष्पनिष्पन्नशोभा
रक्षोग्रासंभवेयुः कति कति न भुजावीर्यबीजनिकायाः॥२२॥

(नेपथ्ये)

वैतालिकेष्वेकः – सुखाय सायन्तनसन्ध्या भवतु महाराजस्य। तथाहि —

अस्तक्ष्माभृदधित्यकापरिगलद्धातुद्रवाद्रैरिवं
प्रत्यासन्नवियोगकोकतरुणीशोकाग्निलग्नैरिव।
आताम्रैः किरणोत्करैरवतरत्याशामसौ वारुणी-
माश्लेषव्यतिषक्तरक्तनलिनीचिह्नैरिवाह्नां पतिः॥२३॥

अपि च —

ऐन्द्र्या किञ्चिदितोन्मिषद्द्युतिलसत्ताराक्षिसाहस्रया
म्लानीभूतमुखश्रिया कुपितयेवोद्वीक्ष्यमाणो दिशा।
स्तोकोन्नम्रपयोधरां करधृतनावन्ध्यसान्ध्यप्रभा-
काश्मीरेण विभूषयत्यपरदिक्कान्तां हरित्कामुकः॥२४॥

द्वितीयः —

रात्रावुद्भ्रमता घनेन तमसा स्वीकर्तुमाकाङ्क्षितां
सन्ध्यामेष पतिंवरामिव वधूमुद्दामरागोदयाम्।

---

१. 'मल' ख.

आसम्पूर्णकलाकलापसुभगो रक्तोल्लसन्मण्डलो
मन्ये स्वैरममूं ग्रहीष्यतितरां लब्धोदयश्चन्द्रमाः ॥ २५ ॥

चारायणः — (श्रुत्वा स्वगतम् ।) अये रावणेन जिघृक्षितायाः सीतायाः रामभद्रेण निर्वर्तयिष्यमाणः पाणिग्रहः सूच्यते वैतालिकश्लोकेन ।

तृतीयः — सम्प्रति हि —

निद्रामुद्रितपद्मपत्रनयनामात्मम्भरिः पद्मिनी-
मुज्झित्वा विकसद्दलामलिगणो यामेति वामेतराम् ।
सापि श्वस्तदुपक्रमं न बहुशो दृष्ट्वापि बोद्धुं क्षमा
मुग्धा कैरविणी किमेतदथवा स्त्रीणां विवेकः कुतः ॥ २६ ॥

चतुर्थः — अस्मिन् हि समये —

रणद्घण्टैः कण्ठैरविरततटाघातजनित-
क्षतप्रान्तैर्दन्तैस्स्नपनघनशोभैरपघनैः ।
भ्रमद्भृङ्गासङ्गद्विगुणितपरीणाहशिरसः
स्थिरालानं स्थानं सपदि निविशन्ते तव गजाः ॥ २७ ॥

दशरथः -- अये कथमवसितो दिवसः । भगवंश्चारायण! कल्याणोदर्कमिमं भगवतो विश्वामित्रस्य व्यवसायमनुमन्यामहे । तद्गत्वा तत्रभवन्तम् अस्मदादरातिशयनिवेदनेन प्रोत्साहयतु भवान् ।

चारायणः -- तथास्तु । स्वस्ति भवते ।

(इत्युत्तिष्ठति ।)

---

१. 'रामेण निवर्तयि'. ख.
२. 'श्यामेति'. च.
३. 'कर्णैरविरत . ग.

दशरथः -- (उत्थाय दिशो विलोक्य) देवि! पश्य पश्य --

मा स्म द्राक्षीदुदेष्यन्नुडुभिरुडुपतिर्मत्प्रियामप्रियाय
प्रायस्तत्प्राणिनां या परपुरुषपरामृष्टिरन्तःपुराणाम् ।
इत्थं व्यञ्जन्नसूयामिव घटितपटीविभ्रमैरभ्रखण्डै-
श्चण्डांशुः प्रावृणीते मुखमपरहरित्सुभ्रुवो बभ्रुवर्णैः ॥२८॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

॥ इति प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(ततः प्रविशति मायावसुः ।)

मायावसुः — (सक्रोधं विहस्य)

आचार्यस्य श्वसदुपरतिः पाटनं ताटकायाः
प्रध्वंसश्च प्रतिभटजयख्यातबाहोः सुबाहोः ।
येनाकारि त्रयमिदमहो कुत्र स क्षत्रडिम्भो
मायाम्भोधिं मम परिहरन् प्राणितु प्राणिपाशः ॥ १ ॥

(विचिन्त्य) कथमद्यापि न प्रतिनिवर्तते विदेहान् प्रति प्रेषितः करम्भको नामास्मत्प्रणिधिः । (सवितर्कम्)

भीतः क्वापि[2] निलीयते नु सरलो[1] बालात् सुबाहुद्रुहः
किं वा तत्र नृपालये नृपभटैर्ज्ञातो[3] बलात्संयतः ।

---

१. 'क्रमशि'. ग.
२. 'पि मिलीयते'. च.
३. 'टैर्ज्ञात्वा'. घ.

गुप्तामाङ्गिरसेन किं नु मिथिलां नक्तञ्चरोच्चाटनै-
मन्त्रैस्तामवगाढुमक्षमतया राष्ट्राद् बहिर्भ्राम्यति ॥ २ ॥

(ततः प्रविशति करम्बकः ।)

करम्बकः — (सबहुमानम्)
(क) सुक्कं तं जइ कादुं तीरइ सीरद्धदओ सअं चेअ
जइ तं णिव्वट्टेउं पारइ सो चेअ दासरही ।
(परिक्रम्याग्रतोवलोक्य) अए अय्यमाआवसू मं एव्वं पडिवालअंतो इदो एव्व दिण्णदिट्ठी चिट्ठइ। (उपसृत्य) जेदु अय्यो ।

मायावसुः — भद्र करम्बक! किंनिमित्तोऽयमेतावतः कालस्य परिक्षेपः । अपि राक्षसोच्चाटनपटोः शतानन्दवटोर्मुखे पतितोऽसि ?

करम्बकः — (ख) णहि णहि सो खु दाणीं तहिं ण सण्णिहिदो ।

मायावसुः — क्व गतोऽसावृषिदुर्दुरूढः ?

करम्बकः — (ग) सो खु राहवपादपंसुप्फंसपरिमुक्कसावजन्तणं अत्तणो जणणिं अहल्लं अहिवादेदुं अस्सम किल गओ ।

(क) शुल्कं तद् यदि कर्तुं तीरयति सीरध्वजः स्वयमेव ।
यदि तन्निर्वर्तयितुं पारयति स एव दाशरथिः ।
अये आर्यमायावसुर्मामेवं प्रतिपालयन्नित एव दत्तदृष्टिस्तिष्ठति। जयत्वार्यः ।
(ख) नहि नहि स खल्विदानीं तत्र न सन्निहितः ।
(ग) स खलु राघवपादपांसुस्पर्शपरिमुक्तशापयन्त्रणामात्मनो जननी-
महल्यामभिवादयितुमाश्रमं किल गतः ।

१. 'अम्मो'. च.
२. 'पंसुफंस'. ख. घ.
३. 'णर्णीं'. ग.

मायावसुः — (साशङ्कं स्वगतम् ।)

यया पूर्वं भर्तुः सुरपतिदुरारम्भजनित-
प्रकोपाग्नेश्शापात् किल परिणतं स्थावरतया ।
अहल्यां तां कल्यामकृत यदि यः पादरजसा
स रामः को वा स्यादनृतमथवेदं प्रलपितम् ॥ ४ ॥

(प्रकाशम्) अथ रामलक्ष्मणाभ्यां सह जनकपुरमभ्यागतोऽस्मदमित्रो विश्वामित्रः ।

करम्भकः — (क) अह इम् ।

मायावसुः — तर्हि यथावृत्तमावेदय ।

करम्भकः — (ख) सुणादु भय्यो । अहं दाव अय्यस्स णिओएण मिहिळाणअरं पट्ठिओ रट्ठब्भासं पविट्ठो गोदमेण रक्खसणिक्कासअमंतगुत्तं सत्तंगरट्ठं पविसिउं अपारअंतो तदो णिव्वत्तिअ अय्यमारीअस्स अस्समं गत्तूण वुत्तंतमिणं णिवेदअंतो तेण समप्पिअं वेसंतरेण सव्वुद्देसप्पवेससंपादइत्तअं माआविरइदं एदं अंगुलीअअं गह्णिअ रिसिवेसधारी जणअरट्ठब्भंतरं जहिट्ठं पविट्ठोह्मि (इत्यंगुलीयकं दर्शयति ।)

(क) अथ किम् ।

(ख) शृणोत्वार्यः । अहं तावदार्यस्य नियोगेन मिथिलानगरं प्रस्थितो राष्ट्राभ्याशं प्रविष्टो गौतमेन राक्षसनिष्कासकमन्त्रगुप्तं सप्ताङ्गराष्ट्रं प्रवेष्टुमपारयन् ततो निवृत्य मारीचस्याश्रमं गत्वा वृत्तान्तमिमं निवेदयन् तेन समर्पितं वेषान्तरेण सर्वोद्देशप्रवेशसम्पादयितृकं मायाविरचितमेतदङ्गुलीयकं गृहीत्वा ऋषिवेषधारी जनकराष्ट्राभ्यन्तरं यथेष्टं प्रविष्टोऽस्मि ।

---

१. 'क्रमात्मगतम्'. ख. ग. घ. ङ. च.
२. 'तां जाल्यामकृत'. च.
३. 'त किल यः'. घ.
४. 'ओसंत'. च.

मायावसुः—(सहर्षं) भद्र[1] प्रयच्छेदम् (इत्यंगुलीयकमादाय स्वगतम् ।) साधु सम्पन्नम् । यतो दशरथवेषेण विदेहान् प्रतिष्ठासमानस्य मम निष्प्रत्यूहो भविष्यति नगरप्रवेशः । (प्रकाशम् ।) भद्र ततस्ततः ।

करम्भकः—(क) तदो तहिं मह आअंतुअत्तणेण विस्सद्धं सव्वप्पएससंचारसोक्खं संवुत्तम् ।

मायावसुः—ततस्ततः ।

करम्भकः—(ख) तदो कस्सिं पि पदेसे संचरंतेण मए पदुमपत्ताइं मुणाळवळआइं सेवाळकिसलआइं अ समाहरंती मंजरिआ णाम कापि चेडिआ दिट्ठा । पुच्छिदा अ सा कीणिमित्ताइं एदाइत्ति ।

मायावसुः—ततस्ततः ।

करम्भकः—(ग) तदो ताए पुणो पुणो णिब्बज्झमाणाए किं पि रहस्सं कहिअम् ।

मायावसुः—(सकौतुकम्) तत्किन्नाम ।

करम्भकः—(संस्कृतमाश्रित्य)

धीरोदात्तगुणस्य वीर्यजलधेर्विश्वैकरम्याकृते-
यूनः कस्यचिदुज्ज्वलं गुणगणं कर्णामृतं[2] शृण्वती ।

(क) ततस्तत्र ममागन्तुकत्वेन विस्रब्धं सर्वप्रदेशसञ्चारसौख्यं संवृत्तम् ।

(ख) ततः कस्मिन्नपि प्रदेशे सञ्चरता मया पद्मपत्राणि मृणालवलयानि शैवालकिसलयानि च समाहरन्ती मञ्जरिका नाम कापि चेटिका दृष्टा । पृष्टा च सा किन्निमित्तान्येतानीति ।

(ग) ततस्तया पुनःपुनर्निर्बध्यमानया किमपि रहस्यं कथितम् ।

---

१. 'स्यमान'. घ. ङ. च.

२. 'णं श्रोत्रामृत' घ.

निश्वासैरुपशोषिताधरदलैः[1] सन्तापमन्तर्गतं
व्यक्तं वक्ति विदेहराजतनया नक्तंदिवं जाग्रती[2] ॥५॥

(क)तण्णिमित्ता सिसिरोवआरसाहणसामग्गी[3] मए मग्गीअदि त्ति।

मायावसुः— (स्वगतम्) नियतमस्या महाराजरावणेनैव मर्दनसन्तापहेतुना[4] भवितव्यम्। कुतः —

प्रत्याकृष्टप्रतीपप्रतिभटपृतनामत्तमातङ्गपाली-
दन्तप्रान्ताभिघातस्फुटितविकटक्रूरदोरन्तरालात्।
दोर्दण्डोच्चण्डकण्डूविनयनरभसोत्पाटितस्फाटिकाद्रे-
र्धीरोदात्तत्वमन्यः क इव दशमुखादिद्धकीर्तेर्बिभर्ति ॥६॥

सर्वथा स्थान एव महाराजरावणस्य विदेहकन्यायामभिलाषो भविष्यति। यतः—

इतरेतराश्रयदृढानुरागयो-
र्यदि पुंस्त्रियोरुदभवत् समागमः।
तदवन्ध्ययोर्दिवसवन्ध्ययोरभूद्[5]
उपमानलाभसुभगो हि संङ्गमः ॥७॥

(प्रकाशम्।) भद्र! ततस्ततः।

करम्बकः— (ख) तदो मए रामलक्खणणिरिक्खणूसुएण कोसिअसीरद्धअपरप्परगुणप्पसंसामुहरं अत्थाणमण्डवं आहिंडंतेण ठिअम्।

(क) तन्निमित्ता शिशिरोपचारसाधनसामग्री मया मार्ग्यत इति।

(ख) ततो मया रामलक्ष्मणनिरीक्षणोत्सुकेन कौशिकसीरध्वजपरस्परगुणप्रशंसामुखरमास्थानमण्डपम् आहिण्डमानेन स्थितम्।

---

1. 'शोभिताध' ग.
2. 'वा जाग्र' ग.
3. 'साहणा साम'. ख. 'साहणे साम'. च.
4. 'दनहेतुना' घ. च.
5. 'नभाव' ग.

मायावसुः—ततस्ततः ।

करम्भकः—(क) तदो सुहसल्लावाणंतरं कोसिअमहेसिणा संकर-सरासणारोवणणिमित्तं खत्तिअकुमालो अणुप्पेसिओ ।

मायावसुः—(सोद्वेगमात्मगतम् ।) इदन्तु तस्मिन् क्षत्रियवटौ संभाव्यमेव ।

> सुबाहुबाहूरगवैनतेयः सबाहुरस्याशनिवत् कठोरः ।
> क्रमेत तत्राजगवेऽपि चापे क्रमेण सीताकरपल्लवे च ॥८॥

तदस्य धनुर्ग्रहणमेव प्रथमं प्रतिषेद्धव्यम् । (इति चिन्तां नाटयति ।)

करम्भकः—(ख) अय्य! किं चिंतीअदि[१] । जं कोसिअस्स ववसाअं जाणिअ जणअराएण तस्स धणुहस्स दुरारोवत्तणं समत्थअंतीहिं वाआहिं पडिसिद्धो खत्तिअकुमालस्स धणुग्गहणप्पत्थावो ।

मायावसुः—भद्र! नैतावता समाश्वासः । यतः स प्रकृतिवक्र-हृदयो विश्वामित्रः चित्रप्रकाराभिरुक्तिभिः सीरध्वजं व्यामोहयन्[३] राम-हतकेन धनुर्ग्राहयिष्यत्येव । तदलमिह कालक्षेपेण (तं हस्ते गृहीत्वा कर्णे एवमिव ।)

(क) ततः सुखसल्लापानन्तरं कौशिकमहर्षिणा शङ्करशरासनारोपणनिमित्तं क्षत्रियकुमारोऽनुप्रेषितः ।

(ख) आर्य! किं चिन्त्यते । यत् कौशिकस्य व्यवसायं ज्ञात्वा जनकराजेन तस्य धनुषो दुरारोपत्वं समर्थयन्तीभिर्वाग्भिः प्रतिषिद्धः क्षत्रियकुमारस्य धनुर्ग्रहण-प्रस्तावः ।

---

१. 'दि कोसिअ' ग. ङ.

२. 'णुग्गहस्स' घ.

३. 'जं विमोह' ख. ग. घ. ङ. च.

करम्बकः — (क) जं अय्यो आणवेदि । (निष्क्रान्तः ।)

मायावसुः — तदहमपि दशरथवेषेण मिथिलानगरीमतित्वरमनु-[1] प्रवेक्ष्यामि (इति निष्क्रान्तः ।)

॥ इति मिश्रविष्कम्भः ॥

(ततः प्रविशतो विश्वामित्रजनकौ रामलक्ष्मणौ च ।)

विश्वामित्रः — सखे सीरध्वज! कृतं सन्देहेन-

कामं भूमिभुजो भवन्तु विमुखाः कामद्रुहः कार्मुका-
 च्चित्रं तत्र किमस्ति नो पुनरमी मित्रान्ववायोद्भवाः ।
किं ब्रूमो विमृश स्वयं बत तथा गम्भीरमम्भोनिधे-
 रम्भः पातुमकुम्भजेन भुवने केन प्रभूभूयते[2] ॥ ९ ॥

जनकः — (स्वगतम् ।)

कथितमसकृदस्मै कार्मुकस्योत्कटत्वं
 त्रिपुरविजयिनोऽन्यैर्दुर्धरत्वं च भूयः ।
भुजविभवविभङ्गो भूभुजाञ्च प्रकाशं
 तदपि भगवतोऽस्य ग्रन्थितं नोद्यमेन ॥ १० ॥

तत्किमुत्तरमभिधास्यामि (इति व्याकुलस्तिष्ठति ।)

(क) यदार्य आज्ञापयति ।

---

१. 'मनतित्वरमनु' ख.

२. 'प्रभूय' क. । चपाठे प्रभूभूयते इति लिखित्वा कुण्डलिकायां प्रभूजायते इति लिखितम् ।

रामः — (राजानमवलोक्य स्वगतम् ।) आचार्यप्रत्ययवष्टब्धेऽप्यर्थे भृशं विचिकित्सत इवायं विदेहराजः । मम तु मनोरथस्य कीदृशी परिणतिः स्यात् ।

कोदण्डं शशिखण्डमण्डनभुजस्तम्भेन सम्भावितं
गम्भीरस्तनितातिभैरवरवज्यावल्लिकुम्भीनसम् ।
विश्वख्यातविचित्रविक्रममहाधानुष्कदुष्कर्षम-
प्युत्क्रष्टुं तरसानवाप्य ननु मे हस्तोऽयमुत्ताम्यति ॥ १० ॥

विश्वामित्रः — सखे! किं तूष्णीं तिष्ठसि ।

जनकः — भगवन्! भवदायत्तमुच्छ्वसितमप्यस्माकं तत्किमस्माभिरभिधातव्यम् ।

साम्राज्यस्थैः सवितृकुलजैः सार्धमृद्धानुभावै-
र्देवैश्वर्येष्वपि मघवता क्लृप्तभागोपभोगैः ।
सम्बन्धो नश्चिरमभिमतो राघवेणामुनासा-
वासाद्यश्चेद् भवति भवतः प्रेरणात्तत्प्रियं नः ॥ ११ ॥

लक्ष्मणः — (जनान्तिकम् ।) आर्य! दिष्ट्या वर्धसे । तवाभिलषितमनुसरति महाराजसीरध्वजस्यानुमोदः ।

विश्वामित्रः — (रामं प्रति) वत्स रामभद्र!

वाणीभूतपतङ्गवाहनभुजाकेयूरवज्राङ्कुर-
व्यालीढं दृढदीर्घपृष्ठनिबिडज्यायष्टिसंवेष्टितम् ।
मध्ये मुद्रितमद्रिजाकुचतटीपाटीरपङ्कस्पृशा
शम्भोरङ्गुलिभस्मना धनुरिदं सद्यः समारोपय ॥ १२ ॥

रामः — (सहर्षम्) यदादिशन्ति गुरवः (इत्युत्थाय प्रणमति ।)

---

१. 'आस्त' च.

(नेपथ्ये)

भो भो साहसिकस्य शासनगिरा गाधेस्तनूजन्मन-
श्चण्डीशस्य शरासनं नृपशिशो! मा स्म ग्रहीर्दुर्ग्रहम् ।
संरोद्धुं प्रियनन्दनो दशरथो राजा तवोपक्रमं
साकेतात् ससुमन्त्रयन्तृकरथारूढः स्वयं प्रस्थितः ॥ १२ ॥

(सर्वे सम्भ्रमं नाटयन्ति ।)

विश्वामित्रः —(सक्रोधम्) आः, कोऽयमस्मानपि साहसिक इत्यधिक्षिपति ।

एवं यः प्रलपति दारुणस्स यक्षो
रक्षो वा भवतु दिवस्पतिः स्वयं वा ।
प्रासिद्धप्रतिघदिधक्षितेन्द्रलोके
धक्ष्यामि प्रसभममुं तपःकृशानौ ॥ १३ ॥

जनकः— भगवन्! मृष्यतामसमीक्ष्यकारिणः कस्यचिदेष प्रलापः ।

अज्ञानामनुदर्कतर्कतरलाः स्वापप्रलापोपमा
वाचः सन्तु विकारयन्ति विदुषो नैतास्तितिक्षावतः ।
उल्लाघा हि भवादृशो यदरिषड्वर्गोपसर्गामय-
व्युच्छेदाय विवेकभेषजमहो पथ्यञ्जुषन्तेतराम् ॥ १४ ॥

अपि च —

निस्सङ्गस्य निषेधशेषवपुषो नित्यस्य निष्कर्मणः
शर्मैकानुभवस्य तत्त्वममलं प्रस्तौति या वस्तुनः ।
शान्तिक्षान्तिविरक्तिमुक्तिजननी विद्या तथापि सा
हृद्या हृद्यवभासते खलु मुने! कोपस्य कोऽयं क्रमः ॥ १५ ॥

---

१. 'प्रि. स्वप्रियमसुं' ग.
२. 'खिलं' ग.

विश्वामित्रः — (सप्रसादस्मितम्) सखे सीरध्वज! उपपन्नमिदम् । एष प्रकृतिस्थोऽस्मि ।

दुरुक्तं दुष्टानां कलुषयति चेतः सुमनसां
तटाकानामम्भस्तटरुहतरूणामिव रजः ।
मयाप्यस्माद्धेतोः किमपि विमनीभूतममुना
प्रसन्नश्चेदानीं तव तु सुमते सूनृतगिरा ॥ १६ ॥

रामः — (जनान्तिकम् ।) वत्स लक्ष्मण! सत्यमाह भगवानुपाध्यायः ।

प्राज्ञोऽसौ याज्ञवल्क्यादधिगतविमलब्रह्मविद्यो नरेन्द्रः
सिद्धान्तो यो विमृष्टः स्वयमुपनिषदा वक्ति तं व्यक्तमेव ।
वाचो यस्याधिकं नः प्रददति विनयं पापमुन्मूलयन्ति
द्वैतभ्रान्तिं लुनन्ति व्यवदधति तमः कुर्वते निर्वृतिश्च ॥ १७ ॥

लक्ष्मणः — (जनान्तिकम् ।) आर्य! एवमेतत् ।

भासामासां निगमवपुषां भर्तुरेकान्ततोऽसा-
वन्तेवासी सवितुरवितुर्विष्टपानां त्रयाणाम् ।
शास्त्राम्भोधिः शमदमनिधिः शाश्वतब्रह्मवादी
दिष्ट्या दृष्टो दिशति तमसः शैथिलीं मैथिलो नः ॥ १८ ॥

जनकः — भगवन् विश्वामित्र!

मार्ताण्डान्वयमण्डनो मखभुजां पत्युः सखा सम्मतो
दैत्यस्त्रीकुचपत्रभङ्गरचनाविद्वेषिदोर्विक्रमः ।
मूर्तो मे स मनोरथो दशरथो राजा विदेहानिमान्
अभ्यायाति यदि प्रियं प्रियमिदं सुप्रातमेतद्दिनम् ॥ १९ ॥

---

१. 'सप्रमोदस्मितम्' ख. ग. घ. ङ.

२. 'दो वक्ति यं' घ.

३. 'विमलं' ङ. 'विमलं (विनयं)' च.

४. 'शश्वा' ख.

रामः — (जनान्तिकम् ।) कुमार!

आयाति तात इति सम्प्रति शृण्वतोऽपि
नातिप्रसीदति मनो मम तत् किमेतत् ।

लक्ष्मणः — (जनान्तिकम्[1] ।) आर्य!

आचार्यदूषणपदेन सहोत्थितायामा-
काशवाचि विमतेरिति तर्कयामि ॥ २० ॥

विश्वामित्रः — सखे! कोऽत्र सन्देहः । पश्य—

उत्फुल्लन्ति सहस्रमप्यविकलं नेत्राणि वृत्रद्रुहो
हर्षादप्सरसो रसोत्तरतरं गायन्ति नृत्यन्ति च ।
सभ्याः सम्प्रति पालयन्ति समितौ सज्जीकृताभ्यर्हणा
यस्मिन्धोरभिसृत्वरे[2] स नृपतिः केषान्न तोषावहः ॥ २१ ॥

किन्तु चारायणमुखेनान्यथा प्रतिसन्दिष्टमप्यन्यथेदानीं उपक्रान्तं चेत्येतदसमञ्जसमिव पश्यामि ।

य एव येनैव यदैव चोदितः
शरासनारोपणपूर्वको विधिः ।
स एव तेनैव तदैव बाधितो
धिगेतदेतस्य न जातु शोभते ॥ २२ ॥

रामः — (जनान्तिकम्) वत्स! लक्ष्मण चिराभिलषितलब्धप्रायस्य शरासनारोपणमहोत्सवस्याकस्मिकप्रत्यूहेन दूयते मे हृदयम् ।

लक्ष्मणः — (जनान्तिकम् ।) न केवलमस्यैव (इत्यर्धोक्तौ हसति ।)

रामः — (सरोषमिव) कस्य पुनरन्यस्यापि ?

---

१. 'कम् । आचार्य' ग.

२. 'भिसत्वरे' ख. 'भिसत्वरं' च.

लक्ष्मणः — यन्निमित्तोऽसौ तस्यापि ।

रामः — (स्वगतम् ।) सम्यगनेनोपलक्षितम् ।

आसक्तामजगवकार्मुके कठोरे
वैदेह्याः किसलयकोमले च पाणौ ।
आदित्साम्मम खलु मन्मथार्तिहेता-
वारुन्धे नियतिरिवाशरीरिणी वाक् ॥ २३ ॥

(प्रविश्य)

दौवारिकः — जयतु महाराजः । एष खलु महाराजदशरथ-स्सुमन्त्रसारथिना रथेन प्रतिहारभूमिमलङ्करोति ।

जनकः — (रामलक्ष्मणाभ्यां सहोत्थाय) भगवन्! आश्रमपदादद्यापि[1] न प्रत्यागतो भगवानाङ्गिरसः, तद्वयमेवाभिगम्य श्रौतेन विधिनाभ्यर्हया-मस्तत्र भवन्तं वसुन्धरापुरन्दरमैन्दुमतेयम् ।

विश्वामित्रः — उपपन्नमिदम्[2] ।

(सर्वे परिक्रामन्ति ।)

(ततः प्रविशति रथेन दशरथवेषो मायावसुः सुमन्त्रवेषः करम्बकश्च ।)

करम्बकः — (क) (मायावसुं निर्वर्ण्य स्वगतम् ।) अच्छेरं[3] अच्छेरम् । अहो से पडिहाविसेसो । एह्निं चेअ मए से जहरूवो सच्चदसरहो कहिओ तहरूवो ब्बिअ एसो पि खु मायादसरहो जाओ ।

(क) आश्चर्यमाश्चर्यम् । अहो अस्य प्रतिभाविशेषः । इदानीमेव मयास्मै यथा-रूपः सत्यदशरथः कथितः तथारूप एवैषोऽपि खलु मायादशरथो जातः ।

---

१. 'पि मागतो' ख. घ.

२. 'म् । जनकः – (ताभ्यां सह परिक्रामति ।)' ख. घ.

३. 'रं अहो' घ.

मायावसुः — (सामर्षमात्मगतम्।)

यद्बाणेन पलायिपि प्रथमतस्सिद्धाश्रमादश्रमं
भ्रात्रा सार्धममुं निहन्मि कुहचिल्लब्धक्षणो लक्ष्मणम्।
एतद्दाशरथं यदर्थमधुना रूपं गृहीतं मया।
तातस्नेहवशादमू मम रथं निश्शङ्कमारोक्ष्यतः ॥ २४॥

(पुरोऽवलोक्य) अये! अयमभ्यागच्छति ताभ्यां क्षत्रियवटुभ्यां सह सीरध्वजः। (इत्युभौ रथादवतरतः।)

जनकः — (उपसृत्य) अपि स्वागतं प्रियसुहृदो महाराजदशरथस्य। (इत इतो भवानिति हस्ते गृहीत्वा परिक्रामति।)

रामलक्ष्मणावुपसृत्य — इमावावां। रामलक्ष्मणावभिवादयावहे (इति मायावसोः पादयोः पततः।)

मायावसुः — (जनान्तिकम्।) भद्र करम्भक! पश्येदम्।

आभ्यां निपातिताः पूर्वं बन्धवो मे निशाचराः।
पादयोः पातितावेतौ स्थान एव मयाधुना ॥ २५॥

करम्भकः (जनान्तिकम्।) (क) दाणिं जीवंता एव्व णिवाडिआ। क्रमेण मरंता एव्व णिवाडिआ होस्संति।

मायावसुः (हर्षबाष्पस्तम्भनाटितकेन) वत्सौ चिरजीविनौ भूयास्तम्।

(क) इदानीं जीवन्तावेव निपातितौ। क्रमेण म्रियमाणावेव निपातितौ भविष्यतः।

---

१. 'त्य तात इमा' ख. ग. घ. ङ. च.

२. 'ता णिवा' घ. च.

३. 'सुः – (प्रकाशम्।) हर्ष' ख. ग. च।

करम्बकः — (स्वगतम् ।) (क) ववसाअप्पडिऊला एसा आसी । (प्रकाशम् ।) जयतां कुमारौ ।

मायावसुः — (उभौ सस्नेहरोमाञ्चनाटितकेनालिङ्ग्य परिक्रामति ।)

जनकः — इमां सन्निहितसिंहासनामास्थानमण्डपिकामलङ्करोतु महाभागः ।

मायावसुः — बाढम् । (मण्डपिकामारुह्य विश्वामित्रं दृष्ट्वा सरोषावहित्थं स्वगतम्) अयमसौ वटुः सर्वस्यास्य दुष्प्रमेयस्य प्रवर्तयिता कुशिकनन्दनः । का गतिः । (उपेत्य) भगवन् विश्वामित्र! अयमैन्दुमतेयः पङ्क्तिरथोऽभिवादयते ।

विश्वामित्रः — स्वस्ति भवते । उपविशतु भवान् ।

(सर्वे यथोचितमुपविशन्ति ।)

रामः — तात सुमन्त्र! अप्यनामयमायुष्मतोर्भरतशत्रुघ्नयोस्सपरिवारस्य मातृजनस्य च ?

करम्बकः — (स्वगतम् ।) (ख) को एत्थ भरहादिणो जाणादि (प्रकाशम् ।) अथ किम् ।

जनकः — भगवन् विश्वामित्र !

अभेद्यो धैर्याद्यैरपि हि बहुभिस्साधकतमै-
रपत्यस्नेहाख्यो जयति दृढबन्धस्तनुभृताम् ।
स तादृग्गम्भीरप्रकृतिरपि येन श्रममिम-
म्महीयांसं नीतस्स्वयमयमिदानीं दशरथः ॥ २६ ॥

(क) व्यवसायप्रतिकूलैषाशीः ।

(ख) कोऽत्र भरतादीन् जानाति ।

करम्बकः — महाराज! सत्यमिदमनमत्यतादुःखमतिचिरमनुभूय देवादिदानीमधिगतद्वित्रापत्योऽयं महाराज एव जानात्यपत्यविश्लेषवैक्लव्यम्। अन्यच्च -

इदं पूर्वापातं विरहमसहं पूर्वजनुषो-
रवाप्तौ तावन्यौ सुचिरमनयोर्द्वाववरजौ।
न नक्तं निद्रातो नयनसलिलस्नातवपुषौ
न चाश्नीतः स्वेच्छाविहरणविधौ का खलु कथा ॥ २७ ॥

अपि च -

आकर्ण्यान्तःपुराणामुपवनवसतिर्निक्कमुत्स्वापयन्ती
रामोऽसौ लक्ष्मणोऽसाविति मधुमधुराण्यक्षराण्युत्क्षरन्ती।
पाली केलीशुकानां सुखयति मुखतो नामवर्णोपलम्भा-
त्पश्चादिच्छाविभङ्गाद्व्यथयति च वृथा विस्मितानस्मदादीन् ॥२८॥

रामः — (जनान्तिकम्।) कुमार! कष्टमेवमवस्थो भवत्यायोध्यकोऽस्मद्बन्धुवर्ग इत्यत्र किं प्रतिपत्तव्यम्।

लक्ष्मणः — (जनान्तिकम्।) आर्य! किमन्यत् प्रतिपत्तव्यम्। सूर्यविरहविजृम्भितं तमः सूर्योदय एवापयाति।

मायावसुः — अयमेकोऽस्मदागमनहेतुः।

---

१. 'मनुगत' ग.
२. 'त्यनपत्य' ग.
३. 'र्ती' ङ
४. 'मधुरतराण्यक्ष' घ.
५. 'त्क्षिपन्ती' ख. ङ.
६. 'स्मृताद्' ग.
७. 'वक्तव्यम्' घ. ङ.
८. 'वक्त' घ. ङ.
९. 'रामः' ङ.

जनकः — अथ द्वितीयः कः ?

मायावसुः — (करम्भकमवलोकयति)

करम्भकः — महाराज! कोऽत्र निह्नवः ।

जनकनृपतेर्जामातृत्वे समस्तमहीभृतां
विहितविविधापत्कं शुल्कं किलाजगवं धनुः ।
इति निशमिते भ्रातस्सीताविवाहमहापदो
व्यपगमयितुं पुत्रावत्रागतोऽयमजात्मजः ॥ २९ ॥

विश्वामित्रः — (मायावसुं सावधानं निर्वर्ण्य स्वगतम् ।) कथमन्यादृश इव दृश्यते पङ्क्तिरथः ।

धैर्यक्षान्तिगभीरिमप्रभृतिभिस्स्वाभाविकैरप्यहो
सम्प्रत्येष समुज्झितः किमु गुणैस्सर्वप्रियंभावुकैः ।
वारीसंकटदीर्घकालनियमक्लिष्टो यथा वारणो
गम्यः केवलमाकृतिस्थितिवशादेवैष सोऽसाविति ॥ ३० ॥

(जनकं प्रति जनान्तिकम् ।) सखे! किं श्रुतमैन्दुमतेयस्य स्वयमभ्यागमनप्रयोजनम् ।

जनकः — (जनान्तिकम् ।) भगवन्! श्रुतं, किन्तु नोपपद्यत इवायं प्रस्तावः ।

विश्वामित्रः — एवमेव ममापि प्रतिभाति । कुतः —

पृथग्जन इवेदृशं स खलु तादृशो राजरा-
डतिप्रलघुकं वचो वदतु वादयेद्वा कथम् ।

१. 'श्कमजात्मजः' ग.
२. 'लक्ष्यते' ग.
३. 'प्रकृतिभिः' क.

यदाह यदुदीरितं गरिम चारु चारायणो
विसंवदति तेन हि स्वयमुदीरितं तद्वचः ॥ ३१ ॥

रामः — (जनान्तिकम् ।) कुमार! यथा तातदुपाध्यायजनकौ मिथो गूढमभिदधाते तथा तर्कयामि न खल्वनयोरस्य तातस्य तातसुमन्त्रस्य च वचांस्युपपद्यन्त इति ।

लक्ष्मणः — (जनान्तिकम् ।) आर्य! एवमेतत् ।

दाक्षिण्यभाजाम्महताम्मुखेभ्यो
न जातु निर्यान्ति वचांसि तानि ।
श्रुतानि यानि व्यथयन्ति सद्यः
श्रोतुश्श्रुती शल्यवदुत्कटानि ॥ ३२ ॥

अतः खलु —

उन्मादो वा प्रमादो वा बाधते तातसारथी ।
येन प्रस्थापितावेतौ येनैवमभिधापितौ ॥ ३३ ॥

मायावसुः — भगवन्विश्वामित्र! अपि भवतस्सप्ततन्तुरद्यापि न सम्पूर्णः, येनाधुनापि न प्रतिप्रस्थापितौ कुमारौ । न च कोऽपि वार्ताहरोऽप्यनुप्रेषितः ।

विश्वामित्रः — (सहासम् ।) किमुन्मत्त इति भवान् यतश्चारायणमुखेन यन्मया सन्दिष्टं यच्च भवतापि प्रतिसन्दिष्टं तदुभयमपि विस्मृतमासीत् ।

मायावसुः — (सभयं जनान्तिकम् ।) भद्र करम्बक! कश्चारायणो नाम । यं किलासौ पूर्वमनुप्रेषितवान् ।

करम्बकः — (जनान्तिकम्) (क) अय्य! अहं ण आणामि ।

(क) आर्य अहं न जानामि ।

---

१. 'गिरमचारु' घ.

२. 'स्वायं' ग.

तस्स संदेसहरत्तणवुत्तंतोऽपि ण सुदो अओज्झाणअरम्मि । ता एत्थ किं उत्तरं मंतिदव्वं ।

मायावसुः—(विचार्य भवतु दृष्टम् ।) (प्रकाशम् ।) भगवन् नायमुन्मत्तप्रलापः । अस्ति हि रात्रिञ्चरो मायावसुर्नाम मायाप्रगल्भो मारीचशिष्यः ।

विश्वामित्रः—अस्ति खलु, स तु तदानीं कुमारलक्ष्मणेन समराङ्गणाद्विद्रावितः । किन्तस्य ?

मायावसुः—स एवायोध्यावृत्तान्तमवगन्तुं चारायणवेषमवलम्ब्य तत्रागतः स्यादित्यद्याप्यभिशङ्कते खल्वयं तपस्वी सुमन्त्रः । अस्येऽमामभिशङ्कामपनेतुकामेन मयैवमनुयुक्तो भवान् ।

विश्वामित्रः—भवतु नामैवम् ।

जनकः—तर्हि रामभद्रस्य धनुर्ग्रहणप्रतिषेधोऽपि स्वभावभीरोरस्य सुमन्त्रस्य कृत एव स्यात् ।

मायावसुः—(सस्मितम् ।) राजन्! अलमाक्षेपेण ।

क्वेदं धनुस्त्रिपुरवैरवधूकपोल-
काश्मीरपत्रलिपिकुण्डलनानिवेशः[1] ।
क्वायं च कोमलमृणालगुणानुकल्पो
मत्पुत्रकस्य पुनरस्य भुजप्रवालः ॥ ३४ ॥

तस्य सन्देशहरत्ववृत्तान्तोऽपि न श्रुतोऽयोध्यानगरे तदत्र किमुत्तरं मन्त्रयितव्यम् ।

---

१. 'की उत्त' ख. ग. घ. ङ.
२. 'विवेशः' ग.

(किञ्चिद्विहस्य) सौहार्दाद् ब्रवीमि ।

निक्षेपद्रविणावलीमिव भुवा गर्भे धृतां जानकीं
सर्पेणेव दुरासदेन धनुषा शुल्केन संरक्षिताम् ।
प्राणेषु स्पृहयालुरत्र कतमः पाणौ करिष्यत्यहो
राजन्नप्रसमीक्ष्यकारिषु भवानग्रेसरो वर्तते ॥३५॥

जनकः — (विश्वामित्रं प्रति जनान्तिकम् ।)

महीतलकलाभुजोऽप्यहह नैवमाचक्षते
जगत्त्रितयशासिनो मनुकुलोद्भवाः किं पुनः ।

विश्वामित्रः — (जनान्तिकम् ।)

अयं न हि महीपतिर्दशरथस्तथाविग्रहो
निकामनिरवग्रहो नियतमेष नक्तञ्चरः ॥३६॥

करम्बकः — (जनान्तिकम् ।) (क) अय्य, जाव रक्खसुच्चाडणपट्ठु सदाणंदवट्टू ण समागमिस्सदि ताव इमे खत्तिअकुमाले रहं आरोविअ सिग्घं इदो णिक्कमिस्सामो ।

मायावसुः — (जनान्तिकम् ।) भद्र! मा भैषीः । नन्वाचार्यदत्त-मङ्गुलीयकमस्त्येव ।

(प्रविश्य)

प्रतीहारी — (ख) जेदु महाराओ ।

जनकः — कङ्कोलिके, किमागमनप्रयोजनम् ?

(क) आर्य, यावत् राक्षसोच्चाटनपटुश्शतानन्दवटुर्न समागमिष्यति ताव-दिमौ क्षत्रियकुमारौ रथमारोप्य शीघ्रमितो निष्क्रमिष्यावः ।

(ख) जयतु महाराजः ।

प्रतीहारी — (क) महाराअ! एसो खु भअवंतो सदाणंदमहेसी सपरिवारेण महाराअदसरहेण सह णअरब्भासं आअदो ।

(सर्वे विस्मयं रूपयन्ति ।)

करम्बकः — (जनान्तिकम्) (ख) हन्त![1] मुसिदं ह्म ।

मायावसुः — (जनान्तिकम्) भद्र! स्थिरो भव ।

जनकः — सखे दशरथ! किमियमभिदधाति[2] ?

मायावसुः — एष खलु भगवान् विश्वामित्रो जानाति ।

जनकः — तत्कथमिव ?

मायावसुः —

अनेन यज्ञे मम पुत्रकाभ्यां निघातितानां रजनीचराणाम् ।
मायाविनो बन्धुजना मदान्धा मनुष्यवेषेण समापतन्ति ॥ ३७ ॥

अयि वत्सौ रामलक्ष्मणौ! यावन्मायादशरथप्रभृतयो न परापतेयुस्तावदयोध्यां प्रति प्रस्थास्यामहे ।

(उभौ विश्वामित्रमवलोकयतः ।)

विश्वामित्रः — वत्सौ! मुहूर्तमनुपालयतं शतानन्दागमनम् ।

उभौ — यदादिशन्ति गुरवः ।

(ततः प्रविशति शतानन्दः ।)

(क) महाराज! एष खलु भगवान् शतानन्दमहर्षिः सपरिवारेण महाराजदशरथेन सह नगराभ्याशमागतः ।

(ख) हन्त! मुषितौ स्वः ।

---

१. 'हं मुसिदह्म' ख.

२. 'मिदम' घ.

शतानन्दः — (परिक्रामन्नात्मगतम्)

वैदेहाय महीभुजेऽपि यदनावेद्यैव[1] साकेततः
सस्त्रीपुत्रपुरोहितो दशरथो राजा मयानीयत ।
तन्मे साहसिकत्वमप्यतितरां दोषाय न स्यादिदं
रामश्चेदपि[2] नाम सज्यमकृत त्रैयम्बकं तद्धनुः ॥ ३८ ॥

(अग्रतोऽवलोक्य सविस्मयम्) अये! किमिदं यन्मया प्रतिहारभूमिपर्यन्तमणिवेदिकायामध्वपरिश्रमापनोदार्थमुपवेशितोऽपि तत्र भवान् दशरथः सुमन्त्रेण महास्थानमण्डपिकामध्यास्ते । केन पथायमस्मत्प्रवेशात्पूर्वमत्रागतवान् । (पृष्ठतोऽवलोक्य) अथ तत्रोपवेशितस्तत्रैवास्ते दशरथः । तत्को नु खल्वयं भवेत् । भवतु विश्वामित्रजनकावुपसरामः । ततस्सर्वमवगन्तव्यम् । (उपसृत्य) स्वस्ति जनकराजाय । अपि कुशलमये भगवन् कुशिकनन्दन! ।

जनकः — (उत्थाय) भगवन्नभिवादये । इहोपविश्यताम् ।

शतानन्दः — बाढम् । (उपविशति ।)

मायावसुः — (उत्थाय) भगवन्नेष पङ्क्तिरथः प्रणमति ।

शतानन्दः — स्वस्ति भवते । उपविशतु भवान् ।

मायावसुः — (जनान्तिकम्) भद्र[3] करम्बक! पश्याङ्गुलीयकस्य[4] प्रभावम् । यदस्मद्द्रोहजागरूकोऽपि नायमवगच्छति नस्तत्त्वम् । (इत्युपविशति ।) ।[5]

---

१. 'नालोच्यैव' घ.
२. 'श्चेद्यदि नाम' घ.
३. 'द्र, पश्याङ्गु' ग. ङ.
४. 'यस्य' ग.
५. यदस्मद्द्रोहजागरूकोऽपि नावगच्छति नस्तत्त्वम् । ख.
यदयमस्मद्द्रोहजागरूकोऽपि नावगच्छति नस्तत्त्वम् । ग. घ.

शतानन्दः — (जनकं प्रति जनान्तिकम्) राजन्! कावेतौ?

जनकः — (जनान्तिकम्) ननु दशरथसुमन्त्रौ ।

शतानन्दः — (विहस्य) सुमन्त्रसारथिः सदारपुत्रपुरोहितस्तत्र भवान् दशरथः प्रतिहारभूमिपर्यन्तमणिवेदिकायामस्माभिरानीयोपवेशितः ।

अरविन्दरेणुमकरन्दतुन्दिलैः
शमितश्रमोऽपि सरसीसमीरणैः ।
सगुणीकृतेश्वरशरासनं सुतं
श्रवसाभिपातुमभिलष्य वर्तते ॥ ३९ ॥

अपि समारोपितममुना रामभद्रेण शङ्करशरासनम्?

जनकः — नहि नहि ।

शतानन्दः — तत्कस्य हेतोः?

जनकः — अमुना प्रथमप्रविष्टेन दशरथेन प्रतिषिद्धत्वात् ।

शतानन्दः — व्यक्तमसौ कश्चिद्राक्षस एव ।

जनकः — इदन्तु पूर्वमेवोक्तं भगवता विश्वामित्रेण । तत्किमिदानीं कर्तव्यम्?

शतानन्दः — किमन्यत्कर्तव्यम् । धनुस्तावदारोपयतु रामभद्रः ।

जनकः — भगवन् विश्वामित्र! धनुरारोपणायादिश्यतां रामभद्रः ।

विश्वामित्रः — (सप्रमोदम्) एवमस्तु (रामं प्रति)वत्स पूर्वोक्तमनुतिष्ठ ।

रामः — यदाज्ञापयन्ति गुरवः (इति प्रणम्य निष्क्रान्तः।)।

करम्बकः — (सर्वान्निर्वर्ण्य जनान्तिकम्) (क) अय्य! इदो वरं अह्मेहिं ण जुत्तमिह ट्ठाउं जदो गहिदत्था विअ एदे परप्परं मंतअन्ति[1]। आरोविएण धनुहेण सुबाहुसत्तू अच्चाहिदं खु जइ काहिइ का गई णो। जीवामहे जइ पुणो वि विणासएउं पारह्म वेरिउलं। एत्थ मुहा मरामो।

मायावसुः — (जनान्तिकम्) इदमाशङ्कनीयमेव। (प्रकाशम्) राजन् सीरध्वज! उभयमिदमुपपन्नम्।

अस्माननादृत्य यदर्भकोऽसौ पुरारिचापग्रहणे नियुक्तः।
अयं पुनर्यच्च दुरासदेऽर्थे स्वयं प्रवृत्तो बत दुर्विनीतः ॥ ४० ॥

जनकः — धिङ्मूर्ख! निशाचरेषु कस्यादरः।

मायावसुः — (सोत्प्रासम्) अयि राजर्षे!

काचं स्वर्णमवैतु काममबुधः स्वर्णञ्च काचं तथा
विद्वद्भिस्तु कथं[2] विवेकसरणौ पङ्गुत्वमङ्गीकृतम्।

(क) आर्य! इतः परमावाभ्यां न युक्तमिह स्थातुं यतो गृहीतार्था इवैते परस्परं मन्त्रयन्ते। आरोपितेन धनुषा सुबाहुशत्रुरत्याहितं खलु यदि करिष्यति का गतिर्नौ। जीवावो यदि पुनरपि विनाशयितुं पारयावो वैरिकुलम्। अत्र मुधा म्रियावहे।

---

१. 'न्ति। अण्णं च। आरोविएण' क.

२. 'तथा विवेक' ग.

मिथ्यातथ्यमिथोविशेषविषयज्ञाने विमूढो[1] भवान्
प्राज्ञं सम्प्रति याज्ञवल्क्यमपि मा लज्जाम्बुधौ मज्जयेत् ॥ ४१ ॥

(नैपथ्ये)

आश्चर्यमाश्चर्यम् !

निर्दग्धुस्त्रिसृणां पुरां करतले वामे चिराय स्थितं
निश्शेषत्रिदशोर्जितार्जितवपुस्तत्तावदुग्रं धनुः ।
मौर्वीसङ्घटिताटनिक्रमनतिप्रव्यक्तपर्वोत्करं
कुर्वाणेन कुमारकेण तरसा कृष्टश्च भग्नं च तत् ॥ ४२ ॥

अपि च

घनस्तनितभैरवध्वनितपूर्णकर्णोदर-
भ्रमत्तरसुरद्विपप्रखरफीत्कृतोड्डामरम्[2] ।
विनिद्रितभयद्रवन्मुखरकण्ठकण्ठीरवं
जगत्त्रयभयानकं जयति भग्नमैशं धनुः ॥ ४३ ॥

(सर्वे हर्षं रूपयन्ति ।)

मायावसुः — (सभयमात्मगतम्) अहो ! महासत्त्वोऽयं मनुष्यडिम्भः ।

करम्बकः— (स्वगतम्) (क) मए पुढमं ब्विअ उप्पेक्खिदओ एस अत्थो ।

(क) मया प्रथममेवोत्प्रेक्षित एषोऽर्थः ।

---

१. 'विमुह्यन् भवान' ग. ङ.

२. 'फीत्कृतोड्डा' ख. 'रर्घात्कृतोड्डा' घ. 'रहीत्कृतोड्डा' ङ.

मायावसुः— (विचिन्त्य जनान्तिकम्) भद्र! जातं जातमवलम्बनम्। पश्य-

छित्वा सत्वरमर्जुनद्रुमभुजाशाखासहस्रं पुन-
श्चक्रे येन कुठारपावकहुतक्षत्रं धरित्रीतलम्।
सोऽयं दारुणवैरिदारणरसप्रारब्धवीरव्रतः
सन्दृप्तः सहते कथं गुरुधनुर्भङ्गं भृगूणां पतिः॥ ४४॥

तदेनं मुनिवेषेणोपगम्य प्रोत्साहयावः।
घातयित्वा मुनीन्द्रेण मुनिशिष्यौ नराभकौ।
जानकीं हारयिष्यावो रावणेनाविलम्बितम्॥ ४५॥

(इति करम्बकेण सह निष्क्रान्तः।)

जनकः — हन्त! निर्मक्षिकं जातम्। तद्वयमपि खण्डितचण्डीशकोदण्डदण्डं[1] रामभद्रमनुमान्य महाराजदशरथस्य प्रियनिवेदका भविष्यामः।

विश्वामित्रशतानन्दौ — बाढं प्रथमः कल्पः।

(इति परिक्रम्य निष्क्रान्ताः सर्वे।)

॥ इति द्वितीयोऽङ्कः समाप्तः॥

---

१. 'ण्डं रामभ' ख.

अथ तृतीयोऽङ्कः ।

(ततः प्रविशतश्चेट्यौ ।)

एका — (पृष्ठतोऽवलोक्य) (क) हला मञ्जरिए! कीस तुवं महुमअविहुहला विय पए पए खलन्ती मंदसंचारिणीं पि मं अणुगन्तुं ण पारेसि । णं अह्माणं दुवेणं पि साहारणो एव्व विवाहमहूसवप्पउत्तो रत्तिसु पआअरो ।

मञ्जरिका[1] — (ख) हला मञ्जूसिए, किं साहारणोत्ति भणासि जं अणन्तराइक्कन्दाअं रअणीअं कोच्चि वि तुह णामं पि ण सुदम् । कहिं पि ओदारिअभारा विअ वलीवद्दिआ एत्तिअं वेलं पसुविअ सम्पइ मं उपालम्भसित्ति अहो दे णिल्लज्जदा ।

मञ्जूषिका — (विहस्य) (ग) अह काए एत्तिअं वेलं पसुत्तम् ?

मञ्जरिका — (घ) णं तुए ।

मञ्जूषिका — (ङ) परमत्थं अआणन्ती मा एव्वं पलव ।

मञ्जरिका — (च) अह हिज्जो तुवं कहिं गआ सि ?

(क) हला मञ्जरिके, कस्मात्त्वं मधुमदविह्वलेव पदे पदे स्खलन्ती मन्दसञ्चारिणीमपि मामनुगन्तुं न पारयसि । नन्वावयोर्द्वयोरपि साधारण एव विवाहमहोत्सवप्रवृत्तो रात्रिषु प्रजागरः ।

(ख) हला मञ्जूषिके, किं साधारण इति भणसि यदनन्तरातिक्रान्तायां रजन्यां (कुत्रापि ?) तव नामापि न श्रुतम् । क्वाप्यवतारितभारेव वलीवर्दिका एतावतीं वेलां प्रसुप्य सम्प्रति मामुपालभस इत्यहो ते निर्लज्जता ।

(ग) अथ कयैतावतीं वेलां प्रसुप्तम् ?

(घ) ननु त्वया ।

(ङ) परमार्थमजानती मैवं प्रलप ।

(च) अथ ह्यस्त्वं क्व गतासि ?

---

1. 'का — मञ्जूसिए' ग.

मञ्जूषिका — (क) मञ्जरिए, सुणाहि दाव। हिज्जो खु पओसोवक्कमे भट्टिणा जुवराअकुसद्धएण अहं विअणे हक्कारिऊण एव्वं भणिता।

मञ्जरिका — (सकौतुकम्) (ख) हला किं[1] विअ।

मञ्जूषिका — (ग) भद्दे मञ्जूसिए अय्यसीरद्धअस्स दुहिआओ सीउम्मिलाओ रामलक्खणाणं पडिवादिआओ। ता मह वि दुहिआओ मण्डवीसुदकित्तीओ भरहसत्तुग्घाणं पडिवादेदुं इच्छामि। तण्णिमित्तं तुवं तुरिअं गत्तूण अय्यसीरद्धयं एत्थ विसए गहिदत्थं कादूण[2] तम्मुहेण महाराअदसरहं कोसल्लादि से दारत्तअं च अब्भणुण्णाविअ सव्वे वि दे समाणेहित्ति।

मञ्जरिका — (ग) तदो तदो।

मञ्जूषिका — (घ) तदो मये तहत्ति भणिअ महाराअसीरद्धअं सउडुम्बावच्चं महाराअदसरहं च समाहूअ कण्णाघरब्भन्तरं अब्भागअम्।

(क) मञ्जरिके, शृणु तावत्। ह्यः खलु प्रदोषोपक्रमे भर्त्रा युवराजकुशध्वजेनाहं विजने आहूयैवं भणिता।

(ख) हला, किमिव।

(ग) भद्रे मञ्जूषिके, आर्यसीरध्वजस्य दुहितरौ सीतोर्मिले रामलक्ष्मणाभ्यां प्रतिपादिते। तन्ममापि दुहितरौ माण्डवीश्रुतकीर्ती भरतशत्रुघ्नाभ्यां प्रतिपादयितुमिच्छामि। तन्निमित्तं त्वं त्वरितं गत्वार्यसीरध्वजमत्र विषये गृहीतार्थं कृत्वा तन्मुखेन महाराजदशरथं कौसल्याद्यस्य दारत्रयञ्चाभ्यनुज्ञाप्य सर्वानपि तान् समानयेति।

(ग) ततस्ततः।

(घ) ततो मया तथेति भणित्वा महाराजसीरध्वजं सकुटुम्बापत्यं महाराजदशरथञ्च समाहूय कन्यागृहाभ्यन्तरमभ्यागतम्।

---

1. 'कहं विअ' घ.
2. 'कदुअ' ग. घ.

मञ्जरिका — (क) हला, अवि संवुत्तो भट्टिदारिआणं मण्डवीसुदकित्तीणं पि विवाहमहूसवो ?

मञ्जूषिका — (ख) अह इम् ।

मञ्जरिका — (सहर्षम्) (ग) दिट्ठिआ दिण्णाणं पि राअकण्णआणं जहपुरुवं एक्कघरम्मि सहावट्ठाणसुहं संवुत्तम् ।

मञ्जूषिका[1] — (घ) एव्वं एदम् । ताओ खु अणुरूवभत्तुलाहादो[2] सोहग्गादिसअं अणुहोन्ति । तह हि—

सीआ वीआव लच्छी जह णवमिहआसामले रामअंदे
संसत्ता उम्मिला सा तह सुहअमहालक्खणे लक्खणे वि ।
एव्वं भव्वाणुभावे रमइ खु भरहे मण्डवी पुण्णभाआ
सत्तुग्घे सत्तभावा विलसइ सुदकित्ती अ कित्तीअ पत्तम् ॥ १ ॥

(क) हला, अपि संवृत्तो भर्तृदारिकयोर्माण्डवीश्रुतकीर्त्योरपि विवाहमहोत्सवः ?

(ख) अथ किम् ।

(ग) दिष्ट्या दत्तानामपि राजकन्यकानां यथापूर्वमेकगृहे सहावस्थानसुखं संवृत्तम् ।

(घ) एवमेतत् । ताः खलु अनुरूपभर्तृलाभात् सौभाग्यातिशयमनुभवन्ति ।

तथा हि—

सीता द्वितीयेव लक्ष्मीर्यथा नवमेघश्यामले रामचन्द्रे
संसक्तोर्मिला सा तथा सुभगमहालक्षणे लक्ष्मणेऽपि ।
एवं भव्यानुभावे रमते खलु भरते माण्डवी पूर्णभाग्या
शत्रुघ्ने सक्तभावा विलसति श्रुतकीर्तिश्च कीर्तेः पात्रम् ॥ १ ॥

---

१. का — हला, एव्वं. क.

२. लाहेण. क.

मञ्जरिका — (क) मञ्जूसिए, सुलहप्पच्चूहो वि समीहिदत्थो पच्चूहं विणा पडिवण्णो त्ति संपअं भणिदव्वम् ।

(नैपथ्ये)

भो भो ! निवेद्यतां निवेद्यतां महाराजसीरध्वजाय ।

कठोरास्थिग्रन्थिस्थपुटनृपवक्षःस्थलवल-
त्कुठारो निःक्षत्रामकृत बहुधा यो वसुमतीम् ।
उदञ्चत्क्रौञ्चाद्रिच्छिदुरशरहेलाजितगुहो
महात्मा सक्रोधः सपदि समुपायाति स मुनिः ॥ २ ॥

उभे — (श्रुत्वा सत्रासम्) (ख) हा ! किं एदं भवे ।

(पुनर्नेपथ्ये)

वदत वदत क्वासौ क्वासौ दिलीपकुलाङ्कुरो
विनयविमुखो वीरम्मन्यो विमोहघनो बटुः ।
मम खलु गुरोश्शम्भोर्हे भोश्शरासमभिन्त यः
[1]कुनृपतिकुलोच्छेदोच्छूनं कुठारमचिन्तयन् ॥ ३ ॥

(प्रविश्य सम्भ्रान्तः)

काञ्चुकीयः — भवत्यौ किमिदानीमपि इह परिवर्तेते ।

(क) मञ्जूषिके, सुलभप्रत्यूहोऽपि समीहितार्थः प्रत्यूहं विना प्रतिपन्न इति साम्प्रतं भणितव्यम् ।

(ख) हा ! किमेतद् भवेत् ।

---

१. 'कुलपतिकुलोच्छे' क.

आकर्ण्य कर्णपरुषं गुरुचापभङ्ग-
माघूर्णितो बत रुषा नृपवंशवैरी ।
उद्दामराशनिकठोरकुठारपाणि-
राधावति स्वयमयं खलु जामदग्न्यः ॥ ४ ॥

उभे — (क) अय्य, परित्ताआहि परित्ताआहि ।

काञ्चुकीयः — के वयं परित्रातुम् । स्वभावभीरूणां राजदारिकाणाम् अकाण्डाशनिपातकल्पमिदमवस्थान्तरमुपलभ्य[1] संभ्रमातिरेको यथा न स्यात्तथा प्रयतितव्यं भवतीभ्याम् ।

(पुनर्नैपथ्ये)

रामो राम इति द्विषां विरमणाद् यन्नाम नः सार्थकं
व्यर्थं हन्त तदेव यः किल बिभर्त्यद्यापि खद्योतवत् ।
तस्मिन् क्षत्रियडिम्भके मम पुरैवोत्थं हि वैराङ्कुरं
सद्यः पल्लवयत्यदो गुरुधनुर्भङ्गाभिधं दोहलम् ॥ ५ ॥

काञ्चुकीयः — त्वरेतां[2] त्वरेतां भवत्यौ । प्रत्यासन्नः स भगवान्नरपति-कुलशलभहुताशनपरशुः परशुरामः ।

उभे — (ख) कोसल्लादिदसरहपदिणीतिदअसणाहं णवुव्वहणसुलहलज्जा-मणहरराअदारिआचउक्कपुक्खलसोहं अंतेउरं पविसामो । (इति निष्क्रान्ते ।)

(क) आर्य, परित्रायस्व परित्रायस्व ।
(ख) कौसल्यादिदशरथपत्नीत्रितयसनाथं नवोद्वहनसुलभलज्जामनोहरराजदारिका-चतुष्कपुष्कलशोभमन्तःपुरं प्रविशावः ।

---

१. 'निकल्पमिद' ख.
२. 'त्वरतां त्वरतां भवत्यौ' घ.

काञ्चुकीयः — अहमपीमं वृत्तान्तमुपलब्धुं महाराजसविधमेव गच्छामि[1] । (इति निष्क्रान्तः[2] ।)

॥ इति प्रवेशकः ॥

(ततः प्रविशन्ति कौसल्याकैकेयीसुमित्रा वध्वश्च)

कौसल्या — (सीतामालिङ्ग्य) (क) पुत्ति जाणइ, तुवं खु बहिणिआहिं समं च्चिअ रहूणं वहू जाआसि त्ति अहो अह्माणं भाअहेअपरिवाओ ।

(सीता लज्जते ।)

कैकेयी — (ख) अय्ये, अरहिअमहुरालावकोसल्ले कोसल्ले, अतिलज्जालुणीओ एदा भणिदाओ जह वाआमिस्सणे पहविस्संति तह इमाओ अणुणेहि ।

सुमित्रा — (ग) अय्ये केअइ, कंचिकालं खमेसु । णहु माहवीलदाओ[3] उब्भिण्णमत्ते पल्लवाइ दंसअंति ।

(क) पुत्रि जानकि, त्वं खलु भगिनीभिः सममेव रघूणां वधूर्जातासीति अहो अस्माकं भागधेयपरिवाहः ।

(ख) आर्ये अरहितमधुरालापकौशल्ये कौसल्ये, अतिलज्जाशालिन्य एता भणिता यथा वाग्मिश्रणे प्रभविष्यन्ति तथेमा अनुनय ।

(ग) आर्ये कैकेयि, कञ्चित् कालं क्षमस्व । न खलु माधवीलता उद्भिन्नमात्रे पल्लवानि दर्शयन्ति ।

---

१. 'मि । निष्का' क.

२. 'न्तः । प्रवेशकः' घ.

३. 'हविल' ग. 'हविच्छदाओ' घ.

सीता — (स्वगतम्) (क) अम्मो महुरभासिणीओ एदाओ ठाणे खु इमाओ रहुराअपुरंधित्तणं अणुहोन्ति। अह वा महाणईओ महोअहिं वज्जिअ कहिं अण्णस्सिं विस्समंति।

माण्डवी — (ऊर्मिलां प्रत्यपवार्य) (ख) वच्छे उम्मिले! इयं खु सच्चेअ सीआ। जा किल,

रूपजोव्वणगुणेहिं मणोज्जं राहवं सुणिअ कोउहलिल्ली।
केच्चिरं विरहमप्पसहंती संभुवीअ सविसेसकिसंगी ॥ ६ ॥

ऊर्मिला — (अपवार्य) (ग) अय्ये, एव्वं एदम्।

अल्लिऊण भिसिणीदलसेज्जं दज्झिआ मअणबाणसिहीहिं।
कंतिमत्तपरिसेसिअगत्ता जा भुवीअ पढमेंदुकला व्व ॥ ७ ॥

(क) अम्मो मधुरभाषिण्य एताः। स्थाने खल्विमा रघुराजपुरन्ध्रीत्वमनुभवन्ति। अथ वा महानद्यो महोदधिं वर्जयित्वा क्वान्यत्र विश्राम्यन्ति।

(ख) वत्से ऊर्मिले, इयं खलु सैव सीता। या किल,

रूपयौवनगुणैर्मनोज्ञं राघवं श्रुत्वा कौतूहलवती।
कियच्चिरं विरहमप्रसहमाना समभूत् सविशेषकृशांगी ॥

(ग) आर्ये, एवमेतत्।

आश्रित्य बिसिनीदलशय्यां दग्धा मदनबाणशिखीभिः।
कान्तिमात्रपरिशिष्टगात्री याभूत् प्रथमेन्दुकलेव ॥

माण्डवी — (क)

णिअकुसुमकुअंडदाहकोहक्खुहिअमणो कुसुमाउहो खु एसो ।
विदलइ विसमेक्खणस्स चावं धुवमुपजुज्जइ वेरणिक्खओ से । ॥ ८ ॥
इअ[1] रहसि भणीअ जाणई मं दलिअघणुं पुलऊण रामअंदं
अह रहुतणओ त्ति जाणई णं पुलअवई विणमेइ वत्तबिंबम् ॥ ९ ॥

तदप्पहुदि परिगहिअं लज्जालुणित्तणं अज्ज वि दाव उज्जुआ एसा ण परिच्चेदि ।

श्रुतकीर्तिः — (अपवार्य) (ख) अय्याओ, तुह्मे किं मंतेह ?

माण्डवी — (अपवार्य) (ग) वच्छे सत्तुग्घघरिणि, तुह सोहग्गं उद्दिसिअ अह्मे किं पि पसंसामो ।

(श्रुतकीर्ति सकोपं परावृत्तमुखी तिष्ठति ।)

(क) निजकुसुमकोदण्डदाहक्रोधक्षुभितमनाः कुसुमायुधः खल्वेषः ।
विदलयति विषमेक्षणस्य चापं ध्रुवमुपयुज्यते वैरनिष्क्रयोऽस्य ॥
इह रहसि भणित्वा जानकीमं दलितधन्वानं प्रलोक्य रामचन्द्रम् ।
अथ रघुतनय इति जानत्येनं पुलकवती व्यनमयत् वक्त्रबिंबम् ॥

तदा प्रभृति (परि)गृहीतं लज्जालुत्वमद्यापि तावदृज्वी एषा न परित्यजति ।

(ख) आर्ये, युवां किं मन्त्रयेथे ।

(ग) वत्से शत्रुघ्नगृहिणि, तव सौभाग्यमुद्दिश्यावां किमपि प्रशंसावः ।

---

१. 'इह' ग.

ऊर्मिला — (विहस्यापवार्य) (क) मुग्धे, अलं कोवेण ।

अणुरूअभत्तुलाहो सफलेइ खु अम्मकाणणिम्माणं
असरिसपुरिसाहिगमो सल्लं णो एक्कमामरणं ॥ १० ॥

श्रुतकीर्तिः[1] — (अपवार्य) (ख) जुन्तमिणं ।

सरिसपुरिसलाहगव्विरं वो
मणमिणमण्णअणोपहासवाआ ।
अदिफुडअरमासि सेउभंगाविअ
णिअपूरभरो जलासआणम् ॥ ११ ॥

कौसल्या (जनान्तिकम्) (ग) बहिणिआओ,
सोह्वा जोह्वाविसअसुसमासंदणिस्संदएहिं
सव्वाणंदं समअममुआ जोव्वणं उव्वहंति ।

(क) मुग्धे, अलं कोपेन ।

अनुरूपभर्तृलाभस्सफलयति खल्वस्मादृशीनां निर्माणम् ।
असदृशपुरुषाधिगमश्शल्यं न एकमामरणम् ॥

(ख) युक्तमिदम् ।

सदृशपुरुषलाभगर्वशीलं वां मन इदमन्यजनोपहासवाचा ।
अतिस्फुटतरमासीत् सेतुभङ्गादिव निजपूरभरो जलाशयानाम् ॥

(ग) भगिन्यौ,

स्नुषा ज्योत्स्नाविशदसुषमासान्द्रनिष्यन्दैः
सर्वानन्दं सममभूयौवनं उद्वहन्ति ।

---

१. 'तिः' — 'जुत्तमिणम्' ग.

लोला[1]वीलावलिअललिआ भंगचंगा अवंगा
जाणं णूणं हिअअणिहिअं वम्महं वाहरन्ति ॥ १२ ॥

कैकेयी — (जनान्तिकम्) (क) अय्ये, एवमेदम् ।

वक्कावंगतरंगणाइ भुमआकल्लोलहल्लोहलो
वेअड्ढीपरिवुड्ढसारसरसं जं किं पि संजप्पिअम् ।
वीलाजंतणवंधुरं सुमहुरं सीलं च लीलंचिअं
ताहे होन्ति ण कण्णआण ण ठिअं जाहे णवं जोव्वणम् ॥ १३ ॥

सुमित्रा — (जनान्तिकम्) (ख) अवितहं अय्या[2] भणादि ।

मणवसइमणोभूवामहत्थट्ठिएणं
णवकुसुममयेणं चावदंडेण साहम् ।

लोलाव्रीलावलितललिता भंगचंगा अपाङ्गा
यासां नूनं हृदयनिहितं मन्मथं व्याहरन्ति ॥

(क) आर्ये, एवमेतत् ।

वक्रापाङ्गतरङ्गणानि भ्रू(महा)कल्लोलहल्लोहलो
वैदग्धीपरिवृद्धसारसरसं यत्किमपि सञ्जल्पितम् ।
व्रीलायन्त्रणबन्धुरं सुमधुरं शीलञ्च लीलाञ्चितं
तावद्भवन्ति न कन्यकानां न स्थितं यावन्नवं यौवनम् ॥

(ख) अवितथमार्या भणति ।

मनोवसतिमनोभूवामहस्तस्थितेन
नवकुसुममयेन चापदण्डेन सार्धम् ।

---

१. 'लीला' ग.
२. 'अय्याओ भणन्ति'

णअणवअणचिह्लीवह्लिधम्मिल्लआणं
कुणइ कुडिलिमाणं[1] जोव्वणं जोव्वणाणम् ॥ १४ ॥

(प्रविश्य)

मञ्जरिका — (सर्वा विलोक्य स्वगतम्) (क) दिट्ठिआ इह ण पविट्ठो सो अच्चाहिदवुत्तंतो। होदु, दाव ण पआसइस्सं जाव गहिदत्था ण आअमिस्सिदि मंजूसिआ। (उपसृत्य) देवीओ, पणमामि।

कौसल्या — (ख) भद्दे! मञ्जरिए, एहि एत्थ उपविस।

मञ्जरिका — (ग) जं देवी आणवेदि। (तथा करोति।)

सीता — (घ) हंजे[2] मञ्जरिए, कहिं मञ्जूसिआ?

नयनवचनचिल्लीवल्लिधम्मिल्लानां
करोति कुटिलिमानं यौवनं यौवनानाम् ॥

(क) दिष्ट्येह न प्रविष्टस्सोऽत्याहितवृत्तान्तः। भवतु, तावन्न प्रकाशयिष्यामि यावत् गृहीतार्था नागमिष्यति मञ्जूषिका। देव्यः, प्रणमामि।

(ख) भद्रे मञ्जरिके, एह्यत्रोपविश।
(ग) यद् देवी आज्ञापयति।
(घ) हञ्जे मञ्जरिके, क्व मञ्जूषिका?

---

१. 'माणा' ग.
२. 'अंजे' ब.

मञ्जरिका — (क) अणुपदं आअमिस्सिदि।

मञ्जूषिका — (प्रविश्य) (ख) सहि मञ्जरिए, सव्वं सोहणपरिणामं संवुत्तम्।

कौसल्या — (ग) किं असोहणं जाअं ?

मञ्जूषिका — (घ) किं ण विदिओ तुझेहिं सो वुत्तंतो ?

कैकेयी — (साशङ्कम्) (ङ) णहि णहि[1] भणेहि[2] कीरिसो सो।

मञ्जूषिका — (च) सहि मञ्जरिए, तुए वि ण णिवेदिओ ?

मञ्जरिका — (छ) सहि, मये[3] खु तुह आअमणं पडिवालअंतीए[4] तुह्णीं चेअ ठिअम्।

(क) अनुपदमागमिष्यति।

(ख) सखि मञ्जरिके, सर्वं शोभनपरिणामं संवृत्तम्।

(ग) किमशोभनं जातम्?

(घ) किं न विदितो युष्माभिः स वृत्तान्तः?

(ङ) न हि न हि भण कीदृशः सः।

(च) सखि मञ्जरिके, त्वयापि न निवेदितः?

(छ) सखि, मया खलु तवागमनं प्रतिपालयन्त्या तूष्णीमेव स्थितम्।

---

१. 'हि कीरिसो' क.

२. 'भण कीरिसो' ख. ग. घ.

३. 'ये वि' ख. ग. घ.

४. 'लंताए' घ.

सुमित्रा — (क) तुरिअं भणेह ।

मञ्जूषिका — (ख) ता असंभंता सुणह । णिअगुरुसरासणभंगवुत्तंतं सुणिअ कुविअहिअओ भअवंतो भग्गवो जणअदसरहउलाइ कुठारपावए भस्सीकादुं पाढत्तो परुसवअणेहिं पराभूदपत्थिवलोओ आअदो ।

सर्वाः — (सभयकम्पम्) (ग)संतं सन्तं पावं । हाहा! खत्तिअउलणिसग्गसत्तू सो महेसी ।

मञ्जूषिका — (घ) अप्पमत्ता होह । सो खु महेसी,

करगहिअसरासवाणसेणीणिसिअपरस्सहदुःसहप्पआवो ।
जणअदसरहाण वंसधंसं कुणउ कुठारवरो त्ति कत्थमाणो ॥ १५ ॥

सर्वाः — (ङ) हा हा! किं भविस्सिदि[1] ।

(क) त्वरितं भणतम् ।

(ख) तदसम्भ्रान्ताः शृणुत । निजगुरुशरासनभङ्गवृत्तान्तं श्रुत्वा कुपितहृदयो भगवान् भार्गवो जनकदशरथकुलानि कुठारपावके भस्मीकर्तुं प्रारब्धः परुषवचनैः पराभूतपार्थिवलोक आगतः ।

(ग) शान्तं शान्तं पापम् । हा हा! क्षत्रियकुलनिसर्गशत्रुः स महर्षिः ।

(घ) अप्रमत्ता भवत । स खलु महर्षिः,

करगृहीतशरासबाणश्रेणीनिशितपरश्वधदुःसहप्रतापः ।
जनकदशरथयोर्वंशध्वंसं करोतु कुठारवर इति कत्थमानः ॥

(ङ) हा हा! किं भविष्यति ।

१. 'दि'। तदो तदो. ग.

मञ्जूपिका — (क) किं वहुजप्पिएण।

रुट्ठो सो दिट्ठमत्तो विहिअपणइणा रामभद्देण जाहे
कोहादो चाडुवाआ वि ण विहडइदुं पारिओ दारुणो सो।
ताहे तत्तो खु लद्धं गरुलधअधणुं कड्ढमाणेण णेणं
तेएहिं वेह्णवेहिं सह समहिगओ तक्खणं तप्पसाओ ॥ १६ ॥

(सर्वा हर्षं नाटयन्ति।)

सुमित्रा — (ख) अय्याओ, पेच्छह अच्छेरं,

असणिद्धणिघोसभीसिआओ तरसाणंतरविट्ठितोसिआओ।
जह होन्ति खणम्मि मोरिआओ तह होमो सह लद्धतासतोसा ॥ १७ ॥

(ततः प्रविशति जनकः।)

जनकः — (सानन्दम्)

(क) किं वहुजल्पितेन।

रुष्टस्स दृष्टमात्रो विहितप्रणतिना रामभद्रेण यावत्
क्रोधात् चाटुवाचापि न विघटयितुं पारितो दारुणः सः।
तावत्ततः खलु लब्धं गरुडध्वजधनुः कर्षतानेन
तेजोभिर्वैष्णवैस्सह समधिगतस्तत्क्षणं तत्प्रसादः॥

(ख) आर्ये, पश्यतमाश्चर्यम्,

अशनिध्वनिघोषभीषितास्तरसानन्तरवृष्टितोषिताः।
यथा भवन्ति क्षणे मयूरिकास्तथा भवामस्सह लब्धत्रासतोषाः॥

संबन्धो रघुभिर्नृपैरलघुभिः सम्यक् समापादितो
दूरं दुर्घटतोऽपि शुल्कजलधेरुत्तारिताः स्मो वयम् ।
सक्रोधं समुपागतोऽपि गमितः शान्तिं भृगूणां पतिः
सर्वेऽर्थाः समुपाहिताः सुविहितक्षेमेण रामेण नः ॥ १८ ॥

कोऽत्र भोः ।

(प्रविश्य)

काञ्चुकीयः — आज्ञापयतु महाराजः ।

जनकः — भद्र मन्दारक! अन्तःपुरं प्रवेष्टुमिच्छामि। तद् ज्ञायतां कस्तत्रावसर इति ।

काञ्चुकीयः — यदाज्ञापयति महाराजः । (निष्क्रम्यान्तःपुरं प्रविश्य) भो महादेव्यः!, महाराजसीरध्वजोऽयमन्तःपुरं प्रवेष्टुमागच्छति ।

कौसल्या — (क) बहिणिआओ, अह्मे अण्णदो गच्छह्म ।

(इति तिस्रो निष्क्रान्ताः ।)

काञ्चुकीयः — (राजानमुपेत्य) प्रविशतु महाराजः ।

(निष्क्रान्तः ।)

(जनकः परिक्रम्यान्तःपुरं प्रविशति ।)

सीता — (अन्याभिस्सहोत्थाय) (ख) ताद, पणमामो ।

जनकः — (ताः सस्नेहमालिङ्ग्य, सबाष्पगद्गदम्) हे पुत्र्यः!

(क) भगिन्यौ, वयमन्यतो गच्छामः ।

(ख) तात, प्रणमामः ।

चतस्रः संसक्ताः सततमपि भूयास्त पतिभि-
श्चतुर्भिस्तैरर्थैरभिमततमैः सिद्धय इव ।
अमीभ्यः सन्तोषानिव समभिगम्यास्त तनया-
नितो नो पश्यामः किमपि वयमाशास्यमपरम् ॥ १९ ॥

(सर्वाभिस्सहोपविश्य) पुत्रि जानकि!

प्रत्यग्धामनि कामचारविषयाद्दष्टांगयोगाङ्कुशे-
नाकृष्य प्रतिबध्नतामपि सतामुच्चैर्मनोवारणम् ।
तोकं नाम यदेकमस्ति तदलं मोहाय वस्त्वन्तरं
ब्रह्मज्ञस्य ममापि मज्जति यतश्चेतो ममत्वाम्बुधौ ॥ २० ॥

(सीता रोदिति।)

जनकः —

बाले, प्रालेयवर्षैरिव नवकमलं निष्प्रभं बाष्पतोयै-
र्जातं शीतेतरैस्ते वदनमिदमहो किं मुधा रोदिषि त्वम् ।
दैवाच्चीर्णप्रतिज्ञा वयमितरवधूर्दुर्लभो वल्लभस्ते
संबन्धः सूर्यवंश्यैः किमपरममुतः प्रीतये भूतये च ॥ २१ ॥

(सीता सलज्जमधोमुखी तिष्ठति।)

जनकः — पुत्रि माण्डवि,

भवतु जनुषो हेतुः कामं कुमारकुशध्वज-
स्तव तु विहृतेराहर्तारो[2] वयं खलु शैशवे ।

---

१. 'धि' ख. घ. ङ.
२. 'रादर्तारो' क. घ. 'रादत्तारो' ख. ङ.

यद्यपि जलधिर्जन्मस्थानं तथापि विधोः कलां
कलयति निजे मौलौ देवः स्वयं हि महेश्वरः ॥ २२ ॥

इतः परन्तु —

अवश्यं कन्यानां भवति परकीयत्वमिति वः
सहिष्ये विश्लेषं कथमपि भृशं दुःसहमपि ।
इदं तु प्रीत्यै मे भवति भवतीनां न तु मिथो
वियोगः प्रादुष्यात् परगृहगतानामपि यतः ॥ २३ ॥

सीता — (सास्रम्) (क) ताद, एत्तिअं कालं तुह अंकपल्लंकसुहसाइणीओ भविअ[1] अह्मे तुह्मेहि विरहिआ कहं खणं पि जीवामो ?

जनकः — पुत्रि देवयजनसम्भवे! अलं परिदेवितेन ।

धात्रीन्द्रः श्वशुरः स वो दशरथः श्वश्रूश्च कल्याणिनी
कौसल्या सरसोपलालनकलाकौशल्यकल्यात्मिका ।
कैकेयी च हितोपलम्भनलसन्मित्रा सुमित्रा च ते
ह्यस्मान् विस्मरयन्ति वः सुचरितैर्मध्यामयोध्यां गताः ॥ २४ ॥

माण्डवी — (ख) ताद ! के णाम अह्मे विह्मरअन्ति तुह्माणं अजिह्माइ विह्मअणिज्जाइ बह्मसंकरसंगधणुहसदमहप्पमुहेहि वि संभावणिज्जाइ सअलजण-

---

(क) तात, एतावन्तं कालं तवाङ्कपर्यङ्कसुखशायिन्यो भूत्वा वयं युष्माभिर्विरहिताः कथं क्षणमपि जीवामः ?

(ख) तात, के नामास्मान् विस्मरयन्ति युष्माकमजिह्मानि विस्मयनीयानि ब्रह्मशङ्करशार्ङ्गधन्वशतमखप्रमुखैरपि सम्भावनीयानि सकलजनहृदयसंवननपरमौषधानि स्वभाव-

---

१. 'विसिअ' ख.

हिअअसंवणणपरमोसहाइ सहावमहुराइ महागुणसव्वस्साइ ?

जनकः — (सस्मितम्) वत्से, स्वजनपरित्यागं भर्तृभवननिवासं च स्त्रीणां नैसर्गिकत्वान्नातिदुष्करमिव पश्यामि ।

तथाहि —

स्वस्त्रीचन्द्रसुरद्रुविद्रुमलतादन्तीन्द्रधन्वन्तरि-
प्रायानात्मसहोदरान् स्वपितरं सिन्धुञ्च सम्मुञ्चती ।
श्वेतद्वीपगतं विमुक्तजनतावासं गुणैरुज्झितं
विष्णोर्मन्दिरमिन्दिरा भगवती संप्राप्य संप्रीयते ॥ २५ ॥

मञ्जरिका — (क) सहीओ सच्चमिदं महाराओ भणदि । जम्मट्ठाणादो णिक्कमिअ अण्णट्ठाणे वड्ढणं कण्णआअणाणं वीहित्थम्बाणं च भूइट्ठो धम्मो ।

जनकः — (ऊर्मिलां प्रति)

यजनावनेः समुदिताञ्च जानकीं
निजतातसोदरसुताञ्च माण्डवीम् ।
जननीमिव त्वमवलोकयोर्मिले !
श्रुतकीर्तिमप्यनिशमात्मजामिव ॥ २६ ॥

ऊर्मिला — (ख) ताद ! को एत्थ संदेहो ।

मधुराणि महागुणसर्वस्वानि ?

(क) सख्यः, सत्यमिदं महाराजो भणति । जन्मस्थानान्निष्क्रम्यान्यस्थाने वर्धनं कन्यकाजनानां व्रीहिस्तम्भानाञ्च भूयिष्ठो धर्मः ।

(ख) कोऽत्र सन्देहः ।

मञ्जूषिका — (क) सुदकित्तिं पि किं पि सिक्खेदु महाराओ ।

जनकः — (सस्मितं श्रुतकीर्तिं प्रति)

मातृरिव त्वमपि[1] मानय माण्डवीञ्च
सीताञ्च शीतवचनोर्मिभिरूर्मिलाञ्च ।
तिस्रोऽप्यमूः पुनरमूढधियोऽनघे त्वां
पुत्रीमिव प्रणयपेशलमीक्षितारः ॥ २६ ॥

श्रुतकीर्तिः — (ख) जं तादो आणवेदि ।

(प्रविश्य)

शतानन्दः — सर्वेऽपि यथापूर्वमुपविशन्तु[2] (इत्युपविश्य) अयि वत्सा राजदारिकाः, वयञ्च किञ्चिदाचक्ष्महे —

यश्चक्षुर्जगतां निमेषकलितप्रत्यूहशून्यं शिवं
यस्तत्त्वं परमस्तसंगममलं निष्कारणं निष्क्रियम् ।
राजर्षिर्निगमान्तशास्त्रविषये यस्य प्रशिष्यो ह्ययम्[3]
दिष्ट्या तस्य विवस्वतो भगवतो जाताः स्थ यूयं स्नुषाः ॥ २७ ॥

(क) श्रुतकीर्तिमपि किमपि शिक्षयतु महाराजः ।

(ख) यत् तात आज्ञापयति ।

---

१. 'त्वमवलोकय माण्ड' घ.

२. 'पुरमुप' ग.

३. 'ह्यसौ' क.

तदिदमुपदिश्यते —

श्वश्रूः शुश्रूषणेन श्वशुरमपि तथा लालनैरालिवर्गं
भृत्यान् भृत्यर्पणेन स्मितशुचिवचनग्रन्थिभिर्बन्धुलोकम् ।
यातॄरन्योन्यमैत्र्या समधिकसमुपच्छन्दनाभिर्ननान्दॄ-
राराध्यन्त्यो यथार्हं भवत पतिगृहे पूजिता राजिताश्च ॥ २८ ॥

मञ्जरिका — (क) मञ्जूसिए, अह्मेहिं सिक्खिदव्वं सव्वं पि उवज्झाएण एव्व सिक्खिदम् ।

जनकः — (सीतां प्रति) वत्से, उचितमिदमुपदिशति भगवानुपाध्यायः ।

किञ्च—

भर्ता कामं भवतु भवने वा वने वाववनेयि
प्रायेणास्तु क्वचन विषयः सम्पदामापदां वा ।
स्वच्छन्दो वा भवतु परतन्त्रोऽथवा सर्वथापि-
च्छायेवैनं प्रतिलगति या केवलं सैव साध्वी ॥ २९ ॥

सीता — (स्वगतम्) (ख) अवि णाम अहं अय्यउत्तेण अविरहिदा भविस्सम् ।

(प्रविश्य)

काञ्चुकीयः — जयतु महाराजः । अपि सुखमुपाध्यायपादानाम् ?

(क) मञ्जूषिके, आवाभ्यां शिक्षयितव्यं सर्वमप्युपाध्यायेनैव शिक्षितम् ।

(ख) अपि नामाहमार्यपुत्रेणाविरहिता भविष्यामि ।

शतानन्दः — भद्र मन्दारक, अपि तथा तदभ्युपगतं महाराजदशरथेन ?

काञ्चुकीयः — अथ किम् ?

जनकः — भगवन्, किन्नाम ?

शतानन्दः — (कर्णे) एवमिव ।

जनकः — (सहर्षमात्मगतम्) साधु, कुमार कुशध्वज, साधु ।

यामौ कोसलमेदिनी कुमुदिनीवेन्दोश्चिरं कांक्षति
प्रव्यक्तोज्ज्वलनव्ययौवनकलापूर्णस्य यस्योदयम् ।
रामं सापि हि सन्ध्ययेव सुतरामारक्तया सीतया
सम्प्रत्येव वृतं प्रपद्य लभतामस्याः सपत्नीपदम् ॥ ३० ॥

(प्रकाशम्) भगवन्नुपाध्याय, सम्प्रति जामदग्न्यविजयमंगलानुमिलितपुलहपुलस्त्यागस्त्यवसिष्ठवाल्मीकिवामदेवकाश्यपजाबालि[1]प्रमुखमुनिवृन्दारकवृन्दसुमहितायां सभायां वत्सरामभद्रस्य यौवराज्याभिषेकमहोत्सवो भवत्प्रोत्साहितेन कुमारकुशध्वजेन प्रारब्ध इत्यति हि नाम प्रमोदामहे ।

मञ्जरिका — (सीतामालिङ्ग्य) (क) हला जाणइ, दिट्ठिआ वड्ढसि । जं दिण्णमत्ता एव्व तुमं चक्कवट्टिघरिणीपअं आरोविआसि वन्धुजणेहि ।

(नैपथ्ये)

(क) हला जानकि, दिष्ट्या वर्धसे, यद् दत्तमात्रैव त्वं चक्रवर्तिगृहिणीपदमारोपितासि बन्धुजनैः ।

---

१. 'जाम्बालि' ख. ग. ङ.

भो भोः पौरजानपदाः, महाराजदशरथसीरध्वजानुमोदितः कुमार-कुशध्वजो वः समाज्ञापयति । यदुत—

धूपैरापादयध्वं श्रियमुपरिगृहारोहिभिर्माहिपाक्षैः[1]
शुभ्रैरभ्रैरदभ्रैरिव शरदि विधत्ताम्बरैरम्बरान्तम् ।
अर्णांसि स्वर्णकुम्भैरुपनयत जवादर्णवानाञ्चतुर्णां
निर्णीतोऽस्माच्चतुर्थेऽहनि भुवनहितो रामभद्राभिषेकः ॥ ३१ ॥

जनकः — (सस्मितम्) अहो कुमारस्योचिते वस्तुनि सुमहानभिनिवेशः । तद्वयमपि महोत्सवमिमं सम्भावयामः । (उत्थाय)

अस्मिन्नभीक्ष्णमभिजातभुजापदान-
क्रीडाभृशोदितयशोभरे[2] रामभद्रे ।
विन्यस्य भारमवनेरवने प्रवीणे
विश्रान्तिमान् भवतु पङ्क्तिरथो नरेन्द्रः ॥ ३२ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ इति तृतीयोऽङ्कः ॥

---

१. 'कै' ङ.
२. 'मचन्द्रे' घ.

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति मायावसुः।)

मायावसुः — (समन्तादवलोक्य)

जृम्भारम्भिकुसुम्भकेसररुचैः साकूतकोकाङ्गना-
दृष्टैः कैश्चन रोचिषां परिकरैः प्राची यदाचीयते ।
यच्चात्मद्युतिभङ्गभीरव इव म्लायन्ति तारागणा-
स्तन्मन्ये तरसा भविष्यति रविः पूर्वाद्रिचूडामणिः ॥ १ ॥

तत्कथमिदानीमपि विदेहमन्दिराद् न प्रतिनिवर्तते तत्र भवत्याः शूर्पणखायाः प्रियसखी स्वयमयोमुखी नाम ।

(ततः प्रविशत्ययोमुखी ।)

अयोमुखी — (क) अहं दाव भट्टिदारिआए सुप्पणहाए णिओएण रामलक्खणगुणगणप्पच्चक्खीकरणकारणं[१] मिहिलाणअरीं पट्ठंती पिट्ठदो आअच्छिअ माआवसुणापि जं समादिट्ठं तं पि समवहारिअ तं णअरीं पविसन्ती तेहिं दुवेहिं जहादिट्ठं तहाणुट्ठिअ तदो पडिणिवुत्तह्मि । (परिक्रम्यावलोक्य च) अए ! एस माआवसू इदो एव्व आअच्छदि । (उपसृत्य) जेदु अय्यो ।

मायावसुः — (सहर्षम्)कथमागतासि अयोमुखि, अपि सिद्धं तत् कार्यम्?

(क) अहं तावद् भर्तृदारिकायाः शूर्पणखाया नियोगेन रामलक्ष्मणगुणगणप्रत्यक्षीकरणकारणं मिथिलानगरीं प्रतिष्ठमाना पृष्ठत आगत्य मायावसुनापि यत् समादिष्टं तदपि समवधार्य तां नगरीं प्रविशन्ती ताभ्यां द्वाभ्यां यथादिष्टं तथानुष्ठाय ततः प्रतिनिवृत्तास्मि । अये ! एष मायावसुरित एवागच्छति । जयत्वार्यः ।

---

१. 'कालणं' ग. 'कलणं' घ. ङ.

अयोमुखी — (क) अय्य, को एत्थ सन्देहो। अयोमुही कुदो विमुही होइ।

मायावसुः — (सस्मितम्) तत् कथय यथावृत्तम्।

अयोमुखी — (ख) सुणादु अय्यो। अहं खु भट्टिदारिआए सुप्पणहाए अय्यस्स अ कज्जं एकीकदुअ साहेउं पवुत्ता मिहिलाणअरीं पविसिअ मन्थराए वेसं ओलंबंती रामस्स रज्जाहिसेअमहूसवं सम्भावेउं पवट्टमाणाए भरहजणणीए केअईए[2] पादेसु पडन्ती सोअं विणा[3] वि सोअवाहप्पवाहं उक्किरन्ती रोदिउं पवुत्तह्मि।[1]

मायावसुः — साधुतरोऽयं कपटनाटिकानान्दीप्रस्तावः। ततस्ततः ?

अयोमुखी — (ग) तदो अब्भन्तरपरिचारिआवलोअणजणिअसंमदसंमुहीणाए ताए सअं चिअ करजुअले गह्निअ उट्ठाविआ अस्सुकालणं च पुच्छिआ अहं एव्वं वत्तुं पवुत्ताह्मि।

मायावसुः — किमिति ?

(क) आर्य, कोऽत्र सन्देहः। अयोमुखी कुतो विमुखी भवति।

(ख) शृणोत्वार्यः। अहं खलु भर्तृदारिकायाः शूर्पणखाया आर्यस्य च कार्यमेकीकृत्य साधयितुं प्रवृत्ता मिथिलानगरीं प्रविश्य मन्थराया वेषमवलम्ब्य रामस्य राज्याभिषेकमहोत्सवं सम्भावयितुं प्रवर्तमानाया भरतजनन्याः कैकेय्याः पादयोः पतन्ती शोकं विनापि शोकवाष्पप्रवाहमुत्किरन्ती रोदितुं प्रवृत्तास्मि।

(ग) ततोऽभ्यन्तरपरिचारिकावलोकनजनितसम्मदसम्मुखीनया तया स्वयमेव करयुगले गृहीत्वोत्थापिता अश्रुकारणञ्च पृष्टा अहमेवं वक्तुं प्रवृत्तास्मि।

---

१. 'हं दाव भट्टि' ग.

२. 'अदिए' ग.

३. 'णा सोअ' ख.

अयोमुखी — (संस्कृतमाश्रित्य)

मुग्धे दुग्धमिति भ्रमेण गरलं पातुं प्रवृत्तासि किं
रामो यद्यभिषेचितः स भरतो राज्यादपि भ्रंशितः ।
सौभाग्यं तव कोसलेन्द्रदुहितुर्दास्यास्तु हास्यास्पदं
राज्ञस्त्वं खलु भोगिनो तदपि हा जातासि किं निर्विषा ॥ २ ॥

मायावसुः[1] — (विहस्य) भद्रे, मर्मस्वेवायं प्रहारः । ततस्ततः ?

अयोमुखी — (क) एव्वं बहुप्पआरं णिब्भच्छिआ संजणिअकोवकंपिअकुअकुंभा जंभारिसहं अत्तणो भत्तारं हक्कारिऊण पुव्वप्पडिस्सुदं किल वरजुअलं पत्थिदवदी पत्थिवकुडुम्बिणी केकेई ।

मायावसुः — तद्वरयुगलं किन्नाम ?

अयोमुखी — (ख)

चोद्दहवरिसाइं वणे वसउ ससीओ सलक्खणो रामो ।
भरउ तुह रज्जभारं जुवराओ वच्छभरहो त्ति ॥ ३ ॥

मायावसुः — उभयमप्यतिदुष्करं भविष्यति[2] दशरथस्य ।

(क) एवं बहुप्रकारं निर्भत्सिता सञ्जातकोपकम्पितकुचकुम्भा जम्भारिसखमात्मनो भर्तारमाहूय पूर्वप्रतिश्रुतं किल वरयुगलं प्रार्थितवती पार्थिवकुटुम्बिनी कैकेयी।

(ख) चतुर्दश वर्षाणि वने वसतु ससीतः सलक्ष्मणो रामः ।
बिभर्तु तव राज्यभारं युवराजो वत्सभरत इति ॥

---

१. 'सुः – भद्रे' ग.
२. 'भवति' ग.

अयोमुखी — (क) एव्वं एदं । तहवि विविहं पलविअ सच्चसंधदाए कह वि तह[1] त्ति पडिवण्णं दसरहेण ।

मायावसुः — (सप्रमोदम्) भद्रे, फलितमिदानीं महाराजरावणस्याभिलाषेण भवत्याः प्रयत्नेन च । कुतः—

विराधखरदूषणत्रिशिरसां विहारास्पदं
विशन् दशरथात्मजो महदिदं वनं दण्डकाम्[2] ।
असौ सुलभनिग्रहः सुखपरिग्रहा जानकी-
त्युभावपि मनोरथौ दशमुखस्य सिद्धाविव ॥ ४ ॥

ततस्ततः ?

अयोमुखी — (ख) तदो गोदमसीरद्धअकुसद्धयकोसिअ[3]प्पमुहेहिं पडिसिद्धो वि रामो पिदुणो सच्चप्पडिण्णत्तणं ण परिच्चाइस्सं ति भणिअ सोमित्तिसीआमत्तपरिवारो जडावक्कलमत्तमंडणो बाणतूणबाणासणकवअहरो तदो विदेहणअरादो पोरअणणअणजलदुद्दिणकद्दमिएण राअमग्गेण णिग्गओत्ति एत्तिअं

(क) एवमेतत् । तथापि विविधं प्रलप्य सत्यसन्धतया कथमपि तथेति प्रतिपन्नं दशरथेन ।

(ख) ततो गौतमसीरध्वजकुशध्वजकौशिकप्रमुखैः प्रतिषिद्धोऽपि रामः पितुः सत्यप्रतिज्ञत्वं न परित्याजयिष्यामीति भणित्वा सौमित्रिसीतामात्रपरिवारो जटावल्कलमात्रमण्डनो बाणतूणबाणासनकवचधरस्ततो विदेहनगरात् पौरजननयनजलदुर्दिनकर्दमितेन

---

१. तहेत्ति घ.
२. 'कम्' ख. ग. घ. ङ.
३. 'अ कोसिअ' ग.

जाणामि । अहं च तक्खणं च्चिअ केण वि केदवोवण्णासेण केअईघरादो णिहुअं णिक्कमिअ पलाअंती एत्थ आअदह्मि ।

मायावसुः — भद्रे, महत् प्रयोजनमनुष्ठितं भवत्या ।

सफलपरिणामोऽसौ यत्नस्तवेति निवेदिते
त्वयि तु भविता प्रीतिस्स्निग्धो भृशं दशकन्धरः ।

(विहस्य)

वलयवहने पाणी कर्णौ च कुण्डलधारणे
तव कुचभरौ हारोद्धारे कथं प्रभविष्यतः ॥ ५ ॥

अयोमुखी — (क) अय्य, अलं परिहासेण ।

विज्जुज्जीहविणासदूमिअमणा विज्जाहरे किण्णरे
गन्धव्वे सुरजक्खरक्खसभडे[1] णिंदेइ मंदेअरम् ।
जा सा सुप्पणहा महागुणणिहिं सोऊण सीआवइं
कामुम्माअमहंबुहिम्मि गहिरे मज्जेइ लज्जं विणा ॥ ६ ॥

राजमार्गेण निर्गत इत्येतावद् जानामि । अहञ्च तत्क्षणमेव केनापि कैतवोपन्यासेन कैकेयीगृहान्निभृतं निष्क्रम्य पलायमानात्रागतास्मि ।

(क) आर्य, अलं परिहासेन ।

विद्युज्जिह्वविनाशदूनमना विद्याधरान् किन्नरान्
गन्धर्वान् सुरयक्षराक्षसभटान् निन्दति मन्देतरम् ।
या सा शूर्पणखा महागुणनिधिं श्रुत्वा सीतापतिं
कामोन्मादमहाम्बुधौ गभीरे मज्जति लज्जां विना ॥

---

१. 'सवरे' क.

ता तारिसाहिणिवेसविहलाए तिस्से मणोरहो कहं साहिज्जउ ?

मायावसुः — भद्रे, किमन्यत् ।

नागसहस्रप्राणा सैव समासाद्य हरतु दाशरथिम् ।
सीतां च पूर्वजाय प्रणिदत्तां प्राभृतीकृत्य ॥ ७ ॥

अयोमुखी — (क) ता अहं एव्वं से णिवेदेमि ।

मायावसुः — एवमस्तु ।

(अयोमुखी निष्क्रान्ता ।)

(प्रविश्य चित्रपटहस्तः)

करम्बकः — (ख) जेदु अय्यो ।

मायावसुः — भद्र[1], कुत आगच्छसि किं वा चेदम् ?

करम्बकः — (ग) महाराअलंकेसरस्स जाणईगआणुराअजणिअरणरणि-आविणोअणत्थं[2] अमच्चपहत्थस्स सासणेण मये एदस्सिं चित्तपडे कुदो वि किं वि

तत्तादृशाभिनिवेशविह्वलायास्तस्या मनोरथः कथं साध्यताम् ?

(क) तदहमेवमस्यै निवेदयामि ।

(ख) जयत्वार्यः ।

(ग) महाराजलङ्केश्वरस्य जानकीगतानुरागजनितरणरणिकाविनोदनार्थममात्यप्रहस्तस्य

1. 'इ करम्बक' ! कुत. ख. ग. घ. ङ.
2. 'द' क.

वत्थुअं केण वि सिप्पिणा लिहाविअं। एदं च अमच्चपहत्थस्स हत्थे दाउं तुरिअं गच्छामि।

मायावसुः — कथमेवमतिभूमिगतोत्कण्ठो वर्तते महाराजदशकण्ठः?

करम्बकः — (क) अह इम्।

चन्दं णिन्दइ चन्दणाअलमरुप्फंदे वि खिंदेइ सो
मन्दारद्दुमवुंदसंदसिसिरट्ठाणे वि णो णंदइ।
कन्दप्पजरडज्झमाणहिअओ गच्छेइ मुच्छं मुहू
मिच्छा जप्पइ जंपि किंपि विरहाअंकेसु लंकेसरो ॥ ८ ॥

(निष्क्रान्तः।)

मायावसुः — तद्यावदहमप्याचार्यमारीचस्याश्रमे कञ्चित्कालं प्रतिपालयिष्यामि तयोर्मानुषडिम्भयोः सीतायाश्च दण्डकारण्यप्रवेशम्।
ततश्च—

शासनेन मयैतस्मिन् चित्रपटे कुतोऽपि किमपि वस्तु केनापि शिल्पिना लेखितम्। एतच्चामात्यप्रहस्तस्य हस्ते दातुं त्वरितं गच्छामि।

(क) अथ किम्।

चन्द्रं निन्दति चन्दनाचलमरुत्स्पन्देऽपि खिद्यते सः
मन्दारद्रुमवृन्दसान्द्रशिशिरस्थानेऽपि न नन्दति।
कन्दर्पज्वरदह्यमानहृदयो गच्छति मूर्च्छां मुहु-
र्मिथ्या जल्पति यदपि किमपि विरहातङ्केषु लङ्केश्वरः॥

वीर्योत्सेकप्रौढिभाजा विराधे-
नास्मद्वंशद्रोहिणौ मानुषौ तौ ।
जीवग्राहं ग्राहयिष्यामि पश्चात्
तन्व्या सार्धं प्रापयिष्यामि लङ्काम् ॥ ९ ॥

(इति निष्क्रान्तः।)

॥ विष्कम्भः ॥

(ततः प्रविशति कामयमानावस्थो रावणः प्रतीहारी च।)

रावणः — (साशंसम्)

यस्य प्राप्तमनास्तुलामिव कलाविश्लेषसंश्लेषण-
क्लेशानार्जति मासि मासि मसृणस्तन्द्रां विना चन्द्रमाः ।
अम्भोजानि च संकुचन्ति विकसन्त्यद्यापि रात्रिन्दिवं
जानक्या वदनं कदा नु तदहं पश्यामि दृश्यं परम् ॥ १० ॥

(समन्तादवलोक्य)

अये[१]! कथमृतवः षडपि मामुपसेवन्ते । भवतु ।

प्राप्तोल्लासैः पलाशैः स्मरयति सुदृशो दन्तवासो वसन्तो
ग्रीष्मः सोष्मापि तस्याः स्मितमनुहरते काशपुष्पप्रकाशैः ।
रम्यं धम्मिल्लभारं पिशुनयति घनैः प्रावृडब्जैः शरच्च
व्याकोचैर्वक्त्रलक्ष्मीमिति चतुर ऋतूनाद्रिये नाद्रियेऽन्यौ ॥ ११ ॥

१. ख. पाठे 'अये' इति नास्ति ।

प्रतीहारी — (क) महाराअ, केवलं दुवेणं हेमन्तसिसिराणं उदूणं[1] किं अणाअरणे कारणम् ?

रावणः — हेमवति, केवलं निष्प्रयोजनानपि प्रभवो नाद्रियन्ते किमुत सापराधान् । पश्य,

जडप्रकृतिकाविमौ जनकजन्मनः स्मारकं
न वस्तु बिभृतः किमप्यथ तथास्तु का वा क्षतिः ।
इदन्तु न सहामहे विरहखेददीर्घा अपि
प्रकाममतिदीर्घतां गमयतो यदेतौ निशाः ॥ १२ ॥

प्रतीहारी — (स्वगतम् ।) (ख) अहो अदिगम्भीरसहावो वि कुम्भअण्णग्गओ वम्महेण एरिसीं असरिसविसआवडणदुत्थं अवत्थं पाविओ, जं माणुसीगएण[2] अणुराअपिसाएण हिअअं आविसिअ जं पि किं पि असंबंधं पलावीअदि एसो । (प्रकाशम्) महाराअ, गआणुगइओ खु लोओ । अदो दिग्घिददिग्घीकरणेण एदाणं उदूणं अवराहो णत्थि त्ति मे पडिभादि । पढमं च्चिअ जो दिग्घीकरेइ रअणिं तहिं एव्व कोवो कादव्वो ।

(क) महाराज, केवलं द्वयोर्हेमन्तशिशिरयोः ऋत्वोः किमनादरणे कारणम् ?

(ख) अहो अतिगम्भीरस्वभावोऽपि कुम्भकर्णाग्रजो मन्मथेनेदृशीमसदृशविषयापतनदुःस्थामवस्थां प्रापितः, यद् मानुषीगतेनानुरागपिशाचेन हृदयमाविश्य यदपि किमपि असंबन्धं प्रलाप्यते एषः । महाराज, गतानुगतिकः खलु लोकः । अतो दीर्घितदीर्घीकरणेन एतयोः ऋत्वोरप्यपराधो नास्तीति मे प्रतिभाति । प्रथममेव यो दीर्घीकरोति रजनीं तस्मिन्नेव कोपः कार्यः ।

---

१. 'णं को अवराहो ? ख. ग. घ. ङ.

२. 'वि.अ'. घ.

रावणः — (विहस्य) मुग्धे, विरहखेदं प्रति कोपेन किं स्यात्। तस्य प्रशमने संयोगादृते नान्यः कश्चिदुपायः।

प्रतीहारी — (क) जइ एव्वं ता किण्णिमित्तं बलामोडिसमाहरिअसुरासुरमणुअभुअंगमंगणा वि तुह्माणं भुअदंडा एत्थ विसए ण पवट्टन्ति ?

रावणः — हेमवति,

नलकूबरशापयन्त्रिता बलवन्तोऽपि हि मे भुजा इमे ।
न खलु प्रभवन्ति योपितामनुवादेन विना हठग्रहे ॥ १३ ॥

प्रतीहारी — (ख) अणणुऊलासु होदु एव्वम्। जाणई उण ण तह त्ति जाणीअदु, जदो माआवसुणा महाराए साणुराआ जाणइ त्ति णिवेदिदपुरुवं एव्व।[1]

रावणः — (सनिश्वासम्) आ! स्मरामि।

प्रतीहारी — (ग) अदो तिस्से हठग्गहो वि ण दोसस्स भविस्सिदि त्ति तक्केमि।

(क) यद्येवं तत् किन्निमित्तं बलात्समाहृतसुरासुरमनुजभुजंगमांगना अपि युष्माकं भुजदण्डा अत्र विषये न प्रवर्तन्ते ?

(ख) अननुकूलासु भवत्वेवम्। जानकी पुनर्न तथेति ज्ञायताम्, यतो मायावसुना महाराजे सानुरागा जानकीति निवेदितपूर्वमेव।

(ग) अतस्तस्या हठग्रहोऽपि न दोषाय भविष्यतीति तर्कयामि।

---

१. एव्व। अदो तिस्से हठग्गहो वि ण दोसस्स भविस्सिदि त्ति तक्केमि।
रावणः — (सनिश्वासं) भद्रे, क.

रावणः — भद्रे, साधु प्रतिबोधितम्।

धीरोदात्तप्रकृतिसुभगप्रौढवीर्यप्रकृष्टे[1]
धन्ये यूनि प्रणयसरसा हन्त वासुन्धरेयी।
इत्थं तेन प्रकथितमभूत् किन्तु न श्रद्दधाति
श्रेयोराशेरसुलभतया तादृशो मानसं नः ॥ १४ ॥

(सन्तापमभिनीय आकाशे लक्षं[2] बद्ध्वा) हंहो कुसुमायुध[3]!

दग्धं येन पुरा वपुस्तव पुरां जेत्रा स्वनेत्रानले
तस्याद्रासमहाचलोऽपि हि मया दोर्भिः समुन्मूलितः।
इत्युच्चैरुपकारि मित्रमपि मामस्त्रानले निस्त्रपो
निर्धक्ष्यन्निव लक्ष्यसे कथमहो भिन्नक्रमो विक्रमः ॥ १५ ॥

प्रतीहारी — (क) महाराअ, णिज्जिअवज्जपाणिणो वि महाराअस्स कुसुमसिलीमुहादो पराभवो त्ति अहो अच्छेरम्।

रावणः — सरले, त्वमनभिज्ञासि वस्तुविशेषाणाम्। अयं हि—

संरम्भेऽपि न कम्पते न च वचःसन्तर्जने लज्जते
नाप्यधिज्ञचक्रप्रवलनक्रोर्येऽप्यपक्रामति।

(क) महाराज, निर्जितवज्रपाणेरपि महाराजस्य कुसुमशिलीमुखात् पराभव इत्यहो आश्चर्यम्।

1. 'प्रौढिवीर्य' ख. घ.
2. 'लक्ष्यं' ग. ङ.
3. 'सुमधन्वन्' ख. ङ.

कस्मादस्य समस्तिनास्तिवपुषो भीतिः किमेतावता
मन्ये निन्दति चन्द्रहासमपि नश्चित्तेन चित्तेशयः ॥ १६ ॥

प्रतीहारी — (क) ता इदो एदु महाराओ ।

सव्वो वि तुह सन्दावो तदा सतिं गमिस्सिदि ।
सव्वआलमणोज्ञस्स जदारामस्स सेवणम् ॥ १७ ॥

रावणः — (सक्रोधम्) आः पापे, किं किं रामस्य सेवनमिति। येन हि–

शक्रो विक्रोशितोऽभून्मृधभुवि बहुधा मोहितो रोहिताश्वो
भूतः प्रेताधिराजो मरुदपचरितो दण्डितश्चण्डरोचिः ।
पाशी पाशेन बद्धो मुहुरुपगमितः खिन्नतां किन्नरेशः
सोऽयं मर्त्यप्रभुं तं कथमिव जुषतां हन्त भोः पङ्क्तिकण्ठः ॥ १८ ॥

प्रतीहारी — (सभयम्) (ख) पसीददु पसीददु महाराओ । आरामस्स[1] सेवणं ति मए कहिअं ण उण रामस्स सेवणं ति ।

रावणः — (स्पर्शं रूपयित्वा)

(क) तदित एतु महाराजः ।

सर्वोऽपि तव सन्तापस्तदा शान्तिं गमिष्यति ।
सर्वकालमनोज्ञस्य यदारामस्य सेवनम् ॥

(ख) प्रसीदतु प्रसीदतु महाराजः । आरामस्य सेवनमिति मया कथितं न पुना रामस्य सेवनमिति ।

---

१. 'मसेवणं ति' क.

आरादारामवाटादमरतरुलताधामहेमारविन्द-
प्रश्च्योतन्मुग्धमाध्वीपरिमलभरणायासमन्दप्रचारः ।
कासारस्फारवारिप्रसृमरलहरीविन्दुसन्दोहसान्द्रः
संसर्पन् दर्पकस्य स्वयमयमयते बन्धुतां गन्धवाहः ॥ १९ ॥

(पुनस्सन्तापनाटितकेन) हेमवति ! पश्य पश्य-

भ्रमद्भ्रमरगुञ्जितप्रकृतिमञ्जुशिञ्जारवं
वितत्य सकलर्तुजप्रसवराजिरूपं धनुः ।
विकस्वरपिकस्वरस्तवसमृद्धदर्पोद्धुरः
स्मरो मम पुरोभुवि स्फुरति मारुतस्यन्दनः ॥ २० ॥

धनुस्तावत् ।

प्रतीहारी — (स्वगतम्) (क) अहो अच्चारूढो से वम्महुम्माओ केण दाव विणोअणसाहणेण[1] किंपि पसंतिं पाविज्जउ ।

(ततः प्रविशति चित्रपटहस्तः प्रहस्तः ।)

प्रहस्तः — अहो नु खल्वसमीक्ष्यकारिता तत्रभवत्याः शूर्पणखायाः । यद्विराधस्यागमनकालं प्रतिपालयितुमक्षमा स्वयमेव दण्डकारण्यमाहिण्डमाना मानुषकुमारयोरागमनप्रतीक्षा किल पर्यटति ।

(क) अहो अत्यारूढोऽस्य मन्मथोन्मादः केन तावद्विनोदनसाधनेन किमपि प्रशान्तिं प्राप्यताम् ।

---

१. 'हसेण'. ग.

दण्डकारण्यमायातौ ससीतौ रामलक्ष्मणौ ।
हत्वाहमागमिष्यामि मायया वा हठेन वा ॥ २१ ॥

इत्थं किल विराधेन प्रतिज्ञातम् । तदश्रद्धानायास्तस्याः प्रस्थानमिदमकल्याणोदर्कं भविष्यतीति तर्कयामि ।

सुन्दस्त्रियं हतवतोऽस्य सुबाहुशत्रोः
स्त्रीपुंसभेदमपहाय रिपुं जिघांसोः ।
रामस्य सन्निधिमुपेत्य सलक्ष्मणस्य
स्थातुं थिगिच्छति किल त्रपया विना सा ॥ २२ ॥

भवतु । स्वामिनमुपसर्पामि । (उपसृत्य) जयतु महाराजः ।

रावणः — (अनाकर्णितकेन) हेमवति ! धनुस्तावद् । (इति हस्तं प्रसारयति ।)

(प्रहस्तः चित्रपटं हस्ते निक्षिपति ।)

रावणः — (विलोक्य) किमिदम् ।

प्रतीहारी — (क) इदं[1] अमच्चपहत्थेण हत्थे णिक्खित्तिअं किंत्ति ।

रावणः — (पार्श्वतोऽवलोक्य) अये प्रहस्तः ।

प्रहस्तः — महाराज ! अयं चित्रपटः यत्र समर्पिता सीताप्रतिकृतिः ।

(क) इदममात्यप्रहस्तेन हस्ते निक्षिप्तं किमपि ।

1. 'एदं'. ख.

रावणः — (सहर्षम्) तदिदमुद्वेष्ट्याग्रतः प्रसारय ।

(प्रहस्तः आदाय तथा करोति ।)

रावणः — (निर्वर्ण्य सविस्मयानुरागम्) अये ! इयं सा जानकी ।

एषा खलु—

लावण्यामृतसारणीसरणिभिर्लालित्यनित्यास्पदै-
रङ्गैरङ्गजकेलिरङ्गतलिमैः शृङ्गारशृङ्गाटकैः ।
अध्यक्षीकृतसर्व[1]यौवतवपुःश्रीणां मदक्ष्णामपि
प्रीतिं कामपि कामनीयकमयी पुष्णाति तृष्णावताम् ॥ २३ ॥

किञ्च—

चित्रं चित्रार्पितापि स्मितमधुरसुधादिग्धमुग्धाननेन्दुः
सुभ्रूस्सभ्रूविलासे किमपि मयि दृशोरञ्चले मुञ्चतीव ।
किञ्चोदञ्चत्कपोलस्तनतटपुलकस्वेदसम्भेदगम्यं
रम्यं रागानुबन्धं मयि पिशुनयतीवेयमब्जायताक्षी ॥ २४ ॥

(साभ्यर्थनम्) अयि प्रिये जानकि !

द्वन्द्वं सुन्दरि ! पुण्डरीकमुकुलस्पर्धालु वक्षोजयो-
र्गाढं[2] वक्षसि निक्षिप स्मरकृतातङ्कस्य लङ्कापतेः ।
किञ्चोदञ्चय चञ्चलाक्षि ! वदनं चुम्बामि बिम्बाधरं
किं वा नाभिदधामि कामितमितो[3] यद्देवि! दासोऽस्मि ते ॥ २५ ॥

---

१. 'तदिव्ययौ' क.
२. 'ढं निक्षिप वक्षसि'. ख.
३. 'तमहं यद्देवि'. क.

प्रहस्तः — (स्वगतम्) अहो प्रतिकृतावप्यस्यां सत्यजानकीबुद्ध्यैव[1] प्रलपति देवः।

रावणः — हेमवति! कुतः कारणादियं प्रतिवचनेनापि न सम्भावयति माम्।

प्रतीहारी — (स्वगतम्) (क) होदु। उम्मत्तीभूदेण णेण किंपि कीलाविइस्सं। (प्रकाशम्) महाराअ! पणअकुविदाए[2] इमाए होदव्वम्।

रावणः—

रात्रौ गोत्रस्खलितमथवा[3] वैमुखी कामिताना-
मन्यस्त्रैणप्रणयगणनप्रापितो वापराधः।
इत्येतानि प्रणयकलहं प्रायशः प्रेयसीना-
मातन्वन्ति प्रियसखि! कुतस्तानि[4] लङ्केश्वरस्य ॥ २६ ॥

प्रतीहारी — (ख) मन्दोअरीवल्लह! बलामोडिगहिअदणुअमणुअसुरपुरन्धी-सम्भोअसाहसिअस्स महाराअस्स कहं ण होइ कआवराहत्तणं।

(क) भवतु। उन्मत्तीभूतेनानेन किमपि क्रीडयिष्ये। महाराज! प्रणयकुपितया-नया भवितव्यम्।

(ख) मन्दोदरीवल्लभ! बलाद्गृहीतदनुजमनुजसुरपुरन्ध्रीसम्भोगसाहसिकस्य महा-राजस्य कथं न भवति कृतापराधत्वम्।

---

१. 'बुद्ध्यैव'. क. ग.
२. 'ए एदाए हो'. ख. ग. घ. ङ.
३. 'स्खलनमथवा'. क. ख.
४. 'स्तान्यहो रावणस्य'. ख. ग. घ.

रावणः — उपपन्नमिदम् । तदनुनयामि कृताञ्जलिः । देवि वैदेहि !

एकं वक्त्रमुभौ भुजौ च विजहाम्यन्तःपुराणां कृते
संघादेकमुपेक्ष्य शुद्ध्यति शुभे! शिष्टो हि दुष्टोऽपि सन् ।
अन्येऽष्टादशबाहवो नव मुखान्यर्हन्ति गर्हां विना
वक्षोजावुपगूहितुं तत्र तथा बिम्बाधरं चुम्बितुम् ॥ २७ ॥

(इति पादयोः पतितुमिच्छति ।)

प्रतीहारी — (ससम्भ्रमं पादयोर्निपत्य) (क) महाराअ! विरम विरम । चित्तजाणई खु एसा, ण उण सच्चजाणई ।

रावणः— (सलज्जम्) अये! चित्रमिदम् । (पुनर्विभाव्य प्रहस्तं प्रति) किन्नामधेयोऽयं गिरिः यत्र तावदियमालिखिता वैदेही ।

प्रहस्तः — अयं हि –

तुङ्गैः शृङ्गैस्तुहिनधवलान् निर्झरानुद्वमद्भि-
दूराल्लक्ष्यः सितपटदृढाबद्धकेतुप्रकाशैः[1] ।
मन्दाकिन्या नगरपरिखाकारयाश्लिष्टसानु-
र्नानारत्नप्रचयरुचिभिश्चित्रितश्चित्रकूटः ॥ २८ ॥

रावणः — (पुनर्विलोक्य)

अरुणवल्कजटाभरभूषणौ
कवचकार्मुकबाणनिषङ्गिणौ ।

(क) महाराज! विरम विरम, चित्रजानकी खलु एषा, न पुनः सत्यजानकी ।

---

1. 'शः' ग.

प्रशमवीररसैकसमाश्रयौ
विलिखितौ[1] तरुणाविह काविमौ ॥ २९ ॥

प्रहस्तः — इमौ तौ रामलक्ष्मणौ।

रावणः — (सक्रोधं खड्गमुत्कृष्य)

मर्त्यावेतावमर्त्यव्रजविजयिभुजाविक्रमस्याग्रतो मे
गर्वायेते किमेवं परिणतजरसः पाटनात्ताटकायाः।
आमज्जं मज्जतु द्रागधिवपुरुभयोरनयोरद्य सद्यः
कृत्तप्रत्यर्थिकण्ठच्युतरुधिरसुधाशीरपाणः कृपाणः ॥ ३० ॥

(इत्युत्तिष्ठति।)

प्रहस्तः — महाराज! कोऽयमकाण्डे संरम्भः। चित्रमिदमिति किं विस्मृतं महाराजेन।

रावणः — (विमृश्य) युक्तमिदम्। (उपविश्याग्रतो निर्दिशन्) कः पुनरनयोः समानरूपः कश्चिदितो निवृत्त इव किञ्चिद्विप्रकृष्टो विलिखितः।

प्रहस्तः — देव!

सुतविप्रयोगजरुजोज्झितस्तनुं पितुरौर्ध्वदेहिकविधेरनन्तरम्।
गुरुशासनात् प्रतिगृहीतपादुको भरतः किलैष नगरं प्रतिष्ठते ॥ ३१ ॥

रावणः — कुतस्तवायं प्रस्तावाधिगमः।

---

1. 'तौ पुरुषाविह'. ख. ग. घ. ङ.

प्रहस्तः — अस्य चित्रपटस्योपनेतुः करम्बकस्य मुखात् सर्वमवगतवान[1]-स्मि ।

रावणः — युज्यते । मायावसोः प्रणिधित्वादयोध्यावृत्तान्तवेदी स राक्षसः ।

(प्रविश्य)

दौवारिकः — जयतु महाराजः । एष[2] खलु कश्चिद्वैणिको गन्धर्वो महाराजपादानुपवीणयितुकाम इव द्वारि तिष्ठति ।

प्रहस्तः — (स्वगतम्) इदमपि विनोदनान्तरं भवतु देवस्य । (प्रकाशम्) तदेनं प्रवेशय ।

दौवारिकः — तथा । (इति निष्क्रान्तः ।)

(ततः प्रविशति गन्धर्वः ।)

गन्धर्वः —

उत्सङ्गोपनिवेशितामविरतं सम्यक् समाश्लेषणे
सान्द्रस्निग्धमृदुप्रवालवपुषा रोमाञ्चयन्तीं वपुः ।
आनन्दं मधुरस्वरप्रलपितैरातन्वतीं कर्णयो-
र्वीणामेव विभावयामि दयितामेतामलाबूस्तनीम् ॥ ३२ ॥

(विचिन्त्य) अहं तावच्चिरन्तनमहायोगिनं शरभङ्गतपोधनम् आत्मपुण्यविजितमजरामरं लोकमुपनेतुं विमानेनोपस्थितस्य भगवतः पुरन्दरस्याज्ञया दशकन्धरस्योपक्रममुपलब्धुकामः लङ्कापुरमिदमनुप्रविष्टोऽस्मि । तत् क नु खलु स सदाचार-

1. 'मधि' ग.
2. 'ष कश्चिद्वै'. ग. ङ.

कुण्ठो दशकण्ठः। (पुरोऽवलोक्य) अये! अयमारामोपकण्ठबाह्यालिन्दे प्रहस्तेनोपास्यमानस्तिष्ठति। यावदुपसर्पामि। (उपसृत्य) स्वस्ति समस्तलोकविजयिने महाराजदशमुखाय।

रावणः — अभिवादये। उपविशतु भवान्।

गन्धर्वः — बाढम् (उपविशति।)

रावणः[1] — महाभाग! तर्हि प्रस्तूयतामात्मनोऽधिकारः।

गन्धर्वः — गान्धर्ववेदविशेषविज्ञस्य भवतः पुरस्तात् चिरकालप्रत्यवायविस्मृतप्रायां संगीतविद्यां कथं प्रयुञ्जे इति लज्जितोऽस्मि।

प्रहस्तः — गन्धर्वपते! चिरकालप्रत्यवायस्य को[2] नाम हेतुः।

गन्धर्वः — तर्हि श्रूयताम्।

अहं हि तुम्बुरुर्नाम गन्धर्वो गर्वहेतुकात्।
अलकाधिपतेः शापादवापं यातुधानताम् ॥ ३३ ॥

प्रहस्तः — (स्वगतम्) स कतमोऽस्मासु यातुधानेषु स्यात् (प्रकाशम्) ततस्ततः।

गन्धर्वः — ततोऽहम्

विराध इति विश्रुतो विविधजन्तुहिंसापर-
श्चिराय निरवग्रहस्समचरं वने दण्डके।

---

१. णः - 'तर्हि महाभाग प्र'. ख. ग.
२. 'को हेतुः' घ.

प्रहस्तः — (स्वगतम्) कष्टमहो महता विस्रम्भराशिना विक्षतेन भवितव्यम् ।

गन्धर्वः — वनं प्रविशताधुना दशरथात्मजेन क्षणात्

प्रहस्तः — (स्वगतम्) अपगतः सन्देहः । अयि हृदय स्थिरीभव ।

गन्धर्वः — शरेण विनिपातितं मम तदाशरीयं वपुः ॥ ३४ ॥

प्रहस्तः —(जनान्तिकम्) महाराज! महान् मनोरथतरुरामूलमुन्मूलितो दैवेन ।

रावणः — (जनान्तिकम्) एवमेतत् ।

जीवग्राहं गृहीत्वा तौ मानुषौ सह सीतया ।

आनेष्यामीति येनोक्तं स एव विधिना हतः[1] ॥ ३५ ॥

(सधैर्यविष्टम्भम्; प्रकाशम्) भद्र ! तिष्ठ । ततः परस्तादवगम्यत एव ।

अयं हि चिरकालप्रत्यवायस्य हेतुः ।

गन्धर्वः — एवमेतत् । किञ्च, प्रकृतिं प्राप्तस्यापि सदारसहजं राममनुगच्छतः[2] कलशजन्मनो मुनेराश्रमात् पञ्चवटीं प्रविश्य विश्राम्यतो ममान्यप्रस्तावाक्षिप्तहृदयत्वादेतावन्तं कालम् आत्मविद्यायाः स्मरणमपि नाभूत् ।

(नैपथ्ये)

(क) हा भादर दसअंधर हा भादर कुम्भअण्ण हा भादर विहीसण हा भादुणंदणा अक्खवकुमालमेहणाआ तुह्मेसु जीवंतेसु च्चिअ अहं एरिसिं दुरवत्थं मणुस्संतूहिं अणुभाविदह्मि ।

(सर्वे आकर्णयन्ति)

(क) हा भ्रातर्दशकन्धर! हा भ्रातः कुम्भकर्ण! हा भ्रातः विभीषण! हा भ्रातृनन्दनावक्षकुमारमेघनादौ युष्मासु जीवत्स्वेवाहमीदृशीं दुरवस्थां मनुष्यजन्तुभ्यामनुभावितास्मि ।

---

१. 'ना गतः' क.

२. 'तोऽगस्त्यमुनेराश्रमात्' ख. ग. घ.

प्रहस्तः — (स्वगतम्)[1] हन्त यन्मया प्रथममेवाशङ्कितं तत्तथैवापतितम् ।

रावणः — प्रहस्त ! ज्ञायतां किमेतदिति ।

प्रहस्तः — (स्वगतम्) ज्ञातमेव । (प्रकाशम्) यदाज्ञापयति महाराजः । (निष्क्रान्तः) ।

गन्धर्वः — (स्वगतम्) रामभद्रेण सौमित्रिणा वा अपकृतायाः कस्याश्चिन्निशाचर्याः क्रन्दितेनानेन भवितव्यम् ।

(प्रविश्य)

प्रहस्तः — महाराज ! किमन्यत् ।

जयलक्ष्मलक्ष्मणकृपाणलताविनिकृत्तघोणपुटनिष्पतितैः ।
विततैरसृग्भिरभिषिक्ततनुर्भगिनी तवापतति शूर्पणखा ॥ ३६ ॥

रावणः — (सक्रोधमुत्थाय) किं किं ब्रवीषि ? ।

प्रहस्तः — श्रवसी च नासिका च त्रितयमिदं वः स्वसुर्विलूनमिति ।

(प्रविश्यापटाक्षेपेणाकम्पनः)

अकम्पनः — खरदूषणत्रिशिरसां त्रितयश्चाद्यैव रामेण ॥ ३७ ॥

गन्धर्वः — (स्वगतम्) दिष्ट्या निष्कण्टकं जनस्थानमभूत्, तदिदानीं विदितप्रायोऽत्र वृत्तान्तः । यावदितोऽपसरामि । (प्रकाशम्) अभूमिरस्मदुपसेवायाः, तदहं गच्छामि । (निष्क्रान्तः)

रावणः — अकम्पन ! त्वया तावन्मारीचाश्रमं गत्वा तत्रभवान् मारीचो वक्तव्यः ।

अकम्पनः — महाराज ! किमिति ? ।

रावणः — (कर्णे) एवमिव ।

---

१. तम्) 'यन्म' ख. ग. घ.

अकम्पनः — यदाज्ञापयति महाराजः । (निष्क्रान्तः)

रावणः — तद्यावदिदानीम्

चिरविरहितवृत्रवैरिनारी
घनकचभार[1]हठग्रहोत्सवानाम् ।
भवतु जनकजाकचावमर्शो
रुचिरतरोऽद्य महोत्सवो भुजानाम् ॥ ३८ ॥

(इति निष्क्रान्तास्सर्वे)

इति चतुर्थोऽङ्कः

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशत्यध्वक्लान्तश्चरः)

चरः — (सशूत्कारम्)

अतिक्रान्ताः शैला न कति, कति तीर्णा न सरितो
भ्रमत्सिंहव्याघ्राः कति न समतीता वनभुवः ।
समादेशो भर्तुः समजनि सहायो न यदि नः
क्व पन्था द्राघीयान् क्व च मनुजमात्रा वयममी ॥ १ ॥

(समन्तादवलोक्य) अये कोऽयमुद्देशः । इह हि-

वृकाभिः कुक्कुरौघो विवृतमुखबिलव्यक्तरक्तार्द्रमांस-
व्यासङ्गव्याकुलाभिः प्रकृतिभृतमिथःस्पर्धितावर्धिताभिः ।
उद्गृध्यद्गृध्रतुण्डत्रुटितशवशतस्रस्तमस्तिष्क[2]पङ्क-
ग्रस्त्या सौहित्यभाजा निबिडयति रवान् भैरवान् फेरवाणाम् ॥२॥

१. 'कुचभार'. घ.
२. 'पङ्क्ति' ग.

(किञ्चिदुच्चैः) कोऽत्र भोः? । केऽमी संघातपरेताः शरीरिसङ्घाः ।

(आकाशे)

मिहिरान्ववायजलराशिचन्द्रमा
भरताग्रजो यदवधीन्मृधाङ्गणे ।
तदिदं चतुर्दशसहस्रसम्मितं
खरनेतृकं बलमवेहि रक्षसाम् ॥ ३ ॥

चरः — (आकर्ण्य सप्रमोदम्) दिष्ट्या चिराय गवेषितोऽद्य दर्शिष्यते स्वामी रामभद्रः । भोः क्वेदानीमात्मना तृतीयः स महात्मा ।

(आकाशे)

ताटकेयहाटकहरिणच्छद्मना सावरजमात्मानं दूरीकृत्य कपटभिक्षुवेषेण रक्षसां पत्या रावणेन वञ्चितां जानकीं गवेषयितुमितो वनाद्वनं पर्यटति पर्याकुलधृतिरात्मना द्वितीयो रामभद्र इत्येतावदवगच्छामि ।

चरः — (सशोकम्) हा कष्टमगर्भसंभवे देवि वैदेहि! कथमीदृशस्ते दैवविपाकः संवृत्तः ।

यस्यास्ते जनकः स एव जनको राजर्षिराजन्मनो
विख्यातः श्वशुरश्च ते दशरथो राजा सखा वज्रिणः ।
भर्ता ते भरताग्रजो भृगुपतेर्जेता जगत्याः पति-
र्माता ते वसुधैव देवि! विपदां तस्याः कुतः सम्भवः ॥ ४ ॥

भोः अपि सत्यमिदमत्याहितं तत्रभवत्याः ।

(आकाशे)

कः संशयः । ननु तत्रभवत्याः सीताया जनस्थानवनवासप्रियसखी मन्दभाग्या मन्दारवती नाम वनदेवताहं ब्रवीमि । तद्गच्छ गवेषय रामलक्ष्मणान्वितो दक्षिणारण्येषु ॥

चरः — मन्दारवति! एवमस्तु । (परिक्रम्यावलोक्य च) अये !

अधो दण्डाकारामुपरि विततां धूमविततिं
दधानो[1] विस्तीर्णां विलसदसितच्छत्रसदृशीम् ।
स्फुलिङ्गैरालिम्पन् गगनपथमत्यूष्मलतया
दविष्ठानप्येष[2] ग्लपयति तरून् कोऽपि दहनः ॥ ५ ॥

(पुनर्विभाव्य) धिगहं श्मशानभूमिमनुप्राप्तोऽस्मि । नूनमेष चितानलः समुद्दीप्यते ।

(नैपथ्ये)

रथपथावरणाधिगतक्रुधा दशमुखेन परिक्षतपक्षतेः ।
प्रवयसो वयसोऽस्य जटायुषो रघुसुतोपचितैव चिता ह्यसौ ॥ ६ ॥

चरः — (सखेदम्) हा कष्टं ! महाराजदशरथप्रियसुहृदोऽस्य जटायुषो विपत्तिरियं रामभद्रमतिमात्रं सन्तापयतीति तर्कयामि । केनेदं व्याहृतं स्यात् ।

(प्रविश्य दनुः)

दनुः — भद्र ! अयमहं दनुर्नाम कोऽपि गगनेचरः ।

मुनेः शापात् पापामहमधिगतो नैर्ऋतजनिं
जनद्रोही शक्रात्पुनरथ[3] शिरश्छेदमपि यः ।
कबन्धोऽहं बन्धोर्दशरथकुमारस्य कृपया
निजां मूर्तिं दिव्यां द्रुतमयमनायिष्यविकलम् ॥ ७ ॥

कुतो भवान् [4]को वा भवान् ।

---

१. 'नोऽसावुच्चैर्वि' ख. घ. ङ.
२. 'प्याशु' ख. ङ.
३. 'रपि' क.
४. 'को भवान्'. घ.

चरः — (प्रणम्य) महाभाग! अयमहं नन्दिग्रामवासिनः सानुजस्य कुमारभरतस्य शासनाद् रामभद्रवार्ताविगमार्थमागतो नन्दको नाम राजप्रणिधिः।[1] तत् केदानीं स्वामी रामभद्रः।

दनुः — भद्र नन्दक! शृणु संक्षेपतः।

शापान्धोरुद्धरन्मामपि च शबरिकां[2] मोचयन् जन्मपाशात्
पम्पामुल्लङ्घ्य मध्येपदवि हनुमता मानितः सानुजन्मा।
कृत्वा सुग्रीवसख्यं तदनु विदलयन् पत्रिणा सप्तसालान्
हिंसित्वा वालिनश्च प्रतिवसति गिरावृश्यमूके स रामः ॥ ८ ॥

तदित एव निवर्ततां भवान्। किञ्च दृश्यतेऽसावतिभयानक उद्देशः तथाहि—

अत्यन्तोद्धुरहस्तिमस्तकतटीसञ्चारिपञ्चाननः
शार्दूलोत्कटवक्त्रकृष्टहरिणीरक्तावमिक्ताचनिः।
उच्छ्रायच्छुरितोडुमार्गशिखरो वैमानिकानामपि
व्योमोत्संगगतागतानि कुरुते वन्ध्यानि विन्ध्याचलः ॥ ९ ॥

अतो भवद्विधैः स्मर्तुमपि न शक्यते, किं पुनरतिपतितुम्।

चरः[3] — महाभाग! एवमस्तु। किं पुनर्नन्दिग्रामं गतेन मया कुमारभरतो वक्तव्यः।

दनुः — (सस्मितम्) यावदेतावतोऽध्वनः प्रतिलङ्घ्य पदातिर्भवान् नन्दिग्राममभिगमिष्यति तावद्रामभद्र एव जानकीं प्रत्याहृत्य स्वयं तत्रागमिष्यति।

---

१. 'स्वामिनो वार्ता'. ख. ग. घ. ङ.
२. 'कामुद्धरन्'. घ.
३. 'रः—एवमस्तु'. घ.

चरः — युक्तमिदं, यतो नन्दिग्रामात् प्रस्थितस्य ममायं दशमो मासः। तदहं साधयामि । (निष्क्रान्तः)

दनुः — तदहमपि चिरकालपरित्यक्तमात्मनो लोकमभिगच्छामि। (ऊर्ध्वगमनमभिनीयाधो विलोक्य सविस्मयम्) अहो प्लवङ्गममयी विलोक्यते[1] विश्वतो विश्वम्भरा । आः ज्ञातम् ।

प्लवगपतिना सुग्रीवेण क्षणादभितो दिशो
दशमुखहृतां सीतादेवीं विचेतुमभीच्छता ।
विनतहनुमन्मुख्याः सख्या विभोः प्रणिचोदिता
विदधति महीमङ्कस्तुङ्गैरमी हरियूथपाः ॥ १० ॥

(निष्क्रान्तः ।)

इति शुद्धविष्कम्भः ।

(ततः प्रविशति रामो लक्ष्मणसुग्रीवौ च ।)

रामः — (सकरुणमात्मगतम्) हा देवि वैदेहि !

कनकरजतचित्रे तत्र दृष्टे कुरङ्गे
प्रकटितकुतुकानां प्रार्थनाकूतभाजाम् ।
मुहुरनुपतितानां तन्मुखे मन्मुखे च
प्रणयिनि तव मुग्धप्रेक्षितानां स्मरामि ॥ ११ ॥

सुग्रीवः — (स्वगतम्)

अन्येषु प्रियपूरणार्थिषु हरिप्रष्ठेषु[2] तिष्ठत्स्वपि
प्रायच्छन्निजमङ्गुलीयकमसौ देवो यदीये करे ।

---

१. 'वालोक्यते' ख. ग. घ. ङ.
२. 'श्रे' क.

गत्वा तेन हनूमतैव नियतं देवी निरीक्षिष्यते
भाविन्येव यदृच्छयापि निपतत्यर्थे प्रभूणां मनः ॥ १२ ॥

लक्ष्मणः — (सुग्रीवमवलोक्य स्वगतम्)

आर्यशरेण हरेणेवाग्रभवे कालकूट इव रूक्षे ।
ग्रस्ते वालिन्यमृतवदुद्भासत एष सुग्रीवः ॥ १३ ॥

(रामञ्च निर्वर्ण्य स्वगतम्) कष्टं भोः कष्टम्

वियोगादार्याया[1] बत वितपमानं प्रथमतो
जटायोर्ध्वंसेन व्यथितमथ तातस्य सुहृदः ।
प्रियायाः संव्यानं समुपलभमानस्य च गुरो-
रिदानीमामूलं हृदयमिदमुन्मूलितमिव ॥ १४ ॥

(सुग्रीवं प्रति जनान्तिकम्) किष्किन्धाधिपते! दुष्करमिवार्येण मारुतिप्रत्यागमनावधिकमपि जीवितधारणमिति मे प्रतिभाति । तदन्यत्राक्षिप्यतामस्य चेतः ।

सुग्रीवः — (जनान्तिकम्) सम्यगुपलक्षितं कुमारेण । तथाहि –

स्वेदामृष्टललाटिकाभसितया निःश्वासवाताहति-
व्याधूतस्फुरदक्षसूत्रपटलीचीरोत्तरासङ्गया ।
रोमोच्छ्वासमृजा निजप्रियतमास्मृत्यायमत्यायतं
नीतो नूतनसङ्गयेव सुदृशा कामप्यहो विक्रियाम् ॥ २५ ॥

तदहमन्यत्राक्षिपामि । (प्रकाशम्) देव !

---

1. 'म) वियो'. ग.

निश्च्योतन्निर्झराम्भश्शिशिरतरतटीनित्यनृत्यन्मयूर-
स्वेच्छोद्यच्छत्कलापावलिशबलरुचिव्यक्तवृत्रारिचापः ।
शुभ्रैराश्लिष्टसानुः शुचिपटरुचिरैः शारदैर्वारिवाहै[1]-
रुत्तुङ्गैरेष शृङ्गैरपिहितगगनो दृश्यतामृश्यमूकः ॥ १५ ॥

लक्ष्मणः — (सकौतुकम्) आर्य ! पश्य पश्य –

पशव्यानामस्मिन्नतिघनवनालीनिचुलिते
तृणानामश्नन्तः परिलघु पिबन्तश्च सलिलम् ।
प्रभावान्निश्शङ्कं विदधति मतङ्गस्य तपसो
विमर्दं शार्दूलीनखकुलिशधारासु पशवः ॥ १६ ॥

रामः — (मनः संस्तभ्य) वत्स ! किमत्राश्चर्यम् । पश्य –

रागद्वेषविषादहर्षसुखितादुःखित्वमुख्यान्यपि
द्वन्द्वानि स्वयमान्तराणि वशितानिघ्ना[2] विनिघ्नन्ति ये ।
तेषामस्तरजस्तमस्कमनसामस्तोकसत्त्वश्रियां
धीराणामिह बाह्यसत्त्वकलहप्रध्वंसने कः श्रमः ॥ १७ ॥

सुग्रीवः — देव ! एकमपि वस्तु विषयभेदाद् भिन्नफलमिवोपलभ्यते[3] । तथा हि–

क्षिप्तस्तेन पुरा मतङ्गमुनिना मत्पूर्वजं बालिनं
यो दुःखाकृत माल्यवत्क्षितिभृतो दुर्लङ्घतापाततः ।
सोऽयं प्रत्युत मामनुग्रहपदे तिष्ठन् प्रतिष्ठार्पणा-
दस्मिन्नेव सुखाकरोच्चिरतरं शापोऽपि लाभोत्तरः ॥ १८ ॥

---

१. शारदाभ्रैरदभ्रैरु. ग.
२. निघ्नानि निघ्नन्ति. घ.
३. ते । क्षिप्तस्तेन. ख. ग. घ. ङ.

लक्ष्मणः — सखे सुग्रीव! किं कारणमनेन मतङ्गमुनिना तथा प्रशप्तः शक्रसूनुः।[1]

सुग्रीवः — नन्वमुना देवेन तदा पादाङ्गुष्ठेन यः परिवर्तितो दुन्दुभेः कङ्कालकूटः स एव प्रथममस्य शापस्य कारणमासीत्।[2]

रामः — कुमार! किं विस्मृतमिदं यत् पम्पामुल्लङ्घ्य माल्यवत्प्रस्थे सञ्चरन्तावावां प्रति भिक्षुवेषेण हनूमता निवेदितोऽयमपि प्रस्तावः।

लक्ष्मणः — आं[3] एवमेतत्। स्मृतमिदानीं किन्तु सुग्रीवपक्षपातिनि हृदये वालिविषयो वृत्तान्तः शिथिलमेव मे लग्न आसीत्।

रामः — वत्स! किमुच्यते सुग्रीवपक्षपात इति, यदायत्तेन हि मया —

कक्षोपारुद्धरक्षोधिपभुजपटलीदुर्गतो निर्गताया
येन स्वस्मिन् द्विबाहावपि वसति मुदः पूरिता वीरलक्ष्म्याः।
सोऽपि त्रैलोक्यहेलाविजयपटुमहाविक्रमः शक्रसूनु-
र्नीतो धिग् छद्मवृत्त्या निधनमधरितस्फारवीरव्रतेन ॥ १९ ॥

लक्ष्मणः — आर्य! नैष दोषः। कुतः —

छद्मना न किमरण्यगोचरान् वागुरादिषु निपातितान् मृगान्।
मारयन्ति मृगयासु धन्विनो येषु यो विधिरदोष एव सः ॥ २० ॥

सुग्रीवः — सत्यमाह कुमारः।

शस्त्राशस्त्रिप्रधनकथनेऽप्यप्रगल्भाः प्रकृत्या
कृत्याकृत्यद्वितयभिदया कष्टमस्पृष्टचित्ताः।
एते केचिद् वयमपि मृगाः किन्तु शाखामृगाख्याः
कोऽन्यो हिंसाविधिरनुपधिस्तावदेतादृशां नः ॥ २१ ॥

---

१. ण: किं कारणमनेन मुनिना. ग. ३. आर्य घ.
२. त: स दुन्दुभेः कङ्कालकूट एव.

(नैपथ्ये)

सुग्रीवपक्षपातं वालिक्षपणं च निष्फलीकुर्वन् ।
वामो राम! विधिस्ते वज्रानलदुस्सहोऽभ्येति ॥ २२ ॥

(सर्वे श्रुत्वा विषादं रूपयन्ति।) (ततः प्रविशति मायावसुः।)

मायावसुः — (सशोकम्) हा आचार्य!

मृत्युं मर्त्यशरादपि स्म लभते मायामृगीभूय यः
सोऽपि श्लाघ्यतमो भवानधिगतः स्वार्थो यतः स्वामिना ।
प्रारम्भे घटिताः फले विघटिता यस्य प्रयत्ना इमे
तस्यैतस्य निरर्थकं मम परं मायावसोर्जीवितम् ॥ २३ ॥

(सावष्टम्भम्) अयमारिप्सितस्तु प्रयत्नो[1] न तथा भविष्यति ।

राम लक्ष्मणसुग्रीवान् कर्तृ नत्र स्थितानिमान् ।
स्वयमेवोज्झितप्राणान् करिष्याम्येव[2] साम्प्रतम् ॥ २४ ॥

यावज्जानकीवार्त्ताङ्गो[3] न हनूमानागमिष्यति[4] तावच्चारणवेषमवलम्ब्य प्रस्तुतं प्रयोक्ष्ये[5] (इति तथा कृत्वोपसर्पति।)

सुग्रीवः — अये! अयं कोऽपि दिव्यः स्वस्तलादितोऽवतरति ।

(सर्वे उत्तिष्ठन्ति मायावसुः सुग्रीवपक्षपातमिति पूर्वोक्तमेव पठति।)

रामः — (सविषादं) भो महाभाग! अत्रोपविश्य ब्रूहि किमेतदिति ।

मायावसुः — (उपविश्य) ननु भवन्तोऽप्युपविशन्तु । सर्वं कथयिष्यामि वज्रहृदयः[6] । (सर्वे उपविशन्ति।)

---

१. त्नः फलिष्यत्येव. ख. ग. घ. ङ.
२. व. घ.
३. रो हनू. ग. ङ.
४. नागमिष्य. ख. ग. घ. ङ.
५. इति कृत्वैव लङ्कानगरात् सत्वरमागतोऽस्मि। (इति चारणवेषो भूत्वोपसर्पति।) ख. ग.घ. ङ.
६. वज्रमयः. क.

सुग्रीवः — महाभाग ! त्वरितमाचक्ष्व, पर्याकुला वयम् ।

मायावसुः[1] — अहं तावद्वज्राङ्गदो नाम चारणो भगवता पुत्रविपत्तिमाकर्ण्य दीर्णहृदयेनेव विमुक्तकण्ठमाक्रन्दता संक्रन्दनेन समादिष्टोऽस्मि ।

सुग्रीवः — किमिति ।

मायावसुः — भद्र वज्राङ्गद !

अस्मद्द्रोहिनिशाचरक्षपणतः क्षेमंकरो नश्चिरं
रामः काममिदन्तु[2] कर्म नितरां निर्माति मर्मव्यथाम् ।
दाराणां हरणादरिः स्फुटमनेनोपेक्षितो रावण-
स्तं जित्वात्मसुहृद् भवन्नपि हतो वालीति कोऽयं क्रमः[3] ॥ २५ ॥

तन्नियतमाधुनिकैः[4] कैश्चन कूटसुहृद्भिः प्रतारितेन प्रकृतिसरलचेतसा तेनेदमाचरितं स्यात् । भवत्वधासनसुहृदं महाराजदशरथमपेक्ष्यैतदस्य साहसं सहिष्यामहे[5] । किञ्च —

पितृव्यपरिलालितो विहितयौवराज्यच्छलात्
पितृव्ययशुचं जहद्वसति मे स नप्ताङ्गदः ।
न वेद नवधीरसौ निभृतवैरमेषां मनो
मनागपि पितृद्रुहां दहनगर्भभस्मोपमम् ॥ २६ ॥

सुग्रीवः — (स्वगतम्) ह ह ह ! दारुणोऽयं मर्मणि प्रहारः ।

लक्ष्मणः — (स्वगतम्) नियतमेष कश्चिन्मायावी प्रलपति । कथन्नाम तादृग्गम्भीरस्तत्रभवान् अखिलकर्मसाक्षी भगवान्महेन्द्रः ईदृशमतिप्रलघुकं[6] वचनमभिधत्ताम् । भवतु सर्वमग्रे स्फुटीभविष्यति । (प्रकाशम्) ततस्ततः ।

---

१. सुः श्रूयताम् अहं. ख. ग. घ. ङ.
२. न्तु नाम नितरां. घ.
३. मः । नियत.
४. तरळ. ग.
५. सहामहे. ग.
६. दृगति. ग.

मायावसुः — तद्गत्वा कुमारमङ्गद[1]मविलम्बितमस्मत्सन्निधिमुपानय । अत्र हि—

गाङ्गे गाङ्गेयपद्मच्युतमधुमधुरे स्वैरपेयेऽपि तोये
स्वेच्छाभोग्येऽपि कल्पद्रुम[2]फलनिकरे निष्फलं दुष्प्रभूणाम् ।
अल्पग्रामाधिपत्यादवनिपरिवृढम्मन्य[3]मन्योन्यकृष्टि-
क्लिष्टश्रीकं किमर्थं कुलमनुचलते बालिशो बालिसूनुः ॥ २७ ॥

इति ।

सुग्रीवः — (लक्ष्मणं प्रति जनान्तिकम्) कुमार! भगवता पुरन्दरेण नितरामुपालब्धाः स्मः ।

लक्ष्मणः — (जनान्तिकम्) नैतदुपपद्यते । पश्य —

परस्त्रीपुत्रस्य स्थितिमनुजदाराभि[4]गमनात्
सतां भिन्दानस्य क्षितिपकुलदम्यस्य दमनात् ।
स्वयं धर्माध्वन्यः स खलु भगवानध्वरभुजा-
मधीशः शक्रोऽपि व्यथत इति सम्भावयति कः ॥ २८ ॥

भवतु सर्वथा श्रोष्यामस्तावत्[5] ।

सुग्रीवः — भद्र वज्राङ्गद! ततस्ततः ।

मायावसुः — ततोऽहं तथेत्यभिधाय किष्किन्धामनुप्राप्य कुमारमङ्गदं विचिन्वानस्तत्रभवत्या तारयाभिहितोऽस्मि ।

वञ्चितां दशमुखेन विचेतुं वल्लभां रघुपतेः किल सीताम् ।
नन्दनो मम पितृव्य[6]निदेशाद्दक्षिणां दिशमगात् कपिसैन्यैः ॥ २९ ॥

---

१. दमस्मत्सन्निधि. ग.
२. मतल.
३. न्यमानोऽन्यकृष्टि. ग.
४. हरणात् ख. घ.
५. त् । (प्रकाशम्) भद्र! ततस्ततः. क.
६. नियोगाद्दक्षिणां. ग.

इति[1]। तदीरितोऽहं दक्षिणां दिशं गच्छन् मध्येमार्गं स्वयम्प्रभाख्यया कयापि दिव्यगुहासीनया दिव्ययोगिन्या कथितोऽस्मि ।

सुग्रीवः — किमिति ।

मायावसुः —

अत्रागतो हनुमदादिभिरन्वितोऽसौ
नप्ता हरेरथ मया शमिताध्वखेदः ।
मद्दर्शितेन च पथा जलधेरवाच[2]-
स्तीरं गतः परमतस्तु परोक्षमेव ॥ ३० ॥

इति । ततो दक्षिणाम्बुधितीरं प्राप्तेन च मया दृष्टः पृष्टवार्तश्च युवराजो मामेवमवादीत् —

सम्पातिर्नाम योऽसौ रविकरनिकरैर्विक्षताः पक्षपालीः
श्रीमद्रामायणस्य श्रवणमनु पुनर्लब्धवान् गृध्रराजः ।
उत्तीर्णार्णोधिमुच्चैर्जवपवनपरिक्षिप्तमैनाकशैलं
लङ्कां प्राप्तं स पश्चादगमदुपकृतिं व्यञ्जयन्नाञ्जनेयम् ॥३१॥

स खलु पक्षिराजो हनुमन्तं सीतादेवीश्च पृष्ठे वहन्नद्य श्वो वा समागमिष्यतीति

सुग्रीवः — (सहर्षं) देव! दिष्ट्या वर्धसे ।

तिस्रो दिशः प्रतिगतेषु कपिप्रवीरे[3]-
ष्वभ्यागतेष्वनवलोक्य विदेहकन्याम् ।
अस्माकमेकमनुषज्जति यं किलाशा
सोऽयं समेष्यति कृतार्थतया हनूमान् ॥ ३२ ॥

---

१. इत्युदीरितोऽहं. क.
२. चं तीरं. क.
३. हरिप्र. ख. ग. घ. ङ.

रामः — सखे! नायमाश्वासकालः। यदत्याहितस्य[1] तावदुपरि प्रतिपादयिष्यमाणस्य पूर्वकथाशरीरमेतदुपवर्ण्यते।

सुग्रीवः — उपपन्नमिदम्। वज्राङ्गद! ततस्ततः।

मायावसुः — ततश्च,

तत्राङ्गदादिषु बलेषु वलीमुखानां
प्रत्यागमं हनुमतः प्रतिपालयत्सु।
सम्पातिराप्तत इरातिपुरादजस्र-
सम्पातिनेत्रजलपूरितवारिराशिः ॥ ३३ ॥

सर्वे — (सविषादं) नियतं तत्र केनचिदत्याहितेन भवितव्यम्। ततस्ततः।

मायावसुः — (स्वगतम्) किमत्र कालक्षेपेण।

तदेव दुस्सहं किञ्चिदाख्यास्याम्यनृतं वचः।
यदेव श्रुतमात्रेण त्रीनिमान् मूर्च्छयिष्यति ॥ ३४ ॥

(प्रकाशं सबाष्पगद्गदम्) कथमतः परं निवेदयिष्यति वज्रहृदयो वज्राङ्गदः। तथापि सम्पातिना कथितं किलेदं निवेद्यते। स तत्रभवान् सम्पातिरतिचिरं रुदित्वाङ्गदादिभिर्निर्बध्यमानः सास्रमिदमवादीत्[2]।

पश्यत्येवाञ्जनेये कनकमणिमयप्राभृतद्रव्यहारी
सीतां प्रीतां विधातुं बहुतरमकरोत् सान्त्वनं पङ्क्तिकण्ठः।
कुर्वन् पादप्रणामं मुहुरपि स यदा तत्प्रसादं न लेभे
रोषाक्रान्तस्तदैनामकरुणमसिना हा ततः किं ब्रवीमि ॥ ३५ ॥

---

१. स्य प्रतिपादयिष्यमाणस्य. क.
२. स्रमवादीत्. ख. ग. घ. ङ.

(सर्वे मूर्च्छिताः पतन्ति।)

मायावसुः — (सहर्षं स्वगतम्) हन्त फलितप्रायो मे मनोरथः (प्रकाशम्) भो रामभद्र! समाश्वसिहि समाश्वसिहि। सौमित्रे! समाश्वसिहि। प्लवगपते! समाश्वसिहि।

रामः — (किञ्चिदाश्वस्य) हा देवि देवयजनसंभवे! हा मदनुगमनैकतान-तापास्तसमस्तबान्धवे! हा महारण्यवासप्रियसखि! क्व गतासि! देहि मे प्रतिवचनम् (इति मूर्च्छति।)

लक्ष्मणः — (आश्वस्य)[1] आर्य! समाश्वसिहि समाश्वसिहि। सखे सुग्रीव! समाश्वस्य समाश्वासयात्यन्तमापन्नमार्यम्।

सुग्रीवः — (आश्वस्य) हा देवि विश्वम्भरासंभवे!

छायाप्युज्झति मूर्च्छितान्धतमसं नीरन्ध्रवीरुद्द्रुम-
त्रातापास्तगभस्तिमालिकिरणं कान्तारमाप्तं जनम्।
देवि! त्वं तु कदापि तादृशमपि त्यक्तुं न जानासि यत्
प्रेयांसं तदहो सतीव्रतमिदं तीव्रं तवैव[2] ध्रुवम्॥ ३६॥

देव! समाश्वसिहि समाश्वसिहि।

रामः — (आश्वस्य) अयि प्रेयसि!

क्लान्तौ यौ मणिकुट्टिमेऽपि वलने[3] पादौ तवादौ मया
तावेवोत्कटकण्टकाश्मनि वने पापेन विन्यासितौ।
तेनैवालमतृप्यता विसलतामृद्वी तवेयं तनुः
प्रक्षिप्ता शिखिनीव पुष्पकलिका रक्षोसिधारामुखे॥ ३७॥

(इति मुह्यति।)

---

१. स्य) समा. घ.
२. 'तदेव' ख.
३. खलने. ग. ङ:

लक्ष्मणः — भोः कष्टम् ।

श्रवणकटु यदुक्तं देवि ! मारीचमाया-
हरिणहरणलोभप्रार्थितापत्प्रवृत्तौ ।
तदपि विदिततत्त्वस्याशु मे जीर्णमन्त-
र्भृशमयमभितापः कुत्र जीर्येन्ममार्ये ! ॥ ३८ ॥

मायावसुः — (स्वगतम्) अस्मद्द्रोहिणस्तत्रायमभितापः शरीरेण सह त्वरसा जीर्यतीति सौमित्रे ! विदाङ्कुरु ।

सुग्रीवः — भद्र वज्राङ्गद ! तदवस्थान्तरमवलोकयता हनूमता किमनुष्ठितम् ।

मायावसुः — तदेवानुष्ठितं किल महावीरेण ।

सुग्रीवः — किन्तदेवेति ।

मायावसुः — यदात्मयशसोऽनुरूपम् ।

सुग्रीवः — व्यक्तमभिधेहि ।

मायावसुः —

उद्यानानि विमर्दयन् मणिगृहद्वास्तोरणान् दारयन्
भञ्जन् कुञ्जशतानि कुञ्जरबलान् निघ्नन् निशाचारिणः ।
क्रुध्यन्निद्धमदोद्धुतः[1] स हनुमानित्थं प्रवृद्धे[2] रणे
वीरेणेन्द्रजिता कृतः कृतधिया सद्यः कृतान्तातिथिः ॥ ३९ ॥

सुग्रीवः — हा हतोऽस्मि । अथवा —

---

१. महोद्ध. ख.
२. वृत्ते. ख. ग. छ. वृत्तो. घ.

प्रभञ्जनेनोपहितोऽञ्जनोदरे प्रभावतोऽधःकृतसर्वदैवतः।
अनागतातीतसमस्तवस्तुविद्विनाशमायातु कथं स मारुतिः ॥ ४० ॥

कुमार! नैतदुपपद्यते।

लक्ष्मणः — भो वज्राङ्गद! अङ्गदादिभिः पुनरिदमाकर्ण्य किं प्रतिपन्नम्।

मायावसुः —

प्रायोपवेशनेन प्राणानजहुर्महानुभावास्ते।
स्वजनविनाशे को वा जीवितुमीष्टे भवन्त इव ॥ ४१ ॥

(प्रविश्यापटाक्षेपेण संभ्रान्तो दधिमुखः)

वत्स भागिनेय सुग्रीव!

दृष्ट्वा सीतां प्रहृष्टो रजनिचरपुरं भस्मसात्कृत्य सद्य-
स्तीर्त्वा वारान्निधानं सकलकपिबलैः संगतः सोऽङ्गदाद्यैः।
सम्प्राप्तोऽसौ हनूमांस्तव तु मधुवनं निर्दयं मर्दयन्ति
प्रौढाहङ्कारभाजो ह ह ह जनमिमं त्वज्जनास्तर्जयन्ति ॥ ४२ ॥

मायावसुः — (सखेदमात्मगतम्) हा कष्टमग्निसाद्भूता किल सा महाराजनगरी।

अमरावति! साम्प्रतं त्वमुच्चैरलके! त्वं च विवृद्धिमश्नुवाथे।
अतिवेलमनंस्त या तृणं वां कपिना सा किल दह्यते[1] स्म लङ्का ॥४३॥

(विमृश्य) मया तु तदानीमेवेदमुत्प्रेक्षितं यदा किलाविमृश्यकारिभिर्नक्तञ्चरैरस्य हनुमतो लाङ्गूलमादीपयितुं प्रक्रान्तम्।

रामः — (सहर्षमुत्थाय)

---

१. ल हन्यते स्म. घ.

क्वासौ भासामधीशाऽधिगतविततव्याकृदम्भोनिधानः
क्वासावुत्कण्ठितान्तःपुरविरहशिखिप्रावृषेण्याम्बुवाहः ।
क्वासावस्माकमन्तर्[1]निविडतमतमोमण्डलीचण्डभानुः
क्वासावासन्नदासो मम विमतपुरप्लोषरुद्रो हनूमान् ॥ ४४ ॥

दधिमुखः — (प्रणम्य) अयमयमागच्छति जाम्बवदङ्गदनीलगवयगवाक्षप्रमुखवलीमुखबलपरिवारो मारुतिर्वैदेह्या प्रतिप्रेषितं प्रत्यभिज्ञानचूडामणिं प्राभृतीकृत्य भवन्तं प्रणन्तुकामः ।

मायावसुः—(सोद्वेगं स्वगतम्) कष्टमिहापि निष्फलो मे प्रयत्नः । तत्सत्वर[2]मितः प्रद्रवामि[3] (इति तिरोभूय निष्क्रान्तः ।)

सुग्रीवः — कुमार !

तिरोभूतो भीतो धृतकपटदिव्याकृतिरसौ
दुरात्मा येनामी वयमधिकमाधिं प्रगमिताः ।

लक्ष्मणः —

असौ मन्ये मायावसुरसुहृदाराधनपरः
पुरा मद्बाणेन प्रधनभुवि नीतो विघसताम् ॥ ४५ ॥

सुग्रीवः — भवतु प्रत्यासन्नो हि सर्वरक्षोविक्षोदमहोत्सवः, तावदवधि जीवतु तपस्वी मायावसुः ।

रामः — सखे सुग्रीव !

आयान्तमेनमनपायभुजावलेप[4]-
प्रध्वंसिताशरपुरश्रियमाञ्जनेयम् ।

---

१. 'तर' ग.
२. रमतः ख.
३. मि (निष्क्रान्तः ।) क.
४. मभिजातभुजापदान. ख. ग. घ. ङ.

सम्प्राप्य साम्प्रतमितः कतिचित्पदानि
सम्भावयाम समयोचितमाचराम ॥ ४६ ॥

(इति निष्क्रान्तास्सर्वे।)

पञ्चमोऽङ्कः।

अथ षष्ठोऽङ्कः।

(नैपथ्ये)

स्वागतमागन्तुकायाः।

(ततः प्रविशति वनदेवता।)

वनदेवता — (सविस्मयमग्रतोऽवलोक्य[1])

उत्तप्तस्वर्णभित्तिस्फुटघटितमहेन्द्राश्मनो[2] वेश्मपङ्क्ते-
रुद्योतैः पीतनीलैः स्थिरचपलघनभ्रान्तिमभ्रे दिशन्ती।
संक्रीडत्किङ्किणीकध्वजपटपटलीवातधूतोडुसङ्घा
लङ्का मे काममक्ष्णोरियममरपुरप्रेक्षणे त्रिक्षिणोति ॥ १ ॥

(पुनर्नैपथ्ये)

स्वागतमागन्तुकायाः। (वनदेवता अनाकर्णितकेन)

स्वर्वन्दीमुखचन्द्रकान्तिकलितक्रीडाचकोराङ्गना-
व्यामोहेषु गृहेषु चन्द्रमणयस्तद्बाष्पतोयाप्लुताः।
दृश्यन्ते मणिवेदिकासु नितरां निष्यन्दमाना इव
व्यक्तं वक्ति भुजाविजृम्भितमियं लङ्केव लङ्कापतेः ॥ २ ॥

---

1. सस्मितमग्र. ग. 2. श्मना. ख.

(नैपथ्ये)

स्वागतमागन्तुकायाः ।

वनदेवता—(आकर्ण्य)[1]अये को नु खल्वयमदृश्यमूर्तिर्मां प्रति समुदाचरति ।

(नैपथ्ये)

इयमहं लङ्कापुराधिदेवता निर्दग्धलङ्कापुरेण तत्रभवता हनुमता निशिचरेन्द्रनिकेतनान्निर्वासितापि सम्प्रति रामभद्रमाश्रितवतः कुमारविभीषणस्योदयमाशासाना तिरस्कृतमूर्ति[2]श्चिरपरिचितामिमां पुरीमुज्झितुमक्षमत्वाच्च निभृतमिहैव पर्यटामि । लङ्कालक्ष्मीरिति [3]च जना मां व्याहरन्ति ।

वनदेवता— (सकौतुकम्) सखि लङ्कालक्ष्मि ! विस्रब्धं प्रकाशयात्मानम् । सगन्धा खलु तवाहं वनदेवता ।

(प्रविश्य)

लङ्कालक्ष्मीः — किन्नामधेयामत्रभवतीमवगच्छामि ।

वनदेवता — भद्रे ! मन्दारवत्यस्मि ।

लङ्कालक्ष्मीः — सखि मन्दारवति ! कुतस्तावदागम्यते किंप्रयोजनो वा तव ल[4]ङ्काद्वीपप्रवेशः ।

वनदेवता — सखि ! सर्वमावेदयिष्यामि । किन्त्विदमेव प्रथममवगन्तुमिच्छामि । इयं हि राक्षसराजधानी—

तुङ्गप्रासादशृङ्गस्खलितजलधरोत्सङ्गनिस्सङ्गनिर्य-
द्धारावारां प्रवाहैरविरतमनदीमातृकारामभूमिः ।
लङ्कालङ्कार एको मणिकनकमयो मध्यमाया जगत्या
दग्धा दग्धेति केन स्फुटमुपघटितः कोऽपि मिथ्याप्रवादः ॥ ३ ॥

लङ्कालक्ष्मीः — सखि ! नायं मिथ्याप्रवादः । कुतः —

---

१. र्ण्य. को वा नु खल्वदृश्य. ग.
२. श्चिरंपरि. ग.
३. च जानीहि मां व्याहरन्तीम्. ग.
४. ङ्कापुरप्रवेशः. ख.

निर्दग्धानि गृहाणि यानि हरिणा भग्नाश्च ये पादपा
ये वा कृत्रिमपर्वता विदलिता वाप्यश्च याः पूरिताः ।
सर्वं पूर्ववदेव तद्दशमुखो वन्दारुभिः कारुभिः
सद्यः कारयति स्म किं पुनरहो दुस्साधमुत्साहिभिः ॥ ४ ॥

वनदेवता — अहो सर्वातिशायिनी खलु शक्तिसामग्री दशग्रीवस्य ।

'अथवा किमद्भुतमद्भुतपराक्रमधुरन्धरे दशकन्धरे । कुतः—'

यद्भ्रातृगलिरोहणद्रुमजुषस्त्रस्ताः समस्ताहित-
प्राणौघैरुदरंभरैरपकृपापातात् कृपाणोरगात् ।
मन्त्रज्ञा अपि मण्डलस्थितिविदोऽप्यक्षामरक्षाभृतो-
ऽप्यन्तस्संभ्रमजृम्भितानि भिषजाश्चक्रुर्न शक्रादयः ॥ ५ ॥

लङ्कालक्ष्मीः — सखि ! कियच्चिरमधमर्णतामात्मनो नापहस्तयसि ।

वनदेवता — अयि ! का ममाधमर्णता ।

लङ्कालक्ष्मीः — ननु पूर्वप्रश्नस्य मह्यमुत्तरं धारयसि ।

वनदेवता — (सस्मितम्) सखि ! तर्हि श्रूयताम् । अहं खलु भगवत्या भगवतः प्रथमचुलुकाचान्तचतुस्समुद्रस्य विन्ध्याचलशिखरश्वयथुशोषणभिषजः कुम्भसम्भवस्य मुनेः सहधर्मचारिण्या निजतनयनिर्विशेषोपलालितरामभद्रया लोपामुद्रया जनस्थाननिवासेषु जनकजायाः प्रियसखीति विस्रम्भादिदमभिहितास्मि ।

लङ्कालक्ष्मीः — किमिति ।

वनदेवता — भद्रे मन्दारवति !

सख्यास्ते जनकाधिराजदुहितुस्तत्तादृशं वैशसं
शृण्वत्या मम दीर्णसन्धि हृदयं नाद्यापि संरोहति ।
वत्सो मे रघुनन्दनः प्रियसुतो धर्मेण सा च स्नुषा
विश्लेषादनयोर्मिथः कथमहं खिन्दे न मन्देतरम् ॥ ६ ॥

तदिदञ्च विदाङ्कुरु —

कुवलयदामभ्रान्त्या कालव्यालीव मानुषीबुद्ध्या ।
आत्मविनाशाय भुवमब्धिसुता रावणेन हृता ॥ ७ ॥

लङ्कालक्ष्मीः — सत्यमाह त्रैकाल्यवेदिनी तत्रभवती लोपामुद्रा । ततस्ततः ।

वनदेवता — तदिदानीं प्रोषितभर्तृकाया वत्सायाः —

कियत् कार्श्यं धत्ते प्रकृतिसुकुमारा तनुलता
कियद्दीर्घास्तप्ताधरकिसलयाः श्वासपवनाः ।
दिवा किंव्यापारा निशि च किमवस्था पुनरसा-
विति ज्ञातव्यं नो भवति भवती तत्र घटताम् ॥ ८ ॥

लङ्कालक्ष्मीः — अहो सर्वसाधारणबुद्धेरपि मुनिपत्न्याः तस्यामसाधारणो वात्सल्यातिशयः । ततस्ततः ।

वनदेवता — तत् त्वमितो गगनाध्वना लङ्काद्वीपमधिगम्य तत्रस्थाया वत्साया वैदेह्या वार्तामवगम्यागच्छ । किञ्च, अत्रिमुनेर्गृहिण्यानसूयया वत्सायै पातिव्रत्यस्य[1] दार्ढ्योपपत्तये तपस्तेजसा निर्मितं दिव्यं यत्किञ्चिद्वस्त्व-नुप्रेषितं तदिदमपि तस्यै प्रतिपादयेति ।

लङ्कालक्ष्मीः — (सकौतुकम्) सखि मन्दारवति ! तत्किन्नाम ।

वनदेवता — (पटान्तादुद्धृत्य दर्शयित्वा) सखि लङ्कालक्ष्मि ! अयं हि—

अत्रेरुदारतपसस्तपसो विवर्तः
कोऽप्येष मङ्गलमहानिधिरङ्गरागः ।
संवर्भयत्यति हि यः कुलपालिकाना-
मन्तर्बहिश्च दृढतीव्रसतीव्रतेन ॥ ९ ॥

---

१ त्यदार्ढ्योपपत्तये. ग. ङ २ नुप्रहितम् । ख. ग. ङ.

लङ्कालक्ष्मीः — साध्विदानीमिदमीदृगवस्थायाः सीतायाः ।

वनदेवता — तद् भद्रे! कुत्र प्रतिवसति तत्रभवती वैदेही ।

लङ्कालक्ष्मीः — सखि ! इतस्तावत् ।

(उभे परिक्रामतः ।)

लङ्कालक्ष्मीः — (अङ्गुल्या निर्दिश्य)

शोकाविग्नामशोकद्रुमविपिनतले शिंशपावृक्षमूले
पश्यैनां भूपरागैरिव भृशमरुणैराचितां भूपरागैः ।
कामं न स्नाति किन्तु स्नपयति गलितैरश्रुभिर्गात्रमुष्णैः
प्राचीमूले कलेव स्वयममृतरुचेः कार्श्यमेषा बिभर्ति ॥ १० ॥

वनदेवता — (दृष्ट्वा सकरुणास्नम्[१]) हा कथमेवमवस्था मे प्रियसखी वैदेही । अथवा –

मत्वा तृणाय गृहबन्धुसखीकदम्बं
दुस्सञ्चरे वनपथेऽपि यमन्वयासीत् ।
प्राणादपि प्रियहितेन हि तेन साध्वी
पत्या विना श्वसिति यत्तदिदं गरीयः ॥ ११ ॥

सखि ! के इमे सौम्यदर्शने स्त्रियौ जानकीमन्वासाते ।

लङ्कालक्ष्मीः — (अङ्गुल्या निर्दिश्य) एषा खलु कुमारविभीषणस्य धात्री त्रिजटा नाम अन्या पुनरस्य गृहिणी सरमा नाम ।

आनर्तितभ्रुकुटिभीषणभाषणानां
मध्येऽपि काममुषिता रजनीचरीणाम् ।
नातीव भीतिमुपयात्यनयोर्वचोभि-
राश्वासिता सुमधुरैर्जनकेन्द्रपुत्री ॥ १२ ॥

---

१. रुणम्. ख. ग. ङ.

लक्ष्मणः — भोः कष्टम् ।

श्रवणकटु यदुक्तं देवि ! मारीचमाया-
हरिणहरणलोभप्रापितापत्प्रवृत्तौ ।
तदपि विदिततत्त्वस्याशु मे जीर्णमन्त-
र्भृशमयमभितापः कुत्र जीर्येन्ममार्ये ! ॥ ३८ ॥

मायावसुः — (स्वगतम्) अस्मद्द्रोहिणस्तवायमभितापः शरीरेण सह त्वरसा जीर्यतीति सौमित्रे ! विदाङ्कुरु ।

सुग्रीवः — भद्र वज्राङ्गद ! तदवस्थान्तरमवलोकयता हनूमता किमनुष्ठितम् ।

मायावसुः — तदेवानुष्ठितं किल महावीरेण ।

सुग्रीवः — किन्तदेवेति ।

मायावसुः — यदात्मयशसोऽनुरूपम् ।

सुग्रीवः — व्यक्तमभिधेहि ।

मायावसुः —

उद्यानानि विमर्दयन् मणिगृहद्वास्तोरणान् दारयन्
भञ्जन् कुञ्जशतानि कुञ्जरबलान् निघ्नन् निशाचारिणः ।
क्रुध्यन्निद्धमदोद्धतः[1] स हनुमानित्थं प्रवृद्धे[2] रणे
वीरेणेन्द्रजिता कृतः कृतधिया सद्यः कृतान्तातिथिः ॥ ३९ ॥

सुग्रीवः — हा हतोऽस्मि । अथवा —

१. महोद्ध. ख.
२. वृत्ते. ख. ग. ङ. वृत्तो. घ.

प्रभञ्जनेनोपहितोऽञ्जनोदरे प्रभावतोऽधःकृतसर्वदैवतः।
अनागतातीतसमस्तवस्तुविद्विनाशमायातु कथं स मारुतिः ॥ ४० ॥

कुमार! नैतदुपपद्यते।

लक्ष्मणः — भो वज्राङ्गद! अङ्गदादिभिः पुनरिदमाकर्ण्य किं प्रतिपन्नम्।

मायावसुः —

प्रायोपवेशनेन प्राणानजहुर्महानुभावास्ते।
स्वजनविनाशे को वा जीवितुमीष्टे भवन्त इव ॥ ४१ ॥

(प्रविश्यापटाक्षेपेण संभ्रान्तो दधिमुखः)

वत्स भागिनेय सुग्रीव!

दृष्ट्वा सीतां प्रहृष्टो रजनिचरपुरं भस्मसात्कृत्य सद्य-
स्तीर्त्वा वारान्निधानं सकलकपिबलैः संगतः सोऽङ्गदाद्यैः।
सम्प्राप्तोऽसौ हनूमांस्तव तु मधुवनं निर्दयं मर्दयन्ति
प्रौढाहङ्कारभाजो ह ह ह जनमिमं त्वज्जनास्तर्जयन्ति ॥ ४२ ॥

मायावसुः — (सखेदमात्मगतम्) हा कष्टमग्निमाद्भूता किल सा महाराजनगरी।

अमरावति! साम्प्रतं त्वमुच्चैरलके! त्वं च विवृद्धिमश्नुवाथे।
अतिवेलममंस्त या तृणं वां कपिना सा किल दह्यते[1] स्म लङ्का ॥४३॥

(विमृश्य) मया तु तदानीमेवेदमुत्प्रेक्षितं यदा किलाविमृश्यकारिभिर्नक्तञ्चरैरस्य हनुमतो लाङ्गूलमादीपयितुं प्रक्रान्तम्।

रामः — (सहर्षमुत्थाय)

---

१. ल हन्यते स्म. घ.

क्वासौ भासामधीशान्वयगतविततव्याकृदम्भोनिधानः
क्वासावुत्कण्ठितान्तःपुरविरहशिखिप्रावृषेण्याम्बुवाहः ।
क्वासावस्माकमन्तर्निविडतम[1]तमोमण्डलीचण्डभानुः
क्वासावासन्नदासो मम विनतपुरस्तोपरुद्धो हनूमान् ॥ ४४ ॥

दधिमुखः — (प्रणम्य) अयमयमागच्छति जाम्बवदङ्गदनीलगवयगवाक्ष-प्रमुखवलीमुखवलपरिवारो मारुतिर्वैदेह्या प्रतिप्रेषितं प्रत्यभिज्ञानचूडामणिं प्राभृतीकृत्य भवन्तं प्रणन्तुकामः ।

मायावसुः—(सोद्वेगं स्वगतम्) कष्टमिहापि निष्फलो मे प्रयत्नः । तत्सत्वर-[2]मितः प्रद्रवा[3]मि (इति तिरोभूय निष्क्रान्तः ।)

सुग्रीवः — कुमार !

तिरोभूतो भीतो धृतकपटदिव्याकृतिरसौ
दुरात्मा येनामी वयमधिकमाधिं प्रगमिताः ।

लक्ष्मणः —

असौ मन्ये मायावसुरसुहृदाराधनपरः
पुरा मद्बाणेन प्रधनभुवि नीतो विघसताम् ॥ ४५ ॥

सुग्रीवः — भवतु प्रत्यासन्नो हि सर्वरक्षोविक्षोदमहोत्सवः, तावदवधि जीवतु तपस्वी मायावसुः ।

रामः — सखे सुग्रीव !

आयान्तमेनमनपा[4]यभुजावलेप-
प्रध्वंसिताशरपुरश्रियमाञ्जनेयम् ।

१. 'तर' ग.
२. रमतः ख.
३. मि (निष्क्रान्तः ।) क.
४. मभिजातभुजापदान. ख. ग. घ. ङ.

सम्प्राप्य साम्प्रतमितः कतिचित्पदानि
सम्भावयाम समयोचितमाचराम ॥ ४६ ॥

(इति निष्क्रान्तास्सर्वे।)

पञ्चमोऽङ्कः ।

अथ षष्ठोऽङ्कः ।

(नैपथ्ये)

स्वागतमागन्तुकायाः ।

(ततः प्रविशति वनदेवता ।)

वनदेवता — (सविस्मयमग्रतोऽवलोक्य)[1]

उत्तप्तस्वर्णभित्तिस्फुटघटितमहेन्द्राश्मनो[2] वेश्मपङ्क्ते-
रुद्योतैः पीतनीलैः स्थिरचपलघनभ्रान्तिमभ्रे दिशन्ती ।
संक्रीडत्किङ्किणीकध्वजपटपटलीवातधूतोडुसङ्घा
लङ्का मे काममक्ष्णोरियममरपुरप्रेक्षणे विक्षिणोति ॥ १ ॥

(पुनर्नेपथ्ये)

स्वागतमागन्तुकायाः । (वनदेवता अनाकर्णितकेन)

स्वर्वन्दीमुखचन्द्रकान्तिकलितक्रीडाचकोराङ्गना-
व्यामोहेषु गृहेषु चन्द्रमणयस्तद्बाष्पतोयाप्लुताः ।
दृश्यन्ते मणिवेदिकासु नितरां निष्यन्दमाना इव
व्यक्तं वक्ति भुजाविजृम्भितमियं लक्ष्मीव लङ्कापतेः ॥ २ ॥

---

१. सस्मितमग्र. म.   २. श्मना. ख.

(नैपथ्ये)

स्वागतमागन्तुकायाः।

वनदेवता—(आकर्ण्य)[1]अये को नु खल्वयमदृश्यमूर्तिर्मां प्रति समुदाचरति।

(नैपथ्ये)

इयमहं लङ्कापुराधिदेवता निर्दग्धलङ्कापुरेण तत्रभवता हनुमता निशिचरेन्द्रनिकेतनान्निर्वासितापि सम्प्रति रामभद्रमाश्रितवतः कुमारविभीषणस्योदयमाशासाना तिरस्कृतमूर्तिश्चि[2]रपरिचितामिमां पुरीमुज्झितुमक्षमत्वाच्च निभृतमिहैव पर्यटामि। लङ्कालक्ष्मीरिति च[3] जना मां व्याहरन्ति।

वनदेवता— (सकौतुकम्) सखि लङ्कालक्ष्मि! विस्रब्धं प्रकाशयात्मानम्। सगन्धा खलु तवाहं वनदेवता।

(प्रविश्य)

लङ्कालक्ष्मीः — किन्नामधेयामत्रभवतीमवगच्छामि।

वनदेवता — भद्रे! मन्दारवत्यस्मि।

लङ्कालक्ष्मीः — सखि मन्दारवति! कुतस्तावदागम्यते किंप्रयोजनो वा तव लङ्का[4]द्वीपप्रवेशः।

वनदेवता — सखि! सर्वमावेदयिष्यामि। किन्त्विदमेव प्रथममवगन्तुमिच्छामि। इयं हि राक्षसराजधानी—

तुङ्गप्रासादशृङ्गस्खलितजलधरोत्सङ्गनिस्सङ्गनिर्य-
द्धारावारां प्रवाहैरविरतमनदीमातृकारामभूमिः।
लङ्कालङ्कार एको मणिकनकमयो मध्यमाया जगत्या
दग्धा दग्धेति केन स्फुटमुपघटितः कोऽपि मिथ्याप्रवादः॥ ३॥

लङ्कालक्ष्मीः — सखि! नायं मिथ्याप्रवादः। कुतः—

---

१. र्ण्य. को वा नु खल्वदृश्य. ग.
२. श्चिरंपरि. ग.
३. च जानीहि मां व्याहरन्तीम्. ग.
४. ङ्कापुरप्रवेशः. ख.

निर्दग्धानि गृहाणि यानि हरिणा भग्नाश्च ये पादपा
ये वा कृत्रिमपर्वता विदलिता वाप्यश्च याः पूरिताः ।
सर्वं पूर्ववदेव तद्दशमुखो वन्दारुभिः कारुभिः
सद्यः कारयति स्म किं पुनरहो दुस्साधमुत्साहिभिः ॥ ४ ॥

वनदेवता — अहो सर्वातिशायिनी खलु शक्तिसामग्री दशग्रीवस्य ।
'अथवा किमद्भुतमद्भुतपराक्रमधुरन्धरे दशकन्धरे । कुतः—'

यद्बाहाबलिरोहणद्रुमजुषस्त्रस्ताः समस्ताहित-
प्राणौघैरुदरंभरैरपकृपापातात् कृपाणोरगात् ।
मन्त्रज्ञा अपि मण्डलस्थितिविदोऽप्यक्षामरक्षाभृतो-
ऽप्यन्तस्संभ्रमजृम्भितानि भिषजाश्चक्रुर्न शक्रादयः ॥ ५ ॥

लङ्कालक्ष्मीः — सखि ! कियच्चिरमधमर्णतामात्मनो नापहरतयसि ।

वनदेवता — अयि ! का ममाधमर्णता ।

लङ्कालक्ष्मीः — ननु पूर्वप्रश्नस्य मह्यमुत्तरं धारयसि ।

वनदेवता — (सस्मितम्) सखि ! तर्हि श्रूयताम् । अहं खलु भगवत्या भगवतः प्रथमचुलुकाचान्तचतुस्समुद्रस्य विन्ध्याचलशिखरश्वयथुशोषणभिषजः कुम्भसम्भवस्य मुनेः सहधर्मचारिण्या निजतनयनिर्विशेषोपलालितरामभद्रया लोपामुद्रया जनस्थाननिवासेषु जनकजायाः प्रियसखीति विस्रम्भादिद-मभिहितास्मि ।

लङ्कालक्ष्मीः — किमिति ।

वनदेवता — भद्रे मन्दारवति !

सख्यास्ते जनकाधिराजदुहितुस्तत्तादृशं वैशसं
शृण्वत्या मम दीर्णसन्धि हृदयं नाद्यापि संरोहति ।
वत्सो मे रघुनन्दनः प्रियसुतो धर्मेण सा च स्नुषा
विश्लेषादनयोर्मिथः कथमहं खिन्दे न मन्देतरम् ॥ ६ ॥

तदिदञ्च त्रिदाङ्कुर —

कुवलयदामभ्रान्त्या कालव्यालीव मानुषीबुद्ध्या ।
आत्मविनाशाय भुवमविधसुता रावणेन हृता ॥ ७॥

लङ्कालक्ष्मीः — सत्यमाह त्रैकाल्यवेदिनी तत्रभवती लोपामुद्रा । ततस्ततः ।

वनदेवता — तदिदानीं प्रोषितभर्तृकाया वत्सायाः —

कियत् कार्श्यं धत्ते प्रकृतिसुकुमारा तनुलता
कियद्दीर्घास्तप्ताधरकिसलयाः श्वासपवनाः ।
दिवा किंव्यापारा निशि च किमवस्था पुनरसा-
विति ज्ञातव्यं नो भवति भवती तत्र घटताम् ॥ ८ ॥

लङ्कालक्ष्मीः — अहो सर्वसाधारणबुद्धेरपि मुनिपत्न्याः तस्यामसाधारणो वात्सल्यातिशयः । ततस्ततः ।

वनदेवता — तत् त्वमितो गगनाध्वना लङ्काद्वीपमधिगम्य तत्रस्थाया वत्साया वैदेह्या वार्तामवगम्यागच्छ । किञ्च, अत्रिमुनेर्गृहिण्यानसूयया वत्सायै पातिव्रत्यस्य[1] दाढर्योपपत्तये तपस्तेजसा निर्मितं दिव्यं यत्किञ्चिद्वस्त्व-[2]नुप्रेषितं तदिदमपि तस्यै प्रतिपादयेति ।

लङ्कालक्ष्मीः — (सकौतुकम्) सखि मन्दारवति ! तत्किन्नाम ।

वनदेवता — (पटान्तादुद्धृत्य दर्शयित्वा) सखि लङ्कालक्ष्मि ! अयं हि—

अत्रेरुदारतपसस्तपसो विवर्तः
कोऽप्येष मङ्गलमहानिधिरङ्गरागः ।
संवर्धयत्यति हि यः कुलपालिकाना-
मन्तर्बहिश्च दृढतीव्रसतीव्रतेन ॥ ९ ॥

---

१ त्यदाढर्यापपत्तये. ग. ङ २ नुप्रहितम् । ख. ग. ङ.

लङ्कालक्ष्मीः — साध्विदानीमिदमीदृगवस्थायाः सीतायाः ।

वनदेवता — तद् भद्रे! कुत्र प्रतिवसति तत्रभवती वैदेही।

लङ्कालक्ष्मीः — सखि! इतस्तावत् ।

(उभे परिक्रामतः ।)

लङ्कालक्ष्मीः — (अङ्गुल्या निर्दिश्य)

शोकाविग्नामशोकद्रुमविपिनतले शिंशपावृक्षमूले
पश्यैनां भूपरागैरिव भृशमरुणैराचितां भूपरागैः ।
कामं न स्नाति किन्तु स्नपयति गलितैरश्रुभिर्गात्रमुष्णैः
प्राचीमूले कलेव स्वयममृतरुचेः कार्श्यमेषा बिभर्ति ॥ १० ॥

वनदेवता — (दृष्ट्वा सकरुणाक्षम्[1]) हा कथमेवमवस्था मे प्रियसखी वैदेही।
अथवा –

मत्वा तृणाय गृहबन्धुसखीकदम्बं
दुस्सञ्चरे वनपथेऽपि यमन्वयासीत् ।
प्राणादपि प्रियहितेन हि तेन साध्वी
पत्या विना श्वसिति यत्तदिदं गरीयः ॥ ११ ॥

सखि! के इमे सौम्यदर्शने स्त्रियौ जानकीमन्वासाते ।

लङ्कालक्ष्मीः — (अङ्गुल्या निर्दिश्य) एषा खलु कुमारविभीषणस्य धात्री त्रिजटा नाम अन्या पुनरस्य गृहिणी सरमा नाम ।

आनर्तितभ्रुकुटिभीषणभाषणानां
मध्येऽपि काममुषिता रजनीचरीणाम् ।
नातीव भीतिमुपयात्यनयोर्वचोभि-
राश्वासिता सुमधुरैर्जनकेन्द्रपुत्री ॥ १२ ॥

---

१. रुणम् . ख. ग. ङ.

तदेनामुपसरतु भवती । अहमपि तिरस्कृतशरीरा यथापुरमिह पर्यटामि ।

वनदेवता — सखि! तथास्तु । (इति निष्क्रान्ते ।)

(प्रवेशकः ।)

(ततः प्रविशति यथानिर्दिष्टा सीता त्रिजटा सरमा च ।)

त्रिजटा — पुत्रि सुश्रिये जानकि!

कोकी शोकं त्यजति रजनीकालदूरीकृतापि
प्रातः प्राप्य प्रियतममिदं नाम दृष्टान्तयन्ती ।
द्वित्रानद्यप्रभृति दिवसान् जीवितं त्वं यतेथा
द्राघिष्ठत्वं न खलु विपदो दृश्यते त्वादृशीषु ॥ १३ ॥

सरमा — (क) हला जाणइ जुत्तं भणादि अम्बा तिअडा । ण खु तुह्मारिसीओ महापुरिसघरिणीभावसोहग्गसालिणीओ अच्चन्तदुःखभाइणीओ होस्सन्ति । किंदु,

जोह्णाए वि ण जह्णीलहरिआविच्छड्डसच्छाअ किं
पव्वाओ तुहिणुक्करेण जणिओ कंचि क्खणं लक्खइ ।
एव्वं दव्वविहाणदुव्विलसिअं सज्जो सअं झिज्जए
कालो च्चेअ सुहासुहाण सहसा संमेळणं काळणम् ॥ १४ ॥

(क) हला जानकि! युक्तं भणत्यम्बा त्रिजटा । न खलु युष्मादृश्यो महापुरुषगृहिणीभावसौभाग्यशालिन्योऽत्यन्तदुःखभागिन्यो भविष्यन्ति । किन्तु,

ज्योत्स्नाया अपि न जाह्नवीलहरिकाविच्छर्दस्वच्छायाः किं
प्रम्लायस्तुहिनोत्करेण जनितः कञ्चित्क्षणं लक्ष्यते ।
एवं दैवविधानदुर्विलसितं सद्यः स्वयं क्षीयते
काल एव सुखासुखयोः सहसा सम्मेलनं कारणम् ॥

सीता —(सास्रम्) (क) अम्ब तिअडे! पुव्वं खु जिस्से णिमेस-जणिओ वि अय्यउत्तमुहअंदसंदंसणप्पच्चूहो अदिदूसहो संवुत्तो। सा वि अहं एत्तिअं कालं अय्यउत्तेण विरहिआ जीवामित्ति अहो वज्जलेव-घडिआ विअ मे पाणा।

त्रिजटा — पुत्रि एवमेतत्। कुतः —

क्लान्तौ यौ तव वासवेश्मनि किल न्यस्तौ मणिप्रस्तरे
पादौ तौ परुषाश्मकण्टकचिते मार्गे न यन्मम्लतुः।
यत्पादाब्जरजोनुवृत्तिपरतालब्धः स भाग्योदयो
भर्त्रा तेन विना विडम्ब इव ते वैदेहि देहादरः॥ १५॥

तथापि ब्रवीमि —

असूर्या नाम ये लोका अन्धेन तमसा वृताः।
तांस्ते प्रत्यभिगच्छन्ति ये के चात्महनो जनाः॥ १६॥

इति हि पारीणका आमनन्ति। अतो नात्महत्यां कर्तुमर्हसीति।

सरमा — (ख) अयि अविस्सम्भशीळे किं! एत्थ वि अणासंघो, जं पडिगहिअचूळामणिणा पट्ठिउं उवक्कन्तेण हणुमन्तेण आचक्खिअं, तं जह। (संस्कृतमाश्रित्य)

(क) अम्ब त्रिजटे! पूर्वं खलु यस्या निमेषजनितोऽप्यार्यपुत्रमुखचन्द्र-सन्दर्शनप्रत्यूहोऽतिदुःसहः संवृत्तः। साप्यहमेतावन्तं कालमार्यपुत्रेण विरहिता जीवामीत्यहो वज्रलेपघटिता इव मे प्राणाः।

(ख) अयि अविस्रम्भशीले! किमत्राप्यनाश्वासः, यत् प्रतिगृहीत-चूडामणिना प्रस्थातुमुपक्रान्तेन हनुमता आख्यातम्। तद्यथा —

देवि! द्रक्ष्यसि वासरैः कतिपयैः सुग्रीवसुग्राहित-
प्रत्यर्थिच्छिदुरोपदेशनिहतक्रव्यादभव्योदयैः ।
आजुष्टं हरिसैनिकैर्दशमुखग्रावासृगापाटलान्
बिभ्राणं विशिखान् धनुश्च सहितं भ्रात्रा रघूणां पतिम् ॥ १७॥

(क) इअ सुणंती वि किं ण पत्तिआअसि ।

सीता — (ख) हलो! मारुइणा पउत्तो सो कदिबअसद्दो वासराइं अदिक्कमिअ वच्छरेसु वट्टदित्ति जाणामि ।

त्रिजटा — (विहस्य) सरमे! सत्यमिदमालपन्ति ।

प्रियजनविरहाग्नौ पच्यमानात्मकानां
परमिह तरुणानां वासरा वत्सरन्ति ।
हितजनपरिरम्भप्रौढसम्भोगकेळी-
रसहृतहृदयानां वत्सरा वासरन्ति ॥ १८ ॥

इति ।

(क) इति शृण्वत्यपि किन्न प्रत्येषि ।

(ख) हला! मारुतिना प्रयुक्तः स कतिपयशब्दो वासराण्यतिक्रम्य वत्सरेषु वर्तत इति जानामि ।

---

१. हला सरमे! मारु. ग. ख. क. २. ति. ग.

सरमा — (सीतामालिङ्ग्य) (क) हला जाणइ! सो खु मारुइप्पउत्तो कदिवअसद्दो मासद्धं पि ण छिविस्सिदि, किं पुण वच्छराइं। (त्रिजटां प्रति) अम्ब तिअडे! किं मण्णेसि, अत्ताणं सरणं संपत्तो अय्यउत्तविहीसणो रामभद्देण परिग्घेविस्सइ ण वेत्ति।

त्रिजटा — अयि मुग्धे! किमिदमाशङ्कसे। प्रणतवत्सलः स महात्मा रामभद्रः शरणागतमपराधिनं रावणमप्यनुग्रहीष्यति, किमुत विनयशालिनं विभीषणम्। (पुरोऽवलोक्य सहर्षं) अथवा किमर्थमिह विवदामः। यदेष कुमारविभीषणस्यानुचरः सम्पातिः समापतति, अस्मात् सर्वमवगन्तव्यम्।

(प्रविश्य)

सम्पातिः — अम्ब! प्रणमामि।

त्रिजटा — भद्र सम्पाते! अपि कुशलं कुमारविभीषणस्य।

सम्पातिः — अम्ब! महाराजविभीषणस्येति वक्तव्यम्। कुतः —

सम्प्राप्तस्य विभीषणस्य नमितं भक्त्यैव यद्यप्यसौ
कुर्वाणो मकुटातिभारघटनादूरावनम्रं शिरः।
हर्षाश्रुस्नपितान्यपि प्रपतितैः शीताभिषेकोदकै-
रङ्गान्यस्नपयत् स्वयं स करुणासान्द्रो नरेन्द्रात्मजः ॥ १९ ॥

(सर्वा हर्षं रूपयन्ति।)

(क) हला जानकि! स खलु मारुतिप्रयुक्तः कतिपयशब्दो मासार्धमपि न स्प्रक्ष्यति, किं पुनर्वत्सरान्। अम्ब त्रिजटे! किं मन्यसे आत्मानं शरणं सम्प्राप्त आर्यपुत्रविभीषणो रामभद्रेण परिग्रहीष्यते न वेति।

---

१. प्र अपि . ग.

सीता — (क) सहि सरमे! तुह भत्तुणो विहीसणस्स लंकारज्जलाहेण दिट्ठिआ वड्ढसि ।

सरमा — (ख) सहि[1] जाणइ! तुह भत्तुणो उत्तरकोसलाहिणाहस्स पसाओ कस्स किं ण संपादइस्सिदि ।

सम्पातिः — स्वामिनि सरमे! मार्ताण्डकुलकमलिनीमार्ताण्डस्य तत्रभवतः सावरजस्य रामभद्रस्वामिनः कुशलवार्तया वर्धयतु भवती तदन्तःपुराणि ।

सरमा — (ग) सहि जाणइ! किं सुदं सपादिणो वअणं ।

सीता — (घ) अह इम् ।

त्रिजटा — भद्र! ततः परं तत्र को वृत्तान्तः ।

सम्पातिः — अम्ब! तत्रेति क उद्देशः परामृश्यते ।

त्रिजटा — ननु समुद्रस्योत्तरतीरप्रदेशः ।

सम्पातिः — (विहस्य) कः खलु कालस्तमुज्झतः सुग्रीवसैन्यसमग्रस्य दशग्रीवनगरमलंकुर्वतः सावरजस्य[2] रामदेवस्य ।

(क) सखि सरमे! तव भर्तुर्विभीषणस्य लङ्काराज्यलाभेन दिष्ट्या वर्धसे ।

(ख) सखि जानकि! तव भर्तुरुत्तरकोसलाधिनाथस्य प्रसादः कस्य किं न सम्पादयिष्यति ।

(ग) सखि जानकि! किं श्रुतं सम्पातेर्वचनम् ।

(घ) अथ किम् ।

---

१. हि तुह. ख. ग. ङ. २. स्वानुजस्य. ख. ग. ङ.

त्रिजटा — तत् कथमिव ।

सम्पातिः — श्रूयताम् — महाराजविभीषणाववोधितेन रामदेवेन लङ्कापुरगामिनं पन्थानमभ्यर्थितोऽपि यदा न धैर्यममुञ्चदम्भसां भर्ता[1] तदा किञ्चिदिव क्रोधपाटलितदृशा तेन तावदाग्नेयमस्त्रमात्मधनुषि संहितमासीत् ।

त्रिजटा — अहो अनात्मज्ञता सागरस्य । कुतः --

यस्य पूर्वपुरुषैर्महारथैर्यः पुरा हि सगरैर्विवर्धितः ।
तेन दाशरथिनैव याचितो नाचलत् किल कृतघ्न एव सः ॥२०॥

ततस्ततः ।

सम्पातिः — ततश्च,

अस्त्राग्निप्लोपशीर्यत्तिमिकमठकठोरास्थिभस्मावकीर्णा-
दर्णोधेराविरासीदतिबहलभयभ्रान्तचेताः प्रचेताः ।
बद्धस्तद्दत्तमार्गे पयसि कपिभटैरद्रिसङ्घेन सेतु-
र्विश्वेषां प्रीतिहेतुर्विमतपरिषदां विप्लवे धूमकेतुः ॥ २१ ॥

त्रिजटा — (सीतामालिङ्ग्य)[2]

वैदेहि ! दिष्ट्या परिवर्धसे त्वं
कृतोऽद्य भर्त्रा तव वेणिमोक्षः ।
सतीव्रतस्य स्थिरताप्तये ते
स एव सेतुः परमेकहेतुः ॥ २२ ॥

(प्रविश्य)

वनदेवता — अयं च द्वितीयहेतुः (इत्यङ्गरागं दर्शयति ।)

---

१. मुञ्चदम्भ. ग. ङ.　२. तां परिष्वज्य. ख. ग. ङ.

सीता—(सहर्षम्) (क) अम्मो पियसही णं एसा अणब्भा सुहाविट्ठी ।

त्रिजटा—पुत्रि जानकि! का पुनरेषा ।

सीता—(ख) अम्ब! एसा खु जणट्ठाणवणदेवदा मन्दारवई[1] णाम मे दुदीअं हिअअं ।

सरमा—(ग) सहि मन्दारवइ किं एदं कुदो वा आअच्छसि ।

वनदेवता—एवमित्र ।

त्रिजटा—अहो भगवत्या लोपामुद्राया अनसूयायाश्च स्नेहातिशयः । यदिदानीमीदृगवस्थायास्ते पातिव्रत्यस्य दार्ढ्योपपत्त्यर्थम् अयमङ्गरागोऽनुप्रहितः, तत् प्रतिगृहाण जानकीममङ्गरागम् ।

सीता—(घ) सहि उवणेहि एदं तुवं च उपविस ।

(वनदेवता तथेत्यङ्गरागमर्पयित्वोपविशति ।)

सीता—(ङ) सहि मन्दारवइ! अवि सुहं भअवईए लोवामुद्दाए भअवदो कुम्भअम्मस्स अ ।

(क) अम्मो प्रियसखी! नन्वेषानभ्रा सुधावृष्टिः ।

(ख) अम्ब! एषा खलु जनस्थानवनदेवता मन्दारवती नाम मे द्वितीयं हृदयम् ।

(ग) सखि मन्दारवति! किमेतत् कुतो वागच्छसि ।

(घ) सखि! उपनयैतत् त्वञ्चोपविश ।

(ङ) सखि मन्दारवति! अपि सुखं भगवत्या लोपामुद्राया भगवतः कुम्भजन्मनश्च ।

---

१. वदी णाम. ख. ग.

वनदेवता — अथ किम्? । इदमुक्तश्च भगवत्या लोपामुद्रया । अयि वासु वासुन्धरेयि!

रणे रक्षोघ्नानां रघुसुतशराणां सहचरै-
रवन्ध्यैर्विन्ध्याद्रेर्विनयजनकैरुच्चशिरसः ।
प्रभावैर्मद्भर्तुश्चुलुकितसमुद्रस्य तपसां
भवेयुस्ते कामाः सुभगपरिणामाः सुवदने ॥ २३ ॥

किमन्यदाशास्महे इति ।

सीता — (क) अणुग्गहिदह्मि । अह पुच्छामि पिअसहि! अवि जणट्ठाणतपोवणे मम कित्तिमपुत्तिआ मोत्तिआणुकारीहिं मुउलणिउरुम्बेहिं सम्पुण्णमण्डणा संवुत्ता सिन्दुवारलआ ।

वनदेवता — (सस्मितम्) आम जानकि! आम । किन्तु —

त्वत्पाणिप्रणिदत्तपत्रकलशस्वच्छांबुसंवर्धिता
यासौ सुन्दरि! सिन्दुवारलतिका चूतस्य जाता वधूः ।
सेयं कण्टकिना हठेन तरुणा केनापि शाखाभुजै-
राकृष्टा परिशुष्यति प्रतिदिनं न त्वेनमालिङ्गति ॥ २४ ॥

(क) अनुगृहीतास्मि । अथ पृच्छामि प्रियसखि! अपि जनस्थानतपोवने मम कृत्रिमपुत्रिका मौक्तिकानुकारिभिः मुकुलनिकुरुम्बैः सम्पूर्णमण्डना संवृत्ता सिन्दुवारलता ।

---

१. र्वेर्भर्तुर्मे ग. ङ. २. सा सुन्दरि ख. ग.

सरमा — (क) सहि जाणइ ! तुह सिन्दुवारळदिआ दसाणणबला-मोडिगहिअं तुमं एव्व अणुहरेदि ।

सीता — (सविषादम्) (ख) हा मम पुत्तिआए वि विहिणा विसमावत्था समुप्पाइआ । अहवा वसुमई एव्व तिस्से वि उप्पत्तिट्ठाणं ।

त्रिजटा — सम्पाते ! ततस्ततः ।

सम्पातिः — ततश्च —

तीर्त्वा सेतुपथेन तेन सरितां नाथं पुरोगामिना
लङ्केन्द्रेण विभीषणेन सुहृदा सुग्रीवमुख्यैर्बलैः ।
सोदर्येण च पार्श्वगेन सहितो देवो रघूणां पतिः
प्राप्तो मारुतिमांसलांसशिबिकारूढस्त्रिकूटाचलम् ॥ २५ ॥

(सर्वा हर्षं नाटयन्ति ।)

सम्पातिः — ततः सुवेलकटकघटितस्कन्धावारनिवेशितनील-पालितवलीमुखवरूथिनीके सुग्रीवे प्रणिबद्धमुक्तयोश्च कपटकपिवेषधारिणोः शुकसारणयोः, महाराजविभीषणेन लङ्काभ्यन्तरवृत्तान्तमवगन्तुमनुप्रहितोऽहं पक्षिवेषमवलम्ब्य परितः सञ्चरन् अवगतरक्षोगृहरक्षाप्रकारः, तत्क्षण-

---

(क) सखि जानकि ! तव सिन्धुवारलतिका दशाननबलाद्गृहीतां त्वामेवानुहरति ।

(ख) हा मम पुत्र्या अपि विधिना विषमावस्था समुत्पादिता । अथवा वसुमत्येव तस्या अप्युत्पत्तिस्थानम् ।

---

१. णहड्गगहिअं ख. ग. छ. २. ट्वेष. ग. छ.

मिममावेदयितुं महाराजसमीपं गच्छन् अनेन पथा भवतीनामपि समाश्वासनायागतोऽस्मि । तदविलम्बितमितो गच्छामि ।

त्रिजटा — भद्र! एवमस्तु ।

सम्पातिः — नमोऽस्तु स्वामिदारेभ्यः । (निष्क्रान्तः ।)

(नैपथ्ये)

भो भोः प्रहस्तातिकायधूम्राक्षमकराक्षविरूपाक्षयूपाक्षमहोदरमहापार्श्वप्रभृतयो महामन्त्रिणः! किमिदानीमप्युदासते भवन्तः । हह ह ।

उद्यानानि विमर्दयन्ति परितो मथ्नन्ति रथ्यापणान्
विक्षुन्दन्ति च मन्दिराणि विविधं निर्भिन्दते मन्दुराः ।
निघ्नन्ति च वप्रजालवलयं भञ्जन्ति गञ्जागृहान्
निष्पिंषन्ति चतुष्पथालयशतं दर्पोत्कटा मर्कटाः ॥ २६ ॥

त्रिजटा — (समन्तादवलोक्य) अये प्रक्रान्त एव प्लवगरक्षसामायोधनाडम्बरः । तथाहि —

वल्गाघातप्रवल्गत्तुरगखुरपुटक्षुण्णभूमण्डलोत्था-
स्त्यायन्तेऽमी परागाः ककुभि करिघटाकर्णवाताववधूताः ।
येषां सन्ध्याभ्रभासामधिविततिं मिथो मुक्तशस्त्रास्त्रधारा-
निष्पेषे निष्पतन्तो दधति पटुतटिद्विभ्रमं विष्फुलिङ्गाः ॥२७॥

(ऊर्ध्वमवलोक्य)

त्रस्तैरस्त्राभियातादतिभृतकुतुकैराहवालोकने च
भ्राम्यद्भिर्दूरमूर्ध्वं वियति मुहुरधश्चाचिते खेचरौघैः ।
अन्योन्यामर्दभिन्नप्रशिथिलसिचयस्पष्टदृष्टस्तनीभि-
र्वीतव्रीडं व्रियन्ते मृधभुवि निहता वीरहीराः सुरीभिः ॥२८॥

पुत्रि सरमे ! । त्वं तावदनया मन्दारवत्या सह गगनतलमुत्पत्य तत्र क्वचिदस्त्राभिपातं परिहृत्य वर्तमाना कपिरक्षसां समरमहोत्सवमवलोकय । यतो यथावृत्तं पुनरस्माकमावेदयिष्यसि ।

सरमा — (क) अम्ब ! एव्वं होदु । सहि मन्दारवइ ! अवि रुच्चइ दे अंबाए णिओओ ।

वनदेवता — अथ किम् ?

त्रिजटा — पुत्रि जानकि ! तदावामपि तावदितः किञ्चिद् विप्रकृष्टं प्रदेशान्तरमुपगम्यानयोरागमनं प्रतिपालयिष्यावः ।

सीता — (ख) अम्ब ! तह ।

त्रिजटा -- तदुत्तिष्ठ (इति सीतया सह निष्क्रान्ता ।)

(उभे ऊर्ध्वगमनमभिनीय तथा स्थिते ।)

सरमा — (अधोऽवलोक्य) (ग) सहि पेक्ख पेक्ख—

रक्खोणिक्कोसखग्गक्खुडिअकविउलं रिक्खरुक्खग्गणक्ख
प्पक्खेवक्खुण्णमुंडप्पसुमररुहिरालित्तणक्तंचरोहम् ।

(क) अम्ब ! एवं भवतु । सखि मन्दारवति ! अपि रोचते ते अम्बाया नियोगः ।

(ख) अम्ब ! तथा ।

(ग) सखि ! पश्य पश्य —

रक्षोनिष्कोशखड्गत्रुटितकपिकुलं ऋक्षरूक्षाग्रनख
प्रक्षेपक्षुण्णमुण्डप्रसृमररुधिरालिप्तनक्तञ्चरौघम् ।

अण्णोण्णप्फालभिण्णब्भमिरकडुरवुक्खोसदोग्घट्टथट्टं
जुज्झं णिज्झाइरीणं सभअखिणमिणं देइ णो कोउहळ्ळम् ॥२९ ॥

अविंअ —

उद्धं गिद्धन्तगिद्धावळिगरुअगरुच्छायपच्छाइअके
दुप्पेक्खे भूमिअक्के तुलिअगअवडाकङ्किमेहिं तमोहिम् ।
रक्खोबाहंचलुक्खोळिरपरसुगआखग्गधारग्गणिन्ता
दिप्पंता दीवकज्जं दिसि दिसि सिहिणो सव्वदो उव्वहंन्ति ॥
३० ॥

वनदेवता — सखि पश्येदमाश्चर्यम् —

येन प्रमुक्तो[1] विशिखो न यावन्निजं तरस्वानपि गात्रमेति ।
उत्प्लुत्य तावत् कपिराशरस्य तस्यैव पार्ष्णिग्रहणं करोति ॥ ३१ ॥

अपि च —

शिलीमुखः शातमुखो विपक्षात्
परापतन्नेव वलीमुखेन ।
प्रकोष्ठघातेन निवर्तितः सन्
प्रहर्तुरेवैप शिरः छिनत्ति ॥

अन्योन्यास्फालभिन्नभ्रमणकटुरवे द्धोषगजसार्थं
युद्धं निध्यानशीलानां सभयघृणमिदं ददाति नः कौतूहलम् ॥

अपि च --

ऊर्ध्वं गृध्यद्गृध्रावलिगरियगरुच्छायप्रच्छादितार्के
दुष्प्रेक्षे भूमिचक्रे तुलितगजघटाकृष्णिमाभिस्तमोभिः ।
रक्षोबाहाश्चलोद्घूर्णनशीलपरशुगदाखड्गधाराप्रनिर्यन्तो
दीप्यमाना दीपकार्यं दिशि दिशि शिखिनः सर्वत उद्वहन्ति ॥

---

1. युक्ता. ख. ग. घ. ङ.

सरमा — (क) सहि इदं च पेक्ख ।

उम्मुक्का रअणिअरेण खग्गलट्ठी
जाहे णो णिवडइ वाणरस्स कण्ठे ।
तूरंती कुवलअमालिआअ ताहे
बज्झेउं कमइ णमज्झराणमेका ॥ ३२ ॥

वनदेवता — सखि! तूष्णीं तिष्ठ । कुतश्चिदेष करुणप्रलाप इव श्रूयते ।

(नेपथ्ये)

व्यर्थं हा गिरिभिरबन्धि सिन्धुराजः
प्रायोऽर्धं प्लवगभटा मुधा परेताः ।
नागास्त्रैरधिरणमिन्द्रजित्प्रमुक्तै-
र्बद्धौ यद् भुवि पतितौ रघुप्रवीरौ ॥ ३३ ॥

उभे — हा राम! (इत्यर्धोक्ते मूर्च्छतः ।)

सरमा — (आश्वस्य) (ख) सहि! समस्ससिहि समस्ससिहि ।

वनदेवता — (समाश्वस्य)

(क) सखि! इदञ्च पश्य —

उन्मुक्ता रजनिचरेण खड्गयष्टिः
यावन्नो निपतति वानरस्य कण्ठे ।
त्वरमाणा कुवलयमालिकया तावत्
बन्धुं क्रमत एनमप्सरसामेका ॥

(ख) सखि! समाश्वसिहि समाश्वसिहि ।

हा देवि! देवयजनप्रभवे! भवस्ते
वैधव्यवज्रपतनाय किमीदृशोऽभूत् ।
श्रुत्वेदमात्मनि निपत्य मुहुर्लुठन्तीं
सर्वंसहापि न सहेत वसुन्धरा त्वाम् ॥ ३४ ॥

सरमा — (क) सहि! कहं णाम इदं दुरवत्थन्तरं पिअसहीए जाणईए णिवेदइस्सामो । ता जेण केण वि उवाएण एत्थ एव्व अत्ताणं परिच्चइस्सामो ।

वनदेवता — इदमेवात्रोचितं किमुपायान्तरेण ।

पतिष्यावस्तावत् पवनपरिधूतोर्मिपटल-
स्फुटावर्तश्वभ्रप्रकटतरपातालकुहरे ।
अमुष्मिन्नम्भोधेः पयसि पतिते नौ पुनरमी
समन्तादुद्भ्रान्ताः सपदि निगरिष्यन्ति तिमयः ॥ ३५ ॥

सरमा — (स्खलनं रूपयित्वा) (ख) सहि! को एस चंडअरो संवत्ताणिळसहोअरो महापवणो णो बाहेइ । मण्णे एसो च्चेअ णो जलणिहिम्मि पाडइस्सिदित्ति ।

वनदेवता — (ऊर्ध्वमवलोक्य) अये!

(क) सखि! कथन्नामेदं दुरवस्थान्तरं प्रियसख्यै निवेदयिष्यावः । तस्माद्येन केनाप्युपायेनात्रैवात्मानं परित्यक्ष्यावः ।

(ख) सखि! क एष चण्डतरः संवर्तानिलसहोदरो महापवनो नौ बाधेत । मन्ये एष एव नौ जलनिधौ पातयिष्यतीति ।

---

१. नौ पयसि. ग. क. २. जलधिम्मि. ग. घ. क.

आर्योऽसौ सूर्यसूतः स्वयमभिपतति श्रूयते स त्वनूरु-
श्चारुश्रीरेष मेरुः किमु स खलु वलारातिविक्षुण्णपक्षः ।
आ ज्ञातं भीतभीतैर्गरुदुरुपवनाघूर्णिताणोंधिगर्भ-
व्यक्तीभूतैः प्रभूतैरहिभिरयमयं वीक्ष्यते तार्क्ष्य एषः ॥ ३६ ॥

(ततः प्रविशति तार्क्ष्यः ।)

तार्क्ष्यः —

आधून्वन्नब्धिसिन्धोरमृतकरकरापाण्डुडिण्डीरपिण्डा-
नक्षुद्रैः पक्षवातैः स्फटिकगिरिमहाशृङ्गतुङ्गांस्तरङ्गान् ।
अङ्गच्छायैरभङ्गैः कनकविटपिनः कल्पयन्नल्पभासो
निष्क्रान्तः शक्रलोकादमररिपुगृहाभ्यर्णमाहिण्डितोऽस्मि ॥३७॥

(किञ्चिदधोऽवतीर्य) तदधुना —

स्वर्भानुः पुष्पवन्ताविव भुवनहितौ राघवौ मेघनाद-
क्षिप्तः सुप्तप्रकाशां नयति किल दशामल्पकः सर्पपाशः ।
अस्त्राहेरस्य भस्त्रामिव तनुमनिलापूरणस्फारगर्भा-
मुच्चण्डत्रोटिकोटित्रुटितविघटितामेष तार्क्ष्यः करोतु ॥ ३८ ॥

(निष्क्रान्तः ।)

सरमा — (सहर्षं) (क) सहि ! जीवलोअस्स पाणाणि पच्चाहरिस्सिदि एस महप्पहावो भुअंगसत्तू ।

वनदेवता — (अधोऽवलोक्य) सखि ! किं प्रत्याहरिष्यतीति । ननु प्रत्याहृता एव । पश्य —

(क) सखि ! जीवलोकस्य प्राणान् प्रत्याहरिष्यत्येष महाप्रभावो भुजङ्गशत्रुः ।

चण्डैस्तुण्डप्रहारैर्विघटितविषभृद्बन्धनो वैनतेयो
जानुभ्यामेष तिष्ठन् प्रणमति गरुता वीजयन्नाजिभूमौ ।

सरमा —

(क) एदे सुत्तप्पबुद्धा विअ रहुतणआ दिट्ठिआ उट्ठिआणं
पक्खिन्दं पक्खवादोव्लिरपुळणकलावीणिअं माणअंति ॥३९॥

वनदेवता — सखि! तदेहि वैदेह्यै वृत्तान्तमिमं निवेदयिष्यावः ।

उत्तरकालकथायाः प्रीतिकृतः प्रथममेव यत्कथनम् ।
तेनैव तिरस्क्रियते पूर्वावस्था ह्यनिष्टापि ॥ ४० ॥

सरमा — (ख) तह । (उभे अधोऽवतरतः ।)

(ततः प्रविशति सीता त्रिजटा च ।)

सीता — (ग) अम्ब तिअडे! अवि सच्चं अक्खदसरीरो[1] अय्यउत्तो कुमारळक्खणो अ ।

त्रिजटा[2] — (सस्मितम्) अयि अविस्रम्भशीले! तदेव मुहुर्मुहुरभिहितापि कथं न श्रद्दधासि ।

(क) एते सुप्तप्रबुद्धाविव रघुतनयौ दिष्ट्योत्थितावेनं
पक्षीन्द्रं पक्षपातार्द्रप्रलोकनकलाप्रीणितं मानयतः ॥

(ख) तथा ।

(ग) अम्ब त्रिजटे! अपि सत्यमक्षतशरीर आर्यपुत्रः कुमारलक्ष्मणश्च ।

---

१. रो दिट्ठो अय्य. ख. ग. घ. ङ. २. त्रिजटा–अयि ग.

सरमा — (श्रुत्वा) (क) सहि! रामलक्खणाणं णाअत्थबंधणवुत्तंतो[1] एदाहिं पुव्वं एव्व विदिओ भवे ।

वनदेवता — नैतत्[2] सङ्गच्छते ।

सरमा — (ख) ता कहं अम्बा जाणइं एव्वं[3] आसासेइ ।

वनदेवता — शृणुवस्तावद्, उपरि स्फुटीभविष्यति ।

त्रिजटा[4] — पुत्रि जानकि!

मायावसुर्नाम स यातुधानो
मारीचशिष्यः प्रियपङ्क्तिकण्ठः ।
येनैव क्लृप्तं शिरसोर्युगं तत्
मायामयं मानिनि! दाशरथ्योः ॥ ३९ ॥

वनदेवता — सखि! आवयोरसन्निधानेऽन्यः[5] खल्वयं प्रस्तावः । तदुपसर्पावः । (उभे उपसृत्योपविशतः ।)

त्रिजटा — पुत्रि! एते तव प्रियसख्यावागते ।

सीता — (ग) सहीओ अवि अक्खदसरीरो दिट्ठो अय्यउत्तो कुमारो अ ।

(क) सखि! रामलक्ष्मणयोर्नागास्त्रबन्धनवृत्तान्त एताभ्यां पूर्वमेव विदितो भवेत् ।

(ख) तत् कथमम्बा जानकीमेवमाश्वासयति ।

(ग) सख्यौ! अप्यक्षतशरीरो दृष्ट आर्यपुत्रः कुमारश्च ।

---

१. ॰धवुत्तंतो. ग. ङ. २. तदुपपद्यते. क. ३. ॰व्वं अस्सासेइ. ख. ग. घ. ४. टा — माया. ख. ग. घ. ङ. ५ ॰न्यः कोऽप्ययं. ख. ग. घ. ङ.

वनदेवता — अथ किम् । इदञ्च तत्र संवृत्तम् । (एवमिव ।)

सीता — (संभ्रमविषादप्रमोदम्)[1] (क) दिट्ठिआ महंतादो अआळमिच्चुमुहादो मोआविदा दे विणदाणंदणेण ।

(नैपथ्ये)

आः दुरात्मन्! तिष्ठ तिष्ठ ।

सीता — (ख) अम्मो! कुमारळक्खणस्स विअ अयं सरो ।

(पुनर्नैपथ्ये)

मद्बाणात् कुशिकात्मजस्य यजने भ्रष्टोऽसि[2] दुष्टस्ततः
तातस्याकृतिमावहन् कुहनया प्राप्तो निमीनां पुरम् ।
भूयश्चारणकैतवादनृतवागासीर्मतङ्गाश्रमे[3]
मायाकल्पितमस्तकद्वयमिहाप्यार्यामुपानीतवान् ॥ ४२ ॥

त्रिजटा — पुत्रि जानकि! कुमारलक्ष्मणोऽयं मायावसोरपराधान् गणयति ।

वनदेवता — अम्ब![4] चरमश्रुतः प्रस्तावोऽयमावयोरसन्निधाने किमिह संवृत्तः ।

त्रिजटा — एवमिदम् ।

(क) दिष्ट्या महतोऽकालमृत्युमुखान्मोचितौ तौ विनतानन्दनेन ।
(ख) अम्मो! कुमारलक्ष्मणस्येवायं स्वरः ।

---

१. सविषाद. ग. क. २. ष्टोऽपि. क. ३. न्म. ख. क. ४. अम्ब! अत्र चरमश्रुतः प्रस्तावोऽयमस्मदसन्निधाने. ख. ग. क.

(नैपथ्ये)

इत्थमसकृदपकुर्वाणोऽधुना मद्बाणाभिमुखमापतितोऽपि त्वं प्राणितुमभिलषसीत्यहो मायावसो! तवायं दुराग्रहः ।

त्रिजटा — दिष्ट्याचिरादिदानीमपगतासुना मायावसुना भवितव्यम् ।

(नैपथ्ये)

इतो दृश्यतां देवेन ।

सरमा— (क) अम्मो! अय्यउत्तस्स खु एस सरो ।

(पुनर्नैपथ्ये)

युष्मद्बाणप्रपञ्चक्षतकवचधनुर्बाणतूणीकृपाणो
निस्सूतस्यन्दनाश्वो निरगमदमुतो निर्जितो लज्जितो यः ।
लङ्कानाथेन कृच्छ्राद्बहुभिरपि भटैर्लम्भितस्तेन बोधं
सन्नद्धो योद्धुमेष प्रचलति कलितोज्जृम्भणः कुम्भकर्णः ॥४३॥

त्रिजटा — कथमवसितप्रायः समरकथाविस्तरः, यत् प्रहस्तधूम्राक्षप्रमुखसमस्तनक्तञ्चरवीरवरविनाशहेतुकमेव निद्रालोरस्यापि प्रयत्नप्रबोधनमिति तावन्निर्विवादम् । (सोच्छ्वासं) हन्त भुवनस्य महान् भारोऽवतारितप्रायो विश्वजनीनविमलगुणगणभद्रेण रामभद्रेण ।

(क) अम्मो! आर्यपुत्रस्य खल्वेष स्वरः ।

---

१. सीति माया. क. २. ष्ट्या बहुप्रकारमपकुर्वन् दुरात्मा मायावसुरद्य विगतासुः संवृत्तः. ख. ग. ङ. ३. रो । (नैपथ्ये) ख. ग. ङ. ४. टैः प्राधितस्तेन बोधं. ख. ग. ङ. ५. ज्जृम्भितः. ख. ग. ङ. ६. थमिवावासि. ग. ङ

सीता—(क) अम्ब तिअडे! अहो दे पक्खवादविसेसो जं साहारणे वि धीरसोरिअसोंडीरप्पमुहे गुणगणे[1] अय्यउत्तस्स रक्खसाहिणाहस्स अ अय्यउत्तविअअम्मि[2] पहरिसो ण उण सअणविअअम्मि[3]। अच्छेरम्।

त्रिजटा—पुत्रि[4]! किमत्राश्चर्यम्। कस्य कः स्वजनः। काममेकमप्याधेयमाधारभेदाद्भिद्यते एव। तथाहि—

यः साधौ गुणिनि स्थितो गुणगणः श्लाघ्यः सतां जायते
सम्पूर्णोऽपि स एव शोच्यतमतामायात्यसाधौ स्थितः।
सान्द्रं चन्दनजन्म[5] यन्मृगदृशां वक्षोरुहे भूषणं
पाण्डुत्वं हि तदेव[6] हन्त भवति श्वित्रोद्भवं दूषणम्॥ ४४॥

(नैपथ्ये)

उत्सन्नमुत्सन्नं हाहा सर्वमप्युत्सन्नम्।

निद्रालुर्दीर्घनिद्रामधिरणमधुना लम्भितः कुम्भकर्णः
सत्रं नैकुम्भिलं यत्तदपि विनिहतं प्रक्रमे शक्रजेतुः।

त्रिजटा—किमन्यदपि स्यात्।

(नैपथ्ये)

हाहा सोऽपि क्षतोऽभूदलघुभृतयशोलक्ष्मणा लक्ष्मणेन

(क) अम्ब त्रिजटे! अहो ते पक्षपातविशेषः, यत् साधारणेऽपि धैर्यशौर्यशौण्डीर्यप्रमुखे गुणगणे आर्यपुत्रस्य राक्षसाधिनाथस्य च आर्यपुत्रविजये प्रहर्षो न पुनः स्वजनविजये। आश्चर्यम्।

---

१. णसमुदाये. क, २. म्मि तुह प. क. ३. म्मित्ति अच्छेरं. ख. ग. छ. ४. त्रि! कस्य कः. ख. ग. छ. ५. पाटीरद्रवजन्म. ख. ग. छ. ६. व किल भवति. ख. ग. छ. ७. श्विमृभमरिणा. ख. ग. छ.

त्रिजटा — (सहर्षं) वत्स लक्ष्मण! चिरं जीव ।

इदं हि दुष्करं नाम मेघनादनिबर्हणम् ।
अस्मिन् हते हतः सोऽपि पापकारी दशाननः ॥ ४५ ॥

(नेपथ्ये)

प्रस्थानाय प्रवृत्तो दशमुख इदमप्यापदे सम्पदे वा ॥ ४६ ॥

त्रिजटा — जगतां सम्पदे । सखि मन्दारवति! प्रत्यासन्नो रामरावणयोः संग्राममहोत्सवः । तदयमपि पूर्ववद् अत्रभवतीभ्यां गगनमुत्पत्य दृश्यतामदृष्टश्रुतास्त्रप्रत्यस्त्रप्रपञ्चप्रयोगगहनो वीरविनोदः ।

सरमा — (ऊर्ध्वमवलोक्य) (क) अम्मो! किं एदं ।

अणहमणिमऊहसोहमाणं कणअमअं कमणिज्जमुज्जळन्तं ।
सुरगिरिसिहरं व वज्जभिण्णं गअणपहादु पआसमोदरेइ ॥ ४७ ॥

त्रिजटा — (सावधानं विलोक्य) ज्ञातं ज्ञातम्,

रथाधिरूढं रजनीचरेन्द्रं दृष्ट्वा पदातिं च रघुप्रवीरम् ।
निजः समूताशुगवर्मचापः पुरन्दरेण प्रहितो रथोऽयम् ॥ ८ ॥

(क) अम्मो! किमेतत् ।
अनघमणिमयूखशोभमानं कनकमयं कमनीयमुज्ज्वलत् ।
सुरगिरिशिखरमिव वज्रभिन्नं गगनपथात् प्रकाशमवतरति ॥

---

१. दस्य यो वधः ख. ग. ङ. २. दे सम्प्रति. ग. ङ. ३. ग्रामः ख. ग. ङ. ४. द् गगन. ख. ग. ङ.

तद् मन्दारवति! यथोक्तमनुतिष्ठ। अस्माभिस्तु —

शरासनारोपणमात्रलभ्यया
वृतो रणक्षोणिभुवा जयश्रिया।
य ईक्षितोऽसूयितयेव सीतया
स रामभद्रः प्रतिपालयिष्यते ॥ ४९ ॥

(इति निष्क्रान्ताः सर्वाः।)

इति षष्ठोऽङ्कः

अथ सप्तमोऽङ्कः।

(ततः प्रविशति पिशाचः।)

पिशाचः — (सपरितोषं नृत्यन्)

(क) ळक्खोळिक्खशळीळशोणिअणईणिव्वुळ्ळणुव्वुळ्ळण-
क्कीळाळोळपिशाअभीशणळवाघोशेहि भूशाविए।
घोळे ताळिशि ळामळावणळणे ळुंडेहि पुण्णोअळा
शच्चं शच्चमिदो खु वच्छळशअं भच्छा जुउच्छामहे ॥ १ ॥

(क) रक्षऋक्षशरीरशोणितनदीनिमज्जनोन्मज्जन-
क्रीडालोलपिशाचभीषणरवाघोषैः भूषिते।
घोरे तादृशि रामरावणरणे रुण्डैः पूर्णोदराः
सत्यं सत्यमितः खलु वत्सरशतं भक्ष्यमन् जुगुप्सामहे ॥

---

१. णी. ग. ब.

(नैपथ्याभिमुखमवलोक्य) (क) पिए विस्सगन्धिणि! कीश मं अणुगच्छिउं ण पाळेशि ।

(प्रविश्य)

विस्रगन्धिनी—(ख) अळे मंशप्पिअ! कीश पळाअशि ।

हए खु दहअंधळे चिळमिमश्श दोळंतळ-
त्थळादु पळिअद्दिढआ पिअशहीहि मण्डोअळी ।
शुही उण विहीशणे कळिअभाउतोअंजळी
कए शमहिशिंचिए ळहुवळेण ळंकावई ॥ २ ॥

अदो खु इदो वळं मंशशोणिअवशामत्थिक्खाणं कहावि ण शंभविश्शादि ।

मांसप्रियः—(ग) अले अविश्शंतत‍ह्ले अज्ज वि मंशशोणिआशणपाणाहिळाशे तुज्झ ण णिवट्टेइ ।

(क) प्रिये विस्रगन्धिनि! कस्मान्मामनुगन्तुं न पारयसि ।

(ख) अरे मांसप्रिय! कस्मात् पलायसे ।

इतः खलु दशकन्धरश्चिरममुष्यदोरन्तर-
स्थलात् परिकृष्टा प्रियसखीभिर्मण्डोदरी ।
सुधीः पुनर्विभीषणः कृतभ्रातृतोयाञ्जलिः
कृतः समभिषिक्तो रघुवरेण लङ्कापतिः ॥

अतः खल्वितः परं मांसशोणितवसामस्तिष्कानां कथापि न सम्भविष्यति ।

(ग) अरे अविश्रान्ततृष्णे! अद्यापि मांसशोणिताशनपानाभिलाषस्तव न निवर्तते ।

---

१. वळे. ख. ग.

विस्रगन्धिनी — (क) अले! कहं[2] णिवट्टेइ। जदो अदिमहंते वि कविळक्खशशमळशंभाले शवशोणिआहाळेण मह तह्लापडिहाओ ण आशी।

मांसप्रियः — (ख) किं एत्थ काळणम्।

विस्रगन्धिनी -- (ग) अले! किं तुए ण जाणिअं जं अप्पावमाणं पच्छादेउकामश्श ळावणश्श आणाए शमळे णिहआणं णिहआणं ळक्खशाणं शवशळीळाइं शाअळशळिळब्भंतळं पाविआइं। वाणळाणं शवशळीळाइं पुण माळुइणा शमाहळिदश्श मुअशंजीवणोशहश्श पहावेण शंजीविआइं। किंच,

तदो वळं जे णिहआ, वळीमुहा महिन्ददिण्णेण वळेण दे वि खु।
शजीवशंळूढशळीळशंधिणो शमुट्ठिआ शुत्तपबुद्धशण्णिहा॥ ३॥

(क) अरे! कथं निवर्तते। यतोऽतिमहत्यपि कपिराक्षससमरसम्भारे शवशोणिताहारेण मम तृष्णाप्रतीघातो नासीत्।

(ख) किमत्र कारणम्।

(ग) अरे! किं त्वया न ज्ञातं यदात्मावमानं प्रच्छादयितुकामस्य रावणस्याज्ञया समरे निहतानां निहतानां राक्षसानां शवशरीराणि सागरसलिलाभ्यन्तरं प्रापितानि। वानराणां शवशरीराणि पुनः मारुतिना समाहृतस्य मृतसञ्जीवनौषधस्य प्रभावेण संजीवितानि। किञ्च,

ततः परं ये निहता वलीमुखा महेन्द्रदत्तेन वरेण तेऽपि खलु।
सजीवसंरूढशरीरसन्धयः समुत्थिताः सुप्तप्रबुद्धसन्निभाः॥

---

१. वळे. ख. ग. २. हं ण णिव. ख. ३. बळे. ग.

तदो केदि उण अवशिट्ठाइ मंशशोणिआइ । शव्वं एदं अह्माणं उअळ्ळमन्तळश्श अभाअहेअपळिवाओ ।

मांसप्रियः—(विहस्य) (क) मुद्धे! मूळबळश्श शवशळीळाइ अशंखाइ । ताइं जळहिं ण पाविआइ । अवि अ—

लुग्गाइ लुग्गाइ वि लावणश्श शिळाइ भूओ वि शमुट्ठीआइ ।
ळत्तावशित्तेहि खु जेहि पुण्णो किण्णाम णो जण्णवशुंधळा शा ॥४॥

विस्रगन्धिनी—(ख) अळे! किं एदेहिं । णं पेच्छ—

णाशोट्ठच्छीशवणविवळाहिट्ठिअट्ठिमएशुं
गज्झिज्जं णो लुहिअविशिअं केत्तिअं मत्थएशुं ।
ही ही ताइं बहुशदशहश्शाइ अश्शादिआइं
जीहाआशं णवळ ण उणो कुच्छिपोशं कुणंति ॥ ५ ॥

ततः कति पुनरवशिष्टानि मांसशोणितानि । सर्वमेतदस्माकमुदराभ्यन्तरस्याभागधेयपरिपाकः ।

(क) मुग्धे! मूलबलस्य शवशरीराण्यसङ्ख्यानि । तानि जलधिं न प्रापितानि । अपि च—

रुग्णानि रुग्णान्यपि रावणस्य शीर्षाणि भूयोऽपि समुत्थितानि ।
रक्तावसिक्तैः खलु यैः पूर्णा किन्नाम नो जन्यवसुन्धरा सा ॥

(ख) अरे! किमेतैः । ननु पश्य—

नासोष्ठाक्षिश्रवणविवराधिष्ठितास्थिमयेषु
ग्राह्यं नो रुधिरपिशितं कियन्मस्तकेषु ।
ही ही तानि बहुशतसहस्राण्यास्वादितानि
जिह्वायासं केवलं न पुनः कुक्षिपोषं कुर्वन्ति ॥

---

१. ह खु ण जल. क. २. व. ख.

मांसप्रियः—(ऊर्ध्वमवलोक्य) (क) अले! जह एदे विलिंचशंकलपुलंदलप्पमुहा शुलशमूहा पुलत्थपुलहप्पहाणा लिशिशमूहा अ इदो णिवट्टंति तह मण्णे लाहवे णिअलाअहाणिं अओज्झं पट्टिउं उवक्कन्देत्ति।

विस्रगन्धिनी— (ख) अले एव्वं एदं, जं मये खु पुलोइए लामभद्दे अग्गिप्पवेशपलिशुद्धाए शीआदेवीए शह शुहशल्लावकल्लाणमहूशवं अणुभवन्ते लंकाउलादो पट्टिउं पवुत्ते।

(नेपथ्ये)

भो विमानराज! इतस्तावत्।

आधेयानि बहूनि यद्यपि मिथः सम्बाधकृच्छ्रं विना
स्वैरं धारयितुं तवोदरदरी धृष्णोति विष्णोरिव।
तत्तादृक्प्रथिमन्! समं कपिबलैः सौमित्रिसीतासखं
व्योम्ना प्रापय रामदेवममराराध्यामयोध्यां पुरीम्॥ ६॥

ततश्च—

अलकाश्रयणं विनात्मनो विफलां सम्प्रति पुष्पकाभिधाम्।
सफलीकुरु संश्रितः सखे! सविधं तस्य मनुष्यधर्मणः॥ ७॥

(क) अरे! यथैते विरिञ्चशङ्करपुरन्दरप्रमुखाः सुरसमूहाः पुलस्त्यपुलहप्रधाना ऋषिसमूहाश्चेतो निवर्तन्ते तथा मन्ये राघवोऽपि निजराजधानीमयोध्यां प्रस्थातुमुपक्रान्त इति।

(ख) अरे! एवमेतत् यन्मया खलु प्रलोकितो रामभद्रोऽग्निप्रवेशपरिशुद्धया सीतादेव्या सह सुखसल्लापकल्याणमहोत्सवमनुभवन् लङ्कापुरात् प्रस्थातुं प्रवृत्तः।

---

१. बके. Mss.

मांसप्रियः—(श्रुत्वा) (क) अले[1] विश्शगन्धिणि! अह्मे वि अओज्झं गच्छन्तं लामभद्दं अणुगमिश्शामो ।

विस्रगन्धिनी — (ख) अले![2] मंशप्पिअ! अवि तत्थ वि मंशवशा-शोणिअशंपादइत्तअं शमलं भविश्शदि ।

मांसप्रियः — (सरोषमिव) (ग) अवेहि अप्पंभलि! अवेहि कुच्छिभलि! तुज्झ उअलपूलणादो अण्णं किंपि पओअणं णत्थि । शिलिपव्वअं गच्छन्ताणं अह्माणं एशे एव्व उत्तलाशाहुत्ते मग्गेत्ति मए एव्व भणिअं । (ऊर्ध्वमवलोक्य)[3] अले विश्शगन्धिणि! पेच्छ पेच्छ -

शुग्गीवं च विहीशणं च पुलदो शेणाजुअं पिट्ठदो
शोमित्तिं हलिअं च वाशजुअले शंभावअंते शुहं ।
आलूढे गअणंबुहिप्पवहणं जाला खु जं लाहवे
तालच्चेअ अदिक्कमेइ तमिणं चक्खुप्पहं पुप्फअं ॥ ८ ॥

(क) अरे विस्रगन्धिनि! आवामप्ययोध्यां गच्छन्तं रामभद्रमनुगमिष्यावः ।

(ख) अरे मांसप्रिय! अपि तत्रापि मांसवसाशोणितसम्पादयितृकं समरं भविष्यति ।

(ग) अपेहि आत्मम्भरे! अपेहि कुक्षिम्भरे! तवोदरपूरणादन्यत् किमपि प्रयोजनं नास्ति । श्रीपर्वतं गच्छतोरावयोरेष एव उत्तराशाभिमुखो मार्ग इति मयैवं भणितम् । अरे विस्रगन्धिनि! पश्य पश्य —

सुग्रीवञ्च विभीषणञ्च पुरतः सेनायुगं पृष्ठतः
सौमित्रिं भार्याञ्च पार्श्वयुगळे सम्भावयन् सुखम् ।
आरूढो गगनाम्बुधिप्रवहणं यदा खलु यद्राघवः
तदैवातिक्रामति तदिदं चक्षुष्पथं पुष्पकम् ॥

---

१. अळे अह्मे. क. ग ङ. २. ळे अवि. क. ग. ङ ३. (ऊर्ध्वमवलोक्य) विश्श. ख. ४. वळे. Ms.

तो तुरिअं गच्छह्म । [1]

विस्रगन्धिनी — (क) तह ।

(इति निष्क्रान्तौ ।)

(विष्कम्भकः ।)

[ततः प्रविशतः पुष्पकेण रामलक्ष्मणौ सुग्रीवविभीषणौ सीता च विभवतश्च परिवारः]

लक्ष्मणः — आर्य! अति हि नाम विस्मयनीयोऽयं विमानवेगः ।

तथाहि —

आधावन्तीव दूरादभिमुखमवनौ सर्वतः पर्वतौघा
निष्क्रामन्तीव पार्श्वद् द्रुतमुडुततयः पार्श्वयोरेकरूपाः ।
भावा द्यावपृथिव्योरपि[2] युगपदहो दृष्टनष्टा इवामी
जाने केनापि सर्वं क्षणिकमिति यतः कथ्यते तथ्यमेतत् ॥९॥

रामः — अयि विमानराज! तारापथादितोऽवतीर्य वसुन्धराम् उपर्युपरि किञ्चिद् मन्दसञ्चारो भव, येनावबुध्येत कतमोऽयमुद्देश इति ।

विभीषणः — देव पश्य पश्य!

तत्त्वरितं गच्छावः ।

(क) तथा ।

---

१. ता गच्छह्म निष्क्रान्तौ. ख. २. पि विशं. ख.

यावद्यावद् द्रुततरमधो लम्बमानं विमानं
तावत्तावत् प्रथयति वपुः सर्वमुर्वीविभागः ।
किञ्चामुष्मिन् गिरिसरिदरण्यादयो ये पदार्था
व्यक्तिं यान्ति व्यपगतमिथःसक्तयस्तेऽपि सर्वे ॥ १० ॥

सुग्रीवः—सखे! एवमेतत् । अमी पृथक् पृथगवलोक्यन्ते वसुन्धराभृतः ।

उद्यत्प्रद्योतनांशुप्रतिहतिरभसादह्नि वह्निं वमत्सु
प्रस्थेषु प्रज्वलन्तोऽपि हि मिहिरदृषन्मण्डलीमण्डितेषु ।
व्यक्तं नक्तं च दीप्तौषधितरुषु परं व्योममार्गोपसर्पद्-
धूमस्तोमानुमेयां दधति खलु दशामेषु दावाग्नयोऽमी ॥ ११ ॥

सीता—(अग्रतोऽवलोक्य) (क) अय्यउत्त! अणेअधाउरसघुसिण-चंदणालेवमणहरो णिरंतरणिपडिअणिज्झरसलिलधवलुत्तरिज्जदर-तिरोहिओ वीसंभरादेवीए एक्को थणअळसो विअ किंणामहेओ एस महासेळो ।

रामः—देवि! अयमयं,

पर्यन्तभ्रान्तभृङ्गीपरभृतपटलीपक्षविक्षेपवात-
व्याधूतव्याधिघातद्रुमकुसुमरजःस्वर्णचूर्णावकीर्णाम् ।
बिभ्राणो मूर्तिमुच्चावचरुचिविलसद्धातुरत्नामयत्ना-
दारूढो मेरुसाम्यं पथि भवति दृशोरत्र नश्चित्रकूटः ॥ १२ ॥

सुग्रीवः—अस्य हि—

(क) आर्यपुत्र! अनेकधातुरसघुसृणचन्दनालेपमनोहरो निरन्तरनिपतित-निर्झरसलिलधवलोत्तरीयदरतिरोहितो विश्वम्भरादेव्या एकः स्तनकलश इव किन्नामधेय एष महाशैलः ।

सूर्याचन्द्रमसोरविश्रमसदासञ्चारघण्टापथं
 व्योमस्कन्धमतीतवन्ति शिखराण्यध्यास्य सिद्धाङ्गनाः ।
निर्निद्राम्बुजकैरवोत्पलसरस्तीरेषु रात्रिन्दिवं
 विश्राम्यन्त्यपघर्मशीतजनितप्रम्लानकम्राननाः ॥ १३ ॥

लक्ष्मणः — अयि सुग्रीवविभीषणौ !

अस्मिंस्तातविपत्तिमार्यभरतादाकर्णयद्भिः पुरा
 नास्माभिः परमेभिरप्यातितरामाक्रन्दितं शाखिभिः ।
ये मुञ्चन्त्यधुनापि पुष्पनयनैर्बाष्पान् मधुच्छद्मना
 भृङ्गारावमिषाद् विलापवचनान्युच्चैर्वितन्वन्ति च ॥ १४ ॥

सीता — (सास्रम्) (क) हा ससुर! ससुरासुरमणुअभुअङ्गमो वि एस जीवलोओ तुए विणा सुण्णो विअ मे पडिभादि ।

विभीषणः — (स्वगतम्) इदानीमेव कथमपि करुणरसवरुणालया-दुत्तरिता देवी पुनरपि तस्मिन्नेव पतितुमुपक्रमते । तदन्यतस्तावदा[1]-क्षिपामि । (प्रकाशम्) (अग्रतो निर्दिश्य) । देव! अयमयम् —

रोमन्थस्फुरदोष्ठगोष्ठशयनप्रेष्ठाङ्गकण्डूयन-
 क्रीडासक्तगवीनवीनशिशुकव्यावल्गितोपान्तभूः ।
हव्यद्रव्यसुगन्धिगन्धवहनव्याधूतधूमावलि-
 श्यामीभूतवियत्पथो नियमिनः कस्याश्रमो दृश्यते ॥ १५ ॥

(क) हा श्वशुर! ससुरासुरमनुजभुजङ्गमोऽप्येष जीवलोकः त्वया विना शून्य इव मे प्रतिभाति ।

---

१. दतस्ता. ख.

रामः — (विलोक्य सहर्षं) लङ्कापते! अयं हि तत्रभवतो भरद्वाजमहर्षेराश्रमवाटः । अत्र हि —

शारीशुकायतनकोटरसम्प्ररूढ-
श्यामाकशालिफलशालिवटद्रुमाणि ।
गोगर्भिणीचरितदर्भकुशाङ्कुराणि
विश्रान्तिमाश्रमपदानि दृशोर्दिशन्ति ॥ १६ ॥

(नेपथ्ये)

अयि विमानराज! त्वर्यतां त्वर्यताम् ।

सीता — (आकर्ण्य सहर्षम्) (क) अम्मो भत्तुविरहमहाणळडज्जमाणरहुउळवहूसवणसीअळसन्देसक्खरपीऊसवरिसिणो केसरिकळत्तसम्भवस्स मारुइणो[1] विअ एस सरो सुव्वइ[2] ।

रामः — देवि! स्यादेवम् । पुरन्दरादिभिः सह लङ्काद्वीपमागतस्य तातदशरथस्याशया अभिषेकसम्भारसम्भरणार्थमयोध्यां प्रति पूर्वमेवानुप्रेषितौ हि जाम्बवद्धनुमन्तौ ।

(पुनर्नेपथ्ये)

विश्वामित्रवसिष्ठकाश्यपभृगुप्राचेतसाद्याः पुनः
सस्त्रीकः सपुरोहितो नरपतिः सीरध्वजः सानुजः ।
अन्ये केकयमागधप्रभृतयो भूपाश्च सम्बन्धिनः
सम्प्राप्तास्त्वरयन्ति देव! भवतो राज्याभिषेकोत्सवम् ॥ १७ ॥

(क) अम्मो भर्तृविरहमहानलदह्यमानरघुकुलवधूश्रवणशीतलसन्देशाक्षरपीयूषवर्षिणः केसरिकळत्रसम्भवस्य मारुतेरिवैष स्वरः श्रूयते ।

१. णो सु एस. ख. २. सुवइ. ख.

सुग्रीवविभीषणौ — (सहर्षम्) विमानराज ! किं विलम्बसे । अयं हि —

ताम्रैर्दूरावनम्रक्षितिपतिमकुटश्रेणिमाणिक्यरोचि-
मालाबालप्रवालैरविरलमिलितैरास्तृतोपान्तभागम् ।
तुङ्गं पूर्वाद्रिशृङ्गं रविरिव विमतव्रातमातङ्गसिंहः
सिंहाङ्कं पीठमुच्चैरधिवसतु चिरान्मानवं मानवेन्द्रः ॥ १८ ॥

वयश्च —

लक्ष्म्या मुकुन्दमिव चन्द्रिकयेव चन्द्रं
चन्द्रार्धशेखरमिवाचलराजपुत्र्या ।
एकासनस्थमनया सममेव देव्या
देवं कियच्चिरमुदीक्षितुमुत्सुकाः स्मः ॥ १९ ॥

(ततः प्रविशतो भरतशत्रुघ्नौ जाम्बवद्धनुमन्तौ च ।)

जाम्बवान् — इत इतः कुमारौ ।

रक्षोराजभुजाभुजङ्गमविषज्वालायितास्त्रच्छटा-
दुर्लङ्घं जितशक्रविक्रमचमूचक्रोरुनक्रोत्कटम् ।
तीर्त्वा सङ्गरसागरं धृतधनुर्बाणप्लवो राघवः
सुग्रीवादिसमग्रसैन्यसहितो देवोऽयमावर्तते ॥ २० ॥

भरतः — (ऊर्ध्वमवलोक्य सहर्षम्) वत्स शत्रुघ्न ! पश्य पश्य —

शरीरिण्या साक्षादिव विजयलक्ष्म्या परिवृतः
प्रजावत्या कीर्त्या सहित इव मूर्त्या घटितया ।
तनूमत्या स्थित्येव च सुचरितानामयमयं
चिरादार्यः सिञ्चत्यमृतपरिवाहैरिव दृशौ ॥ २१ ॥

शत्रुघ्नः — आर्य !

मायामन्थरया प्रतारितधिया तातो वरं प्रार्थितो
मात्रा मध्यमया यदेतदुचितं [1]यच्चापि तेनार्पितम् ।
नेदं चेदभविष्यदाशरपतिप्रक्षोभितानां कुतो
लोकानामजनिष्यदद्य सहसा सर्वात्मना निर्वृतिः ॥ २२ ॥

हनूमान् — सत्यमाह कुमार[2]ः । अद्य हि —

धर्मे तिष्ठति विष्टपत्रयमिदं रक्षोभिरक्षोभिते
वैतानेष्वनलेषु जुह्वति हविर्निर्दोषमग्न्याहिताः ।
गायन्ति स्फुटरागयोगमधुरं गन्धर्वसिद्धाङ्गना
युष्मत्कीर्तिमितस्ततः किमधुना भद्रेतरं विद्यते ॥ २३ ॥

रामः — (विमानवेगनाटितकेनाधोऽवलोक्य, [3]सहर्षोल्लासम् ।) अये! इयमियमयोध्या ।

विभीषणः —(सबहुमानाश्चर्यप्रमोदम्) अये,

इक्ष्वाकूणां त्रिभुवनमहाशाखिशाखोपशाखा-
संसक्तायाः प्रभववसुधा कीर्तिमन्दारवल्याः ।
यूपश्रेणीपुलकिततटप्रस्खलत्सारवांभः-
कल्लोलालीकलकलसुखा [4]दृश्यतेऽसावयोध्या ॥ २४ ॥

लक्ष्मणः — (अधोऽवलोक्य) आर्य! अयमसावार्यभरतो वत्सशत्रुघ्नश्च जाम्बवदाञ्जनेयाभ्यां सार्धमित एवाभि[5]वर्तते । तदवतरामः ।

---

१. यच्चैष तेनार्पितः; २. रः । धर्मे क. ३. सहर्षम् ख. सप्रहर्षं ग.
४. खा श्रूयतेऽसा. ग. ५. वर्तते. घ.

(सर्वे विमानादवतरन्ति ।)

भरतशत्रुघ्नौ — (उपसृत्य) आर्य! अभिवादयावहे । (इति साष्टाङ्ग-[1]पातं प्रणमतः ।)

रामः -- (सहर्षबाष्पगद्गदम् ।) वत्सावायुष्मन्तौ भूयास्तम् । (इत्युत्थाप्यालिङ्गति ।)

उभौ — (सीतामुपेत्य) आर्ये अभिवादयावहे ।

सीता — (सस्नेहहासम्) (क) वच्छा दीहाउणा होह ।

लक्ष्मणः — (भरतमुपेत्य) आर्य! अयं लक्ष्मणः प्रणमति ।

भरतः — (सस्नेहं परिष्वज्य) वत्स! विजयी भव ।

शत्रुघ्नः — (लक्ष्मणमुपेत्य) आर्य! अयं शत्रुघ्नः प्रणमति ।

लक्ष्मणः -- वत्स! चिरं जीव । (इति परिष्वजते ।)

(नेपथ्ये)

(ख) ओसरह ओसरह ।

रामः -- कुमार! किमिदम् ।

भरतः — आर्य!

(क) वत्सौ दीर्घायुषौ भवतम् ।

(ख) अपसरत अपसरत ।

---

१. ति प्रणमतः. ख. ग. घ.

प्रस्नुतस्तनपयोनयनाम्भो-
निर्झरस्नपितशुष्कशरीराः ।
सम्भ्रमस्खलितपादसरोजा
मातरः स्वयममूरभियान्ति ॥ २५ ॥

रामः -- (ससम्भ्रमम् ।) वत्स लक्ष्मण! देवि वैदेहि! वयमेव त्वरितमुपेत्य प्रणमामो मातृजनम् ।

(इति ताभ्यां सह निष्क्रान्तः ।)

जाम्बवान् --- (अङ्गुल्या निर्दिश्य) कुमारौ अयं स पूर्वप्रस्तुतः सुग्रीवः, अयश्च स विभीषणः ।

भरतशत्रुघ्नौ -- (सप्रमोदबहुमानमुपेत्य[1] ।) अपि सुखमखण्डितसौहार्दयोरत्र भवतोः । (इत्यालिङ्गतः ।)

सुग्रीवविभीषणौ --- इदानीं[2] सम्पूर्णसुखौ भवावः ।

सुग्रीवः — (जनान्तिकम् ।) सखे! विभीषण! इमावपि तावेव कुतः --

स एव हि गभीरिमा मधुरिमा स एवानयो-
स्तदेव सरसं वचो वपुरिदं तदेवोज्ज्वलम् ।

विभीषणः— सखे किमिदमद्भुतं भुवनरक्षणैकव्रतं
विसंवदति किं मिथो भुजचतुष्टयं शार्ङ्गिणः ॥ २६ ॥

(नैपथ्ये)

जटाचीरे पारेसरयु परिहाय प्रतिनवं
वसानः कौशेयं मणिमकुट[3]हाराङ्गदधरः ।

---

१. नमुपसृत्य. ख. नपुरस्सरमुपसृत्य. ग. २. नीं पूर्णसुखौ. ख. ३. टघाराङ्गद. ग.

घनापाये पूर्णः शशधर इवात्यन्तमधुरः
समारूढः सिंहासनमलघु सीतासहचरः ॥ २७ ॥

(सर्वे हर्षं रूपयन्ति ।)

भरतः — वयस्यौ[1] सुग्रीवविभीषणौ! तदहमप्येतावन्तं कालमार्यनिर्विशेषगौरवभाराद्धमार्यपादुकायुगलमिदमार्यपादाम्बुजयुगलेन योजयामि ।

उभौ — प्राप्तकालमिदम् ।

(भरतो निष्क्रान्तः ।)

(नैपथ्ये)

अम्भोजासनपाणिकुम्भकुहरात् सम्भूतमम्भो यथा
शम्भोर्मूर्धनि चन्द्रखण्डमकुटे तद्वद्रघूणां प्रभोः ।
बालार्कारुणमौलिभारमहिते मन्त्राभिभूतं मह-
त्तीर्थोपात्तमिदं वसिष्ठकलशादस्मिन्नभिष्यन्दते ॥ २८ ॥

(आकाशे दुन्दुभिध्वनिः ।)

हनूमान् — (ऊर्ध्वमवलोक्य) अये,

दिग्दन्तावलगण्डभित्तिगलितानुन्मुच्य दानद्रवा-
नागच्छद्भिरलिव्रजैरविरलैराच्छादयन्ती दिशः ।
वाताधूतपरागपूरकपिशीभूतान्नभोमण्डलात्
पौष्पी वृष्टिरसौ पतत्यनिमिषश्रेणीविनिष्पातिता ॥ २९ ॥

जाम्बवान् — तदहमपि,

---

१. स्यौ तदह. क.

क्षुब्धाचलक्षुभितदुग्धपयोनिधान-
ध्वानावधीरणचणेन सुमङ्गलेन ।
कोणाभिताडनभुवा भुवनान्यमूनि
भेरीरवेण परितः परिपूरयामि ॥ ३० ॥

(निष्क्रान्तः ।)

(नेपथ्ये)

विश्वंभरामात्मशिरःप्रवृत्तैः
कृत्वा कृतार्थामभिषेकतोयैः ।
गङ्गाम्बुपूरैरिव शैलराजो
विराजते दाशरथिर्नरेन्द्रः ॥ ३१ ॥

शत्रुघ्नः — (नेपथ्याभिमुखमवलोक्य, सहर्षम्) वयस्यौ पश्यतं पश्यतम् ।

पूर्णाभिषेकमङ्गल्यः पूर्णचन्द्रसमद्युतिः ।
विश्वामित्रं पुरस्कुर्वन्नार्योऽयमभिवर्तते ॥ ३२ ॥

(ततः प्रविशति विश्वामित्रेण सह रामः ।)

रामः — भगवन्नुपाध्याय ! अयमेष रामभद्रः प्रणमति ।

विश्वामित्रः — वत्स ! रामभद्र !

तुहिनहारहराचलसन्निभैस्तव यशोभिरशोभि जगत्त्रयी ।
दशमुखं विनिहत्य दिशां गणं दशमुखन्तु धिनोषि तदद्भुतम् ॥३३॥

रामः — (सप्रश्रयमञ्जलिं बद्ध्वा) भगवन्नुपाध्याय !

युष्मत्पादसरोजरेणुरणुरप्युच्चैर्भवत्सन्निभः
किं वा वस्तु सरीसृजीति न सतामन्तःस्थितस्सन्ततम् ।

पुष्णाति द्विपदाहवेषु विजयं मुष्णाति पापोच्चयं
तृष्णादैन्यभयानि हन्ति कुरुते सत्कीर्तिपूर्तिश्रियः ॥ ३४ ॥

(नेपथ्ये)

वैतालिकः — जयतु जयतु महाराजो रावणान्तकः ।

छायासूर्यमिव क्षपाचरतमस्तोमच्छिदाकारणं
ताराचन्द्रमिवाञ्जनं जनदृशां मुख्यैरभिख्यामृतैः ।
स्वाहाग्नीव च देवराजसदसः सन्तर्पणे सम्मुखं
सीताराघवमेतदद्भुततरं द्वन्द्वं चिरं जीवतु ॥ ३५ ॥

(ततः प्रविशति सीता चेट्यौ च)

सीता — (क) हळा मंजरिए! हञ्जे मंञ्जूसिए!
रज्जाहिसेअसविसेसमणोज्जसोहं
चंदं व संदवरिसादिअहावसाणे ।
पुंवाअलुच्चकणआसणसण्णिसण्णं
णिव्वण्णिउं तुवरए मणमज्जउत्तं ॥ ३६ ॥

मञ्जरिका — (क) सहि! को सन्देहो ।

(क) हला मञ्जरिके! हञ्जे मञ्जूषिके!

राज्याभिषेकसविशेषमनोज्ञशोभं
चन्द्रमिव सान्द्रवर्षादिवसावसाने ।
पूर्वाचलोच्चकनकासनसन्निषण्णं
निर्वर्णयितुं त्वरते मम आर्यपुत्रम् ॥

(क) सखि कः सन्देहः ।

इअराणवि रामअंदळच्छीसइसंपेच्छणमुछवो जणाण ।
तुह किं पुण दीहविप्पवासज्ञळणज्जाळपळित्तचित्तआए ।। ३७ ।।

मञ्जूपिका — (क) दिट्ठिआ,

रअणिअरपुरीचिराहिवासा सहि तुह किंपि मळीमसत्तणं जम् ।
जळणणिवडणेण तं पसंतं जह किर जच्चसुवण्णळट्ठिआए ।। ३८ ।।

सीता — (उपसृत्य) (ख) जेदु अय्यउत्तो ।

उभे -- (ग) जेदु भट्टा ।

सीता — (विश्वामित्रं प्रति) (घ) भअवं पणमामि ।

विश्वामित्रः — भद्रे भर्तुरभिमता भाग्यानां भाजनं भूयाः ।

सीता — (ङ) अणुग्गहिदह्मि ।

(प्रविश्य ।)

भरतलक्ष्मणौ — जयत्वार्यः । उपाध्याय प्रणमावः ।

(सुग्रीवादय उपेत्य प्रणमन्ति ।)

विश्वामित्रः — वत्स रामभद्र,

इतरेषामपि रामचन्द्रलक्ष्मीसदासम्प्रेक्षणमुत्सवो जनानाम् ।
तव किं पुनर्दीर्घविप्रवासज्वलनज्वालाप्रदीप्तचित्तायाः ॥

(क) दिष्ट्या,

रजनिचरपुरीचिराधिवासात् सखि तव किमपि मलीमसत्वं यत् ।
ज्वलननिपतनेन तत् प्रशान्तं यथा किल जात्यसुवर्णयष्टेः ॥

(ख) जयत्वार्यपुत्रः ।

(ग) जयतु भर्ता ।

(घ) भगवन् प्रणमामि ।

(ङ) अनुगृहीतास्मि ।

विष्वग्व्यक्चक्रवाळाचलवलयचतुष्कूलसप्तार्णवार्ण-
स्वर्णाम्भोजं सुवर्णक्षितिधरमभितो भाति या भूतधात्री ।
तस्यामस्याममान्त्यो बहुमहिमवशादूर्ध्वमस्मादधश्च
व्याप्ता भूयासुराशु क्रशितशशिरुचिस्फूर्तयः कीर्तयस्ते ॥ ३८ ॥

रामः — अनुगृहीतोऽस्मि ।

विश्वामित्रः — वत्स रामभद्र ! किं ते भूयः प्रियमुपहरामि ।

रामः — भगवन्, किमतः परमपि प्रियमस्ति । पश्य —

विकीर्णैर्दिव्यास्त्रैर्विगतभवतापेन भवता
कृतं वैरिव्रातप्रशमनकृतार्थं त्रिभुवनम् ।
इयं प्रत्यानीता हुतवहविशुद्धा जनकजा
प्रतिष्ठां च प्राप्ता मम किमपरं प्रार्थ्यमधुना ॥ ३९ ॥

तथापीदमस्तु —

(भरतवाक्यम्)

इष्टापूर्तैकतानो भवतु नियमिताभासुरो भूसुरौघो
वृष्ट्या पुष्णातु पृथ्वीमुचितहुतहविःसम्भृतौजा बिडौजाः ।
रक्षेदक्षीणधर्मा चतुरुदधितटीमेखलां भूतधात्रीं
पुण्यात्मा पद्मनाभप्रणिहितहृदयो वञ्चिमार्तण्डवर्मा ॥ ४० ॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

सप्तमोऽङ्कः ।

सीताराघवं नाम नाटकं सम्पूर्णम्* ।

---

* सीताराघवसंज्ञं रचितमिदं रामपाणिवादेन ।
तेनैव च लिखितमपि प्रेक्षणकं वो मुदे भूयात् ॥
पद्यमिदमधिकतया दृश्यते क. मातृकायाम् ।

---

1. छापि. ख. २. पठ भूपः ।

सीताराघवम्

श्लोकानुक्रमणी

श्लोकः	पुटम्
अज्ञानामनुदर्क	22
अणहमणि	125
अणुरूव	47
अतिक्रान्ताः	83
अत्यन्तोद्धु	86
अत्रागत	94
अत्रेरुदार	103
अधिस्थानन्दूरं	3
अधो दण्डाकारां	85
अनुद्धृत	10
अनेन यज्ञे	33
अन्येषु प्रिय	87
अभेद्यो	27
अमरावति!	98
अम्भोजासन	140
अरविन्द	35
अरुणवल्क	77
अलकाश्रयणं	130
अलिङऊण	45
अवश्यं कन्यानां	55
अशेषाधार	1
असूर्यां नाम	106
अस्तक्ष्माभृदधित्यका	12
अस्माग्निप्लोष	110
अस्मद्द्रोहि	92
अस्माननादत्व	36
अस्मिन्नभीक्ष्ण	60
अस्मिस्तात	134
अहं हि तुम्बुरुर्नाम	80
आकर्ण्य	43
आकर्ण्यान्तः	28
आचार्यस्य	14
आदित्याः	8
आधावन्तीव	1[illegible]2
आधून्वन्नभ्र	119
आधेयानि	130
आनर्तित	104
आभ्यां निपातिताः	26
आयाति तात	24
आयान्तमेनं	99
आरादाराम	73
आर्येशरेण	88
आर्योऽसौ	119
आसक्तामन्द	25
इअ रहसि	56
इअराणवि	143
इक्ष्वाकूणां	137
इतरेतराश्रय	18
इदं पूर्वापातं	28
इदं हि दुष्करं	125
इष्टापूर्तैकतानो	144
उत्तमस्वर्ण	100
उत्तरकालकथायाः	120
उत्फुल्लन्ति	24
उत्सङ्गोपनिवेशिता	79
उद्यत्प्रद्योत	133
उद्यानानि	97
उद्यानानि विमर्दयन्ति	114

श्लोकः	पृष्ठम्
उद्दं गिद्धन्त	116
उन्मादो वा	30
उन्मुक्ता	117
एकं वक्त्रमुभौ	77
एवं यः प्रलपति	22
ऐन्द्या किञ्चिद्	12
कक्षोपारूढ	90
कठोरास्थि	42
कण्ठे कौस्तुभवद्	7
कथितमसकृदस्मै	20
कनकरजत	87
कन्या काचन	9
करगाहिभ	51
काचं स्वर्णमवैतु	36
कामं भूमिभुजो	20
कालेन	10
कियन् कार्श्यं	103
कुवलय	103
कोकी शोकं	105
कोदण्डं शशि	21
क्रान्तौ यौ तव	106
क्रान्तौ यौ मणि	96
क्वासां भासां	99
क्वेदं धनुः	31
क्षिप्तस्तेन	89
क्षुब्धाचल	141
गाङ्गे गाङ्गेय	93
घनजनित	37
घातयित्वा	38
चण्डैस्तुण्ड	120
चतस्रः संसक्ताः	54
चन्दं गिन्दह	67

श्लोकः	पृष्ठम्
चित्रं चित्रार्पितापि	75
चिरविरहित	83
चोद्दहवरिसाइं	63
छायाप्युज्झति	96
छाया सूर्यमिव	142
छित्वा सत्वर	38
जटाचीरे	139
जडप्रकृति	69
जनकनृपतेः	29
जयलक्ष्म लक्ष्मण	82
जीवप्राहं	81
जृम्भारम्भ	61
जोह्लाए विण	105
णाशोट्ठच्छी	129
णिअ कुसुम	46
तत्राक्रदादिषु	95
तदेव दुस्सहं	95
तदो वळं जे	128
ताम्रैर्दूरावनम्र	136
तिरोभूतो	99
तिस्रो दिशः	94
तीर्त्वा सेतु	113
तुङ्गप्रासाद	101
तुङ्गैः शृङ्गैः	77
तुहिनहार	141
त्रस्तैरस्त्राभिपाताद्	114
त्वत्पाणिप्रणिहत	112
दग्धं येन	71
दण्डकारण्य	74
दाक्षिण्यभाजां	30
दिग्दन्तावळ	140
दुरुक्तं	23

श्लोकः	पुटम्
दृष्ट्वा सीतां	98
देवि! द्रक्ष्यसि	107
द्वन्द्वं सुन्दरि!	75
धर्मे तिष्ठति	137
धात्रीन्द्रः श्वशुरः	55
धीरोदात्त	17
धीरोदात्तप्रकृति	71
धूपैरापादयध्वं	60
धैर्यक्षान्ति	29
नळकूबर	70
नागसहस्रप्राणा	66
निक्षेपद्राविणावलीमिव	32
निद्रामुद्रित	13
निद्रालुर्दीर्घं	124
निर्दग्धानि	102
निर्दग्धुस्त्रिसृणां	37
निश्च्योतन्निर्झराम्भःशिशिर	89
निस्सङ्गस्य	22
पातिव्रत्यावस्थावत्	118
परस्त्रीपुत्रस्य	93
पर्यन्तभ्रान्त	133
पशव्यानां	89
पश्यत्येवाञ्जनेये	95
पितृव्यपरिलालितो	92
पूर्णाभिषेक	141
पृथग्जन	29
प्रत्यग्धामनि	54
प्रत्याकृष्ट	15
प्रभञ्जनेन	98
प्रस्नुतस्तन	139
प्राज्ञोऽसौ	23
प्राप्तोल्लासैः	68
प्रायोपवेशनेन	98
प्रियजनविरहाग्नौ	107
प्लवगपतिना	87
बाले! प्रालेय	54
बिभ्राणेषु	12
बुभुक्षाभिः	83
भर्ता कामं	59
भवतु जनुषो	54
भासां भर्ता	4
भासामासां	23
भीतः क्वापि	14
भो भोः साहसिकस्य	22
भ्रमद्भ्रमर	73
मणवसह	48
मत्वा तृणाय	104
मध्येपद्धति	8
मत्याविता	78
महीतलं	32
मातृरिव	57
मायामन्थरया	137
मायावसुर्नाम	121
मारीचस्य	11
मार्ताण्डान्वय	23
मा स्म द्राक्षीद्	14
मिहिरान्ववाय	84
मुग्धे! दुग्धमिति	63
मुनेः शापात्	85
मृत्युं मर्त्येश्वरावपि	91
यः सव्यं	9
यः साधौ	124
य एव येनैव	24
यजनावनेः	56

श्लोकः	पुटम्
यद्बाणेन	26
यद्बाहावलि	102
यया पूर्वं	16
यश्चक्षुर्जगतां	57
यस्य पूर्वपुरुषैः	110
यस्य प्राप्तुमनाः	68
यस्यार्धासन	7
यस्यास्ते जनकः	84
यामिवानुहरन्	1
यावद्यावत्	133
यासौ कोसल	59
युष्मत्पाद	141
युष्मद्बाण	123
येन प्रमुक्तो	116
रक्षणिभर	143
रक्तोणिकणोस	115
रक्षोराज	136
रज्जाहिसेभ	142
रणद्रण्डैः	13
रणे रक्षोघ्नानां	112
रथपथावरणाधिगत	85
रथाधिरूढं	125
रविकुलभुवां	9
रागद्वेष	89
रात्राबुत्क्रमता	12
रात्रौ गोत्र	76
रामलक्ष्मण	91
रामेण मारुताक्षेण	10
रामो राम इति	43
रुद्रो सो	52
रूपजोव्वण	45
रोमन्थ	134
ळक्खोळिक्खणळीळ	126

श्लोकः	पुटम्
लक्ष्म्या मुकुन्दमिव	136
लावण्यामृत	75
लुग्गाइ लुग्गाइ	129
वक्रावक्र	48
वञ्चितां दशमुखेन	93
वदत वदत	42
वल्गाघात	114
वाणीभूत	21
विकीर्णैर्दिव्यास्त्रैः	144
विज्जुज्जीह	65
वियोगाद्दार्यायाः	88
विराध इति	80
विराधखरदूषण	64
विश्वम्भरामात्म	141
विश्वामित्रवसिष्ठ	135
विष्वद्यक्चक्र	144
वीर्योत्सेक	68
वीसाण	3
वृत्राराति	5
वैदेहाय	34
वैदेहि! दिष्ट्या	110
व्यर्थं हा	117
शक्रो विक्रोशितो	72
शरासनारोपण	126
शरीरिण्या साक्षादिव	136
शस्त्राशस्त्रि	90
शापान्धो	86
शारीशुकायतन	135
शिलीमुखः	116
शुग्गीवं च	131
शेषेण भारवाति	5
शोकाविष्टां	104

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
श्रवणकटु	97	सीआवीआव	41
श्वसी च	82	सुक तं जइ	15
श्रीनारायण	1	सुग्रीवपक्षपातं	91
श्वश्रूः शुश्रूषणेन	58	सुतविप्रयोग	78
संबन्धो रघुभिः	53	सुन्दस्त्रियं	74
संरम्भेऽपि	71	सुबाहुबाहुरग	19
स एव हि गभीरिमा	139	सूर्याचन्द्रमसोः	134
सख्यास्ते	102	सोढा जोढा	47
सत्रान्ते	12	स्थानन्वूर	2
सफलपरिणामो	65	स्वर्भानुः	119
सम्पातिर्नाम	94	स्वर्वन्दीमुख	100
सम्प्राप्तस्य	108	स्वच्छीचन्द्र	56
सरिसपुरिस	47	स्वेदामृत	88
सव्वो वि सुह	72	हए सु दहमंधले	127
साम्राज्यस्यै	21	हा देवि	118

शुद्धिपत्रिका

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४	११	विवशयस्सैष	विवशयेस्सैष
९	१२	प्रत्यागमनमवे	प्रत्यागमनमेव
९	१४	रवि	रवि
१०	६	महा	महा
१०	७	पस्य	पश्य
१२	१९	साहस्रया	साहस्रया
१५	५	सीरद्धदभो	सीरद्धभो
,,	७	एष्वं	एष्व
,,	१२	दुर्दुरूढः	दुर्दुरूढः
१८	८	स्फाटिकार्द्रैः	स्फाटिकाद्रैः
२२	२	भो भो	भो भोः
२८	१	मनमत्य	मनपत्य
३८	१३	बाढ	बाढं
३९	३	महुमयबिहुह्ळा	मंहुंमयवीह्ळा
४६	११	श्रुतकीर्ति	श्रुतकीर्तिः
५८	११	च्छा	छा
८१	१७	अकुरवकुमाल	अकुरवकुमाल
८२	१	तत्तथैबाप	तत्तथैवाप
९१	११	कर्तृनम्र	कर्त्रीनम्र
९६	१९	तृप्यता विलसतामृद्धी	तृप्यताविलसता मृद्धी
१०६	१३	पारीणका	पौराणिका
१०७	३	मुखग्रवि	मुखग्रीवा
१०८	१४	भक्त्यव	भक्त्यैव
११३	१७	सिन्धुवार	सिन्दुवार
११६	७	उध्वहंन्ति	उध्वहंति
१२६	१७	रुण्डैः	रुण्डैः
१२९	८	अट्ठिम	अट्टीम
१३२	७	आय	आर्य
,,	११	पाश्चद्	पश्चाद्
,,	१२	घाव	धावा

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
,,	१४	ताराष	ताराप
१३३	१९	दशारेत्र	दशोरत्र
१३४	१३	दुत्तरिता	दुत्तारिता
१३५	१३	दशरथस्याशया	दशरथस्याज्ञया
१३६	१४	भुजङ्गमववि	भुजङ्गमवि
१३९	५	वयमव त्वरित	वयमेव त्वरित
१४०	१२	मन्त्राभिभूतं	मन्त्राभिपूतं
१४१	१५	प्रतिशति	प्रविशति
१४३	१	जणाण	जणाणं

IN THE PRESS

1 Bhojanakutūhala (Dietetics) of Raghunātha Part II.

2 Aṣṭāṅgahṛdaya with the commentary Hṛdayabodhika of Śrīdāsapaṇḍita Part III.

3 Tantrasamuccaya (Tantra) by Nārāyaṇa with the commentaries Vimarśinī and Vivaraṇa Part III.

READY FOR THE PRESS

1 Aitareya Āraṇyaka (Veda) with the commentary Mokṣapradā of Ṣaḍguruśiṣya.

2 Karaṇottama (Jyotiṣa) of Acyuta with commentary.

UNDER PREPARATION

1 Aitareyabrāhmaṇa (Veda) Part IV with the commentary Sukhaprada of Ṣaḍguruśiṣya.

2 Kalaśacandrikā (Tantra).

3 Adbhutapañjaram (Nāṭaka) of Nārāyaṇa.

Library IIAS, Shimla
S 891.202 2 R 141 S
00007086